सर्वमिदमनुमानप्रामाण्यव्यवस्थापकयुक्तिप्रदर्शनं व्याप्तिनिश्चये सतीत्यत आह सएवं व्याप्तिनिश्चय एव न संभवतीत्याशङ्क्याहेति उपायाभावान्निश्चा
पकाभावात् अनुमानप्रामाण्योपपादकतया व्याप्तिग्रहोपायस्यैवेदानीमभिधानमुचितत्वादवसरसंगत्यानेनानन्तरीयं विधाय व्याप्तिनिरूपणम
उक्तमित्याशंक्यापि निराचष्टे तत्राद्यमेतस्य व्याप्तिग्रहोपायप्रतिपादनोपयिकत्वरूपं बीजं दर्शयन्नन्विमादिमेतद्यमवतारयति समाधत्ते इति व्या
प्तिग्रहोपायकथनेन प्रामाण्यव्यवस्थापनस्य निष्पन्नत्वात् समाधत्ते इति पौनरुक्त्यविशेषणं परिहृत्य पूर्वमतनिराकरणपूर्वकं स्वमतव्यवस्थापनं का
रणीभूतेति प्रतिपादनविशेषणं प्रदर्शितं व्याप्तिग्रहोपायप्रतिपादनस्यानुमानप्रामाण्यव्यवस्थापकत्वकथनेन तस्यावश्यकत्वप्रदर्शनापू
र्वाप्तिग्रहोपायस्यावसरसंगतिरनन्तरं यावता ज्ञानं व्याप्तिग्रहोपायस्यानुमानप्रामाण्योपपादकतालाभेनैव तल्लाभात् तथापि प्रामाण्यव्यवस्थोपपादि
कत्वकथनप्रभवव्याप्तिग्रहोपायस्येदानीमाकांक्षितत्व एव मयि तच्च व्याप्तिस्वरूपनिरूपणं विना संभवतीति प्रथमं तत्र हेतोश्चिन्तामणिना तत्सूचना
पनन्तरमभिहितं निरूपितवि व्याप्तिप्रकीर्णतामभिधाय तत्रापाने बाधाभावमनुरूपामभिधायाज्ञानाभावो हेतुः साध्यसमानाधिकरणहेतुताव
च्छेदकोशब्दहेतुविशेषणज्ञानमनुरूपासहचारग्रहो हेतुरिति क्रमेण व्याप्तिग्रहोपायप्रतिपादनस्य व्याप्तिस्वरूपप्रतिपाद्यतासक्तत्वादिति भावः
प्रथमतः पूर्वपक्षमेवाभिधानेन निरूपयतीत्यस्यागतमनतया तदनुक्तेनिरूपणस्य पूर्वमतनिराकरणपूर्वकसिद्धान्तकथनरूपतया पूर्वपक्षा
भिधानानन्तरं वेदनयापि तद्विभक्तता इति ध्येयं मूलेननावदस्य भिधाने तत्वमिति व्याप्तिप्रहनस्थमनुपसन्नेन यावाभिधायपदार्थानामनुमिति

हेतु ४

गदा० जनकज्ञानविषयइत्यर्थः अनुमितिजनकत्वेनाव्यभिचारपदार्थावच्छिन्नहेतुविषयताघटितधर्मावच्छिन्नमिति पर्यवसितं अत्र हेतुमाह तद्भिन साध्याभावव
द्वृत्तित्वमित्यादि हि यतः साध्याभाववद्वृत्तित्वादिरूपं तदव्यभिचरितत्वं तद्व्याप्तिरित्यनुसंगेनान्वयः तथा च साध्याभाववद्वृत्तित्वादिरूपायाः व्यभिचार
पदार्थास्तदवच्छिन्नहेतुविषयताघटितधर्मावच्छिन्नाभावकूटवत्त्वादिनिरुक्तपर्यवसितसामान्याभावसाधकः फलितो हेतुः नचाप्रयोजकत्वे विशे
कूटस्य ४ षाभावेन सामान्याभावव्याप्यतायां अविवादात् तत्साध्याभाववद्वृत्तित्वरूपायाः अव्यभिचारपदार्थाः तदवच्छिन्नविषयताघटितधर्मावच्छिन्ना पंच ४
भावस्य प्रत्येकसाधकं हेतुं वस्तुतः केवलान्वयिन्यभावादिति साध्ये अत्यन्ताभावाप्रतियोगित्वान्योन्याभावप्रतियोगितानवच्छेदकत्वरूपकेवलान्व
यित्वग्रहदशायां अत्यन्तान्योन्याभावयोः साध्यतद्वत्त्वावच्छिन्नप्रतियोगिताकत्वमानासंभवेन प्रतियोगित्वा साध्यतदाश्रयविशेषितात्यन्तान्योन्या
भाववद्वृत्तित्वत्वावच्छिन्नविषयतापाशादृशविशेषानुमितिजनकज्ञानेः भावादित्यर्थः एवंच तादृशविषयताशून्यवृत्तित्वमेवानुमितिजनन
कतायां दर्शितसाध्यसाधको हेतुरभिमतः इति नासिद्ध्यादिः ईदृशदिशा अग्रिमहेतवोपि परिष्करणीयाः दीधितौ अव्याप्येति कपिसंयोगी एतद्वृक्षत्वादित्यादावि
त्यर्थः अव्याप्तिमिति तद्धेत्वधिकरणे एतद्वृक्षादौ यस्य देशकालावच्छेदेन कपिसंयोगाद्यभावसत्त्वादिति भावः साध्यवद्भिन्नेति साध्याभाववानिति कर्मधारये
अभेदसंबंधेन साध्यवद्भिन्नोपपत्साध्याभावाधिकरणं तद्वृत्तित्वमर्थः स्यात् तथा सति तद्घटकीभूतस्याभेदसंबंधेन साध्यवद्भिन्नोपावृत्तित्वस्यैव लक्षणत्वसं एम०
दं भवात् साध्याभाववत्तांशस्य वैयर्थ्यमतः समभिव्याहृतरूपेणाव्याहृत्साध्यपद्भिन्नवृत्तिः तथा च साध्यवद्भिन्नवृत्तिः साध्याभाववत्तद्वृत्तित्वमर्थः तत्र सर्वं वरमेदे

न साध्यवद्भिन्नोपावृत्तित्वादेर्नघटकतावत्त्यादिविशेषणेन यासाध्यवद्भिन्नस्य निवेशादिति न साध्याभावांशवैयर्थ्यमिति अभावे साध्यीयत्वानिवेशो वृक्षादिवृत्तिगग
नाद्यभाववनिपर्वतादेहो धूमादेर्हेतौ असंभवः इति तद्वारणाय साध्यपदसार्थक्यं नवाधिकरणभेदे नाभावभेदमनएवं तल्लक्षणकरणात पर्वतादेर्वृक्षादिहेतुसत्त्वाव
त्वमिति वाच्यं अव्याप्यवृत्तिप्रतियोगिकाभावस्य व्याप्यवृत्तित्वाव्याप्यवृत्तित्वविरुद्धधर्माध्यासेन भेदस्य लक्षणकत्वे सम्पन्नत्वात् आकाशाभावादेर्भेदकाभा
वेन तस्यैकत्वात् अतएव उक्तधर्माणां भेदकत्वएतानिवेतभेदकानीत्यनेन दीधितिकृतास्यति अथवा साध्याभावपदं अनुयोगितासंबंधेन साध्यीयपदं अभावी
यविलक्षणानुयोगितालाभायेवभावपदं तत्वभावत्वमपि निविशते यद्यतानाभावात् तादृशविलक्षणसंबंधेन यः साध्यीयत्तद्वद्वृत्तित्वमित्येवार्थः तत्र च सा
ध्यस्य पदार्थविशेषणत्वे वृक्षादिवृत्तिप्रमेयत्वादिमति पर्वतादौ हेतौ अत्रासंभवः स्यादिति तन्निवेशः अत्र च साध्याभावः साध्यतावच्छेदकावच्छिन्नप्रति
योगिताकोबोध्यः अन्यथा वह्निमान्धूमादित्यादौ वृक्षादिनिष्ठमहानसीयवह्नित्वावच्छिन्नप्रतियोगिताकवह्न्यभावस्य धूमवति सत्त्वेन तद्पृथिवीत्वाभाववद्व
त्वाभावात्मतावाञ्जलत्वादित्यादौ साध्यवद्भिन्नवृत्तिश्चादिनिष्ठद्रव्यत्वाद्यात्मकसाध्यप्रतियोगिकाभावस्य ज लादेरसत्त्वेन वाव्याप्त्यापत्तेः साध्यताव
च्छेदकसंबंधावच्छिन्नत्वेनापि प्रतियोगिताविशेषणीया अन्यथा वृक्षादिवृत्तिसमवायादिसंबंधावच्छिन्नप्रतियोगिताकवह्न्याद्यभावस्य धूमादिम
त्यपि वृत्तेः संभवस्य कालिकसंबंधेन द्रव्यत्वाभावादौ साध्ये कालत्वादिहेतौ साध्यवद्भिन्नपरमाणुगगनादिवृत्तित्वैशिकविशेषणतासंबंधावच्छिन्नप्र
तियोगिताकसाध्याभावात्मकद्रव्यत्वादेर्हेत्वधिकरणवृत्तित्वेनाव्याप्तेर्वा प्रसंगात् अत्र च साध्याभाववत्तायां संबंधविशेषावच्छिन्नतानिवेशो वह्निमा

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

शि॰टी॰ न्यूमादिसाध्यादौ ह्रदादिहेतौ वह्न्याद्यभावस्य कालिकादिसंबंधेन पर्वतादौ हेतेऽव्याप्तिः दैशिकविशेषणताविशेषावच्छिन्नत्वनिवेशे कालिकसंबंधावच्छिन्नप्र
तियोगिताकाकाशाभावाभावादौ दैशिकविशेषणतया साध्ये आत्मत्वादिहेतौ साध्यवद्भिन्नकालादिवृत्तेराकाशाभावात्मकसाध्याभावस्य आत्मादिवृत्ति
त्वेऽघटत्वाभावादिसाध्यकसद्धेतौ साध्याभावस्य घटत्वादेर्दैशिकविशेषणतासंबंधेनाभावेनाव्याप्तिः अतः साध्यतावच्छेदकसंबंधेन साध्यवत्त्वज्ञानप्र
तिपादकसंबंधेन स्वप्रकारकनिश्चयः प्रतिबंधकः तेन संबंधेनाभाववत्त्वं निवेश्यं संयोगेन वह्न्यादौ साध्ये तादृशसंबंधो दैशिकविशेषणता कालिकसंबंधे
नाकाशाभावाभावे दैशिकविशेषणतया साध्ये कालिकसंबंध एव तथा समवाये [illegible]यादिना घटत्वादेरभावे दैशिकविशेषणतया साध्ये समवायादि
रेवेति न दोषः नचैवं वृक्षनिष्ठा या कपिसंयोगाभावीयमूलावच्छिन्नविशेषणता तादृशसंबंधेन वृक्षादौ तादृशाभाववत्त्वज्ञानेपि कपिसंयोगवत्त्वज्ञानो
त्पत्तेः तादृशसंबंधेन लक्षणघटकइति साध्यवद्भिन्नवृत्तित्वविशेषणं व्यर्थमिति वाच्यं संयोगतदभावयोरविरुद्धत्वज्ञानाभावदशायां वृक्षः कपि
संयोगाभाववानिति ज्ञानस्यापि वृक्षे कपिसंयोगवत्त्वज्ञानविरोधितया वृक्षनिष्ठतदभावीयविशेषणताया अपि साध्यवत्त्वज्ञानप्रतिबंधकता
वच्छेदकीभूतसंसर्गताश्रयत्वात् केचित्तु साध्याभावात्मकस्वाभावनिरूपितप्रतियोगितावच्छेदकसंबंधेन साध्याभाववत्त्वं विवक्षितं स च संबंधो
यत्संबंधावच्छिन्नप्रतियोगिताकः स्वाभावः साध्यमिति नोक्तानुपपत्तिः नचैवं समवायेन प्रमेयत्वावच्छिन्नसाध्यकद्रव्यत्वप्रकारकप्रमा १५०
विषयत्वादिहेतुकस्थले कालिकसंबंधस्यापि तत्संबंधावच्छिन्नप्रतियोगिताकघटाभावरूपप्रमेयनिरूपितप्रतियोगितावच्छेदकत्वेन तेन संबंधेन साध्याभाव

समवं साध्याभावपरं ४

वति कालादिहेतौ हेतुत्वेऽव्याप्तिरिति वाच्यं तत्र समवायेन हेतौ प्रमेयस्य तादृशाभावाभावत्वेपि तदभावेन कालिकसंबंधस्य स्वाभावात्मकसाध्यनिरूपितप्रतियोगिता
वच्छेदकत्वाभावात् साध्यतावच्छेदकसंबंधेन हेतुमति यत्साध्यं तन्निरूपितप्रतियोगितावच्छेदकसंबंधस्यैव वा विवक्षितत्वात् नोक्ताव्याप्तिः एतेन कालिकसंबंधा
वच्छिन्नघटाभावादिरूपप्रमेयस्य समवायसंबंधावच्छिन्नप्रमेयाभावाभावात्मकत्वेपि समवायसंबंधावच्छिन्नप्रमेयाभावस्य कालिकसंबंधावच्छिन्नप्र
तियोगिताको योऽभावस्तस्यापि प्रमेयत्वेन साध्यतया तन्निरूपितप्रतियोगितावच्छेदकत्वस्य कालिकसंबंधे सत्त्वेन यः आप्तिर्दुर्वारैवेति परास्तं उक्ताभाव
स्य साध्यत्वेपि तस्य साध्यतावच्छेदकसंबंधेनाहत्तित्वात्तत्रैव तत्कल्पेपि कालिकसंबंधेन प्रमेयसाध्यके कालत्वादिहेतावव्याप्तिः कालिकसंबंधावच्छिन्न
प्रमेयाभावस्य यः कालिकसंबंधावच्छिन्नाभावस्तस्यापि स्वाभावात्मकस्य कालिकसंबंधेन हेतुमत्प्रमेयरूपतया तत्प्रतियोगितावच्छेदकीभूतकालिक
संबंधेनाधिकरणे हेतौ हेतौ वृत्तेरिति वाच्यं तादृशप्रतियोगितावच्छेदकयत्संबंधेन साध्यवद्भिन्नवृत्तित्वमभावस्य तत्संबंधेन तद्वृत्तित्वस्य विवक्षणीयत्वा
त् उक्तस्थले च साध्याभावस्य कालिकसंबंधेन साध्यवद्भिन्ने वृत्तेः एतेन एतादृशप्रतियोगितात्वनिष्ठत्वेन विशेषणीयाश्च यथा घटभिन्नघटत्वाभावादिसा
ध्ये घटभेदात्मकसाध्यनिरूपितप्रतियोगितावच्छेदकतादात्म्यसंबंधेन घटत्वात्मकसाध्याभाववति घटत्वे हेतौ हेतोरव्याप्तिप्रसंगात् नचैवमपि तत्र साध्याभाव
निष्ठसाध्यीयप्रतियोगिताप्रसिद्धिः घटत्वस्य घटभेदप्रतियोगितावत्त्वस्याप्रसिद्धत्वस्यापि इति वाच्यं घटभेदस्य घटत्वात्यंताभावसमनियततया ऐक्यात्
घटत्वस्यापि घटभेदप्रतियोगितावत्त्वे चैवं समयोन्याभावस्याप्यवृत्तित्वमतेऽसंयोगिभेदस्य संयोगात्यंताभावसमनियततया संयोगरूपस्य संयोगिभेदाभा

सि॰टी॰ स्वसंयोगिभेदाप्रतियोगित्वात्संयोगिभिन्नं गुणत्वादिमादाय व्याप्तिरिति वाच्यम् तन्मते संयोगिभेदस्य संयोगवत्त्वप्रकारकप्रमाविषयत्वाद्यभावसमनियततया तत्स्व
रूपत्वेन तादृशप्रमाविषयत्वादेः स्वरूपभावत्वात् तन्निप्रतियोगित्वात् तादृशसाध्याभावमादायैव लक्षणसमन्वयात् अभावांतरे साध्यनिरूपितप्रतियोगिता
सत्त्वेनैव तस्य लक्षणाघटकत्वादिति पराणसंघटादिभेदसाध्यके तादात्म्यसंबंधस्य साध्यनिरूपितप्रतियोगितावच्छेदकसंबंधत्वेपि तेन संबंधेन घटत्वरू
पसाध्याभावस्य साध्यवद्वृत्तेर्घटे सत्त्वेन तत्संबंधमादायोक्तदोषस्यासंभवात्स्वनिष्ठत्वस्य प्रतियोगितायामनिवेशनीयत्वात् आकाशाभावनिष्ठसाध्य
निरूपितप्रतियोगितायाः अप्रसिद्ध्यैव तद्वृत्तित्वमादाय आप्यनवकाशात् साध्याभावांशे वैयर्थ्यं चेत्यादुः साध्याभाववत्त्वेन साध्याभाववत्त्वविशिष्टा
धिकरणं विवक्षणीयं तेन गुणान्यत्वविशिष्टसत्ताभाववान् गुणत्वादिमादाय विशिष्टस्यानतिरिक्ततया साध्याभावस्य गुणादौ सत्त्वेपि न क्षतिः गुणे गुणा
न्यत्वविशिष्टसत्ताभावेनालीनप्रपत्तपात्तत्तादृशाभाववत्त्वविशिष्टाधिकरणत्वानभ्युपगमात् अथ एतल्लक्षणे घटत्वघटाकाशसंयोगान्यतराभाववान्
आकाशत्वादिमादाय व्याप्तिर्घटत्वस्य व्याप्यवृत्तितया तद्घटितान्यतराभाववद्वृत्तित्वेपि घटे वर्तमानस्य घटाकाशसंयोगात्मकसाध्याभावस्य हेत्वधिकर
णे गगनेपि वृत्तेः निरवच्छिन्नसाध्याभाववत्त्वानिवेशे च साध्यवद्वृत्तित्वनिवेशस्य वैयर्थ्यात् इति चेन्न एतल्लक्षणकर्तृमते प्रतियोगिसामानाधिकरण्यस्य प्र स
तियोगिवैयधिकरण्यरूपविरुद्धधर्माध्यासात् भावस्य भेदकत्वेन तादृशापुक्तान्यद्रव्यवृत्तिसंयोगाभावगुणवृत्तिसंयोगाभावयोर्भेदसिद्धिरिति व्याप्यवृत्ति एम॰
साध्यकस्थले व्याप्तिः समाधीयते तथा च घटाकाशसंयोगस्योक्तान्यतराभावप्रतियोगित्वेपि तदभावरूपतानतथात्वेति तादृशविरुद्धधर्मयोः समावेशा

यत्तत्संयोगविरोधाभावे संयोगाभावस्याप्यधिकरणभेदेन भेदासिद्धेः व्याप्यवृत्तिसाध्यके सर्वत्रैवावकाशः तदभिप्रायेण लक्षणांतरस्यादरणीयत्वात् इति गगने तिरिक्त
एव तदभावः स्वीकरणीयः स च न साध्यवद्वृत्तिरिति न दोषः साध्यवद्वृत्तेर्वर्तते तदस्य नेतानवच्छिन्नवृत्तित्वरूपपर्यवसितार्थे नाम पर्याप्त घटाकाशसंयोगात्म
काभावमादाय न दोष इति तन्न अवृद्धेयं तथा सति अप्युपस्यादि कालावच्छेदेनास्मदाद्यात्मवृत्तेः अत्वाद्यघटितसंबंधावच्छिन्नप्रतियोगिताकत्वानतद्यभावे साध्ये
गुणवादाव्याप्तिः तत्र साध्यवद्वृत्तेरनियतादृशसंबंधेन निरवच्छिन्नवृत्तिकस्य ज्ञानत्वादिरूपाभावस्य तेन संबंधेन गुणत्वाद्यधिकरणे अस्मदाद्यात्मन्यपि वृत्तेः उत्प
त्तिकालावच्छिन्नघटादिवृत्तितादृशसंबंधावच्छिन्नप्रतियोगिताकसत्ताभावादिसाध्यकघटत्वादिहेतावव्याप्तिश्च संयोगाभावनिष्ठयोर्व्याप्यवृत्तित्वाव्याप्य
वृत्तित्वयोः प्रतियोगिसामानाधिकरण्यप्रतियोगिवैयधिकरण्ययोर्वेक्ष्यमाणरीत्या न विरोधः स्वव्याप्यवृत्तिसाध्यकस्थले व्याप्त्या लक्षणांतरमवता
रयति कर्मादाविति द्रव्यत्ववधेयं द्रव्यवृत्तिसंयोगाभावो न गुणादौ स्वीक्रियते अपि तु क्षमनद्वृत्तिसंयोगवत्त्वप्रकारकप्रमाविषयत्वाद्यभाव एव संयोगा
द्यभावत्वं कल्प्यते अन्ये तु गुणाद्यधिकरणे संयोगाभावकल्पनामपेक्ष्य तथाविधैकाभावे संयोगाद्यभावत्वकल्पने लाघवात् न च संयोगवत्त्वप्रका
रकप्रमाविषयत्वाद्यभावे द्रव्यभेदसंयोगिभेदादौ वा संयोगाभावत्वं कल्प्यते इदं तु विनिगमकाभावः इति वाच्यं तादृशाभावानां समनियततया भेदा
त एवं च द्रव्यवृत्तिसंयोगाभावगुणवृत्तिसंयोगाभावयोर्भेदः समप्रमाणएव अथैवं द्रव्यत्वाभावादीनामप्यानंत्यापत्तिः कर्मादौ गुणवृत्तिद्रव्यत्वा
भावो न कल्प्यते अपि तु उक्तसमनद्वृत्तिद्रव्यगुणान्यतरत्वाभाव एव तदभावत्वमित्यादितर्केण कर्मादिवृत्तिद्रव्यत्वाभावस्य गुणादिवृत्तितदभाव

अन्यतरत्वाभावमादायेति बोध्यं

शि०दी० नोभेदस्य सिद्धिरिति चेदिष्टमेवैतदधिकरणभेदेनाभावभेदस्वादिनां नैवं संयोगाभावत्वकल्पनायां धर्मिणामप्यानंत्यात्तदुक्तविनिगमकाभावसंभवदतिवा
च्यं विनिगमनाविरहेपिइमत्वाभावे संयोगाद्यभावत्वकल्पनायानिष्प्रत्यूहत्वादिति हेतोरिति नानाधिकरणकस्य नमादिः अव्याप्तेरिति एतद्रूपवान्
एतद्रसादित्यादौ तत्र साध्याधिकरणे एतद्रूपाधिकरणस्य द्वित्वादिना भेदसत्त्वेपि व्यासज्यवृत्तिधर्मानवच्छिन्नत्वेन साध्यवन्निष्ठप्रतियोगितायाः प्रति
योग्यवृत्तित्वेन वा भेदस्य विशेषितत्वेन लक्षणगमनसंभवात् असंभवोद्दर्शिनः साकल्यमिति बोध्यमित्यस्य विशेषणमित्यादिः अत्र साध्याभाववत्तिसा
कल्यविशेषणसत्त्व एव साध्येन तद्विशेषणव्यावृत्तिः संगच्छते अन्यथा साध्याभाववन्नायाहेत्वसत्त्वाधारणेपि साध्याभाववद्व्यक्तिविद्यक्तिनिष्ठाभा
वप्रतियोगित्वमादाय नानाव्यक्तिसाध्यकसद्धेतौ लक्षणसमन्वयसंभवात् अतः साध्येतरभाववन्निवेस तदुक्ताः साध्याभाववत्तिसाकल्यविशेषणं प्रथम
तोद्दर्शितं न च साध्याभाववत्तिसाकल्यविशेषणासत्त्वेपि वह्निमान्पर्वतात्मत्वादित्यादावतिव्याप्तिवारणं साध्ये साकल्यप्रयोजनमस्ति उभयत्र साक
ल्यविशेषणदाने यत्किंचित्साध्याभाववत्तिपर्वते हेत्वभावसत्त्वेनातिव्याप्तिः साध्ये साकल्यविशेषणसत्त्वे ह्रदादेरेव सकलसाध्याभाववत्त्वपात्तत्र हे
तुमत्त्वेनातिव्याप्त्युद्धारादिति नोक्ताभिप्रायोपवर्णनं सम्यगिति वाच्यं साध्याभाववत्तिसाकल्यविशेषणासत्त्वेपि साध्ये साकल्यविशेषणस्य उक्ताति
व्याप्तिवारणप्रयोजनकत्वसंभवेपि वक्ष्यमाणप्रयोजनस्यैव वास्तवतयाभ्रस साध्याभाववत्तिसाकल्यविशेषणसत्त्व एव संगतेरिति तात्पर्यदर्शनस्योपवि ५०
साध्ये नत्वात्तवक्तनक्त साकल्यविशेषणं परिमिस साध्याभावे साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वनिवेशेनेनकल्प्यान्तरस्यावलंबनीयतयाचर

अव्याप्तिरूपस्य ... संकीर्णत्वे ... धूमोभयवान्वह्नेरित्यादौ साध्याभाववत्तिसाकल्येन ... सर्वत्र ... मादायेति बोध्यं २

स्यैवतस्य दर्शनमुचितम् साध्येतरभाववत्तित्वबोध्यमित्युक्ता साध्यतावच्छेदकावच्छिन्नप्रतियोगिताको वाभावो यात्यन्तरसुक्तो साध्याभाववत्तित्वसाकल्यंनि
वेश्यते साध्याभावो वा एतादृशनिवेशपरस्येतादृशविकल्पः प्रतीयते सच्चाविवक्षितत्वादिसारं साध्याभावे साकल्यविशेषणे धूमवान्वह्नेरित्यादौ
साध्यतावच्छेदकीभूतसंयोगसंबंधावच्छिन्नप्रतियोगिताकसकलसाध्याभावाधिकरणगुणादिरेव तस्य न संयोगोलकादेर्हृदासंयुक्तत्वावच्छिन्नाभावानधि
करणत्वात् इत्यतिव्याप्तिर्वह्निमत्त्वप्रकारकप्रमाविषयो धूमादित्यादौ साध्यतावच्छेदकीभूतस्वरूपसंबंधावच्छिन्नप्रतियोगिताकतत्तद्ह्रदपक्ष्माहत्तत्वावच्छिन्ना
भावस्य तत्तद्ह्रदपक्ष्माद्यहत्तितया सकलसाध्याभावाधिकरणाप्रसिद्ध्याव्याप्तिश्चेति तद्रूपस्य साध्ये साकल्यविशेषणं निवेशितेनतु साध्ये साकल्यविशेषण
दानेपि वह्निमान्धूमादित्यादावव्याप्तिर्नाव्यापिनारावस्थ्यपर्वतादावपिपर्वतीयवह्नेर्द्वित्वादिना भावे सत्त्वे सकलसाध्याभाववत्त्वान्न्यासज्यवृत्तिधर्मानवच्छिन्नप्रति
योगिताकत्वेनाभावविशेषणे च वह्निमत्त्वसोभयवानवह्नेरित्यादावतिव्याप्तिः वह्निमतस्तथाविधसाध्याभावानधिकरणत्वात्साध्यतावच्छेदकाभिरिक्तोयो
व्यासज्यवृत्तिधर्मसदनवच्छिन्नप्रतियोगिताकत्वनिवेशने वलाघवात्साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वस्यैवाभावे निवेशनमुचितं किं साध्ये सा
कल्यविशेषणेनेत्यभिप्रेतमत एवाह साध्यतावच्छेदकेति साध्याभाववत्तिसाकल्यविशेषणप्रयोजनमाह विपक्षेति वैकल्पिकयोः साध्यतदभावयोः सा
कल्यसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वविशेषणयोर्व्यावृत्तिमाह न चेत्येकव्यक्तिके एतद्रूपवानेतद्रसादित्यादौ हेत्वधिकरणे सर्वह्रणाद्वित्र
त्वविशिष्टसाध्याभावोनप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिअधिकरणः सर्वह्रणादिद्वित्वविशिष्टेतद्रूपादेरेतद्रसाधिकरणे हेत्वेतद्रूपतद्रूपोभयत्वा

साध्यतावच्छेदकीभूत ... कृताधिकरण ... प्रसिद्धि

अत्र वह्निमान्धूमादित्यादौ ... अव्याप्तिरपि ... सर्वस्य ... किंचित्कस्मिन्सा नापि बोध्यं ६

अत्रापि ... साध्याभाववत्ति साक ... साध्ये साक ... वह्निमत्त्व ...
... साध्याभाववत्तिसाक ... उपा ... २

शि०टी० वच्छिन्नाभावेऽपि न तथा प्रतियोगितावच्छेदकावच्छिन्नाधिकरणाप्रसिद्धेः नञ्चलक्षणसंगतेरित्यतो नानाव्यक्तिक इत्युक्तं अत एवाव्याप्तिरेवोक्ता नासंभवः अत्र नानाव्य
क्तिसाध्यकत्वं अधिकरणद्वयवृत्तिसाध्यतावच्छेदकवत्त्वं अत एव न द्वित्रिपावद्धर्मवान् एतत्वादित्यादौ नानाव्यक्तिसाध्यके व्याप्तिविरहेऽपि न क्षतिः अव्याप्यवृ
त्तीति कपिसंयोगी एतद्वृक्षत्वादित्यादाविमर्थः अव्याप्तेर्वारणायेत्यन्वयः व्यभिचारिणीवेति एतद्वृक्षत्ववान् कपिसंयोगादित्यादावित्यर्थः अभावद्वये साध्या
भावे हेत्वभावे च तथात्वात् अव्याप्यवृत्तिसाध्यकव्याप्यवृत्तिहेतावव्याप्तिवारणाय साध्याभावे व्यभिचारिणि चाव्याप्यवृत्तौ चातिव्याप्तेर्वारणाय हेत्वभावे प्रतियो
गिवैयधिकरण्यमित्यर्थः यद्यपि हेत्वभावे प्रतियोगिवैयधिकरण्यविशेषणस्य अवयवपक्षतया कपिसंयोगी कपिविभागादित्याद्यव्याप्यवृत्तिहेतुके व्याप्तिवारण
प्रयोजनकत्वं साध्याभावे तद्विशेषणस्य संभवतीति व्याप्यवृत्तीमकिंचित्करं तथापि हेत्वभावे तद्विशेषणप्रतिसंधानं विनैव व्याप्यवृत्तिहेतुकस्थले व्याप्ति
निर्णयो भवतीत्येतदभिसंधायैव तदुक्तं प्रतियोगिवैयधिकरण्यं च प्रतियोग्यधिकरणावृत्तित्वं अव्याप्यवृत्तिसाध्यके तथाविधहेतुके च नादृशसाध्याभावहे
त्वभावाः प्रसिद्धाव्याप्तेः अपि तु प्रतियोग्यनधिकरणवृत्तित्वविशिष्टसाध्याभावाधिकरणे प्रत्यन्वय्यपि प्रतियोग्यनधिकरणवृत्तित्वविशिष्टः स च वर्ज्यतेऽयोः भावस्य
प्रतियोगित्वमित्यर्थः तेन कपिसंयोगी एतत्वादित्यादौ कपिसंयोगाद्यनधिकरणगुणादिवृत्तित्वोपलक्षितकपिसंयोगाद्यभावस्य हेत्वधिकरणे सत्वेऽपि नाव्याप्तिः न
वा एतद्वृक्षत्ववान् कपिसंयोगादित्यादौ तथाविधकपिसंयोगाद्यभावस्य सकलसाध्याभावाधिकरणे सत्वेऽपि अतिव्याप्तिः प्रतियोग्यनधिकरणीभूतसाध्याभावा एम०
धिकरणयावद्विशिष्टस्वप्रतियोग्यनधिकरणताकाभावप्रतियोगित्वमिति फलितार्थः प्रथमे साध्यतावच्छेदकसंबंधेन चरमे हेतुतावच्छेदकसंबंधेन प्रतियोग्यनधि

MEMORIAL

करणत्वं बोध्यं तेनाप्रमाणत्वात् आत्मत्वमहाकालान्यतरत्वादित्यादौ व्यभिचारनिरूपकाधिकरणस्य कालस्य कालिकसंबंधेन साध्याधिकरणत्वेऽपि नातिव्याप्तिर्न
वा वह्निमान् धूमादित्यादौ साध्याभावाधिकरणयावदंतर्गतकालघटनादिषु कालिकविषयित्वादिसंबंधेन हेत्वभावप्रतियोग्यधिकरणतासत्वेऽपि संभवोः
व्याप्तिर्वा अर्थे च प्रतियोगित्वे संबंधविशेषावच्छिन्नत्वेन निवेशनीये संबंधान्तरावच्छिन्नप्रतियोगिताकयोः साध्याभावहेत्वभावयोरुक्तसंबंधेन प्रतियोगिस
मानाधिकरणतया असंभवव्याप्तीत्यभ्युपगमे तत्र [illegible] इति अपि च हेतुसाध्याभावेऽपि प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यनिवेशनीयमिति सत्य
नेन विशिष्टसत्तावान् जातेरित्यादौ हेत्वधिकरणगुणादिषु साध्याभावप्रतियोगिसत्वात् सत्वेऽपि नातिव्याप्तिः च तत्र साध्याभावोऽपि उक्तो अप्रसिद्धत्वादेव नहे
त्वभावपरामर्शासंभवः तत्र हेत्वभावपदोपादानेन अक्रमाधिकमिति तत्रोक्तं न तत्प्रतियोगित्वं साध्याभाववन्निष्ठाभावप्रतियोगित्वं हेतुतावच्छेदकरूपेण हे
तुतावच्छेदकावच्छिन्नमित्यर्थः हेत्वभावनिष्ठप्रतियोगिवैयधिकरण्यशरीरे प्रतियोगितावच्छेदकावच्छिन्नत्वस्य प्रयोजनमाह द्रव्यत्वादावितिविशिष्टसत्ते निवेश
ति गुणकर्मान्यत्वविशिष्टसत्वे संयोगः प्रतियोगितायां हेतुतावच्छेदकावच्छिन्नत्वनिवेशस्य प्रयोजनमाह नवेति अत्रापि द्रव्यत्वादौ साध्ये इत्यनुषज्यते वि
शिष्टसत्तात्वादिना गुणकर्मान्यत्वविशिष्टसत्तात्वादिनात्नीयार्थ अवच्छिन्नप्रतियोगिताकत्वं तस्याभावान्वयः प्रतियोगिपदार्थैकदेशप्रतियोगि
तानिरूपितमवच्छिन्नत्वं वा न दर्थः ना[illegible]भावे इति सकलसाध्याभाववन्निष्ठाभावे संबंधः न च हेत्वभावे प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यस्थले हेतु
तावच्छेदकावच्छिन्नवैयधिकरण्यमेव निवेश्यतां अतो पि प्रयोजनं निर्वाहात् तथा च द्रव्यं सत्वादित्यादौ विशिष्टसत्ताभावस्य हेतुतावच्छेदकावच्छिन्नसमाना

शि॰टी॰ धिकरणतानंपेक्षानिव्याप्तिवारणसंभवात्प्रतियोगितायांहेतुतावच्छेदकावच्छिन्नत्वनिवेशनमफलमितिवाच्यम् हेतुतावच्छेदकावच्छिन्नत्वेप्यधिकरणपनिवेशेसक
लसाध्याभाववन्निष्ठायाहेतुतावच्छेदकावच्छिन्नानधिकरणवृत्तित्वविशिष्टनिरूपिताधिकरणतानन्निरूपकाभावप्रतियोगित्वमर्थः स्यात्तदपेक्षयासकलसा
ध्याभाववन्निष्ठहेतुतावच्छेदकावच्छिन्नयादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणतात्वरूपास्मदीयफलितार्थस्यागुरुत्वात् नवममापिसकलसाध्या
भाववन्निष्ठयद्धर्मावच्छिन्नानधिकरणत्वंतद्धर्मवत्वमित्यर्थः स्वातिलघुरेवेतिवाच्यं एतादृशार्थकरणे मूलोक्तप्रयोगितायाव्याप्तित्वव्याहेमेतेतिमूलानुसारे
णदीधितिकृतागुर्वर्थानुसरणात्उक्तविशेष्यविशेषणभावेनविशेष्यर्थविशेषणतानवकाशात् एतल्लक्षणंदूषयितुमुक्तलक्षणमवतारयतिपत्रैक
व्यक्तिकमितिप्रत्येकव्यक्तिकंसाध्यंतत्राव्याप्तिरित्यन्वयः एतद्रूपवान्एतद्रसाहित्याद्दोसाकल्याप्रसिद्ध्याऽव्याप्तिरित्यर्थः अनेकाशेषरूपसाकल्यस्यसाध्येऽसत्वा
दितिभावः साध्येसाकल्यविशेषणंयदिस्यसकल्पांतानुसरणात्तनुनत्वेनदोषावकाशइत्यतआहविपक्षोवेतिविपक्षः साध्याभाववान्अत्रापिएकव्यक्तिकइत्य
स्यविपरीतस्यानुषंगः तथाचैतद्घटभिन्नपटत्वादिसाध्यासाध्याभाववन्तत्घटादौसाकल्याप्रसिद्ध्याऽव्याप्तिरित्यर्थः सकलशब्दस्याशेषमात्रपरत्वेदोषांतरमाह
निर्धूमत्वव्याप्यइति नत्वेवेति व्याप्यत्वेन धावद्धूमत्वावच्छिन्नाभावव्याप्यवान्वह्न्यावच्छिन्नाभावादित्यादाविन्यर्थः निर्धूमत्वत्वावच्छिन्नेसाध्येएकव्यक्तिनपाद
वदोषाक्रांतत्वेनतद्व्याप्यसाध्यकानुसारणे निर्धूमत्वव्याप्यद्रव्यत्वादेस्ताद्रूप्येणसाधनतायांसद्धेतुत्वानुपपत्तिरितस्तत्वेनेत्युक्तं हेतुतावच्छेदकेति अत्रवत्त्यात्मकहेत्व १५०
भावस्यप्रत्येकंसकलसाध्याभाववन्निष्ठत्वासंभवेपिसकलतन्निष्ठवत्त्यभावादिभेदप्रतियोगितामादायैवलक्षणसंगमनीयं हेतुतावच्छेदकसंबंधेनप्रतियोगित्वेप्यधिकर

णपनिवेशादेवव्यभिचारिणिसंबंधांतरावच्छिन्नप्रतियोगिताकहेत्वभावमादायातिप्रसंगानवकाशेनहेत्वभावप्रतियोगितायांहेतुतावच्छेदकसं
बंधावच्छिन्नत्वानिवेशात् वह्निमद्देहेतुताभिप्रायकोयंग्रंथः भेदभेदस्यस्वनवस्थाभयेनाधिकरणस्वरूपतयातस्यस्वप्रत्येकविश्रांततयापावद्वि
पक्षवृत्तित्वासंभवात् तत्वहेतुभेदमादायापिलक्षणगमनासंभवादति तत्राकाशाभावाद्यधिकरणकभेदभेदस्याकाशाद्यभावस्वरूपतयातस्य
सर्वावद्विपक्षवृत्तित्वेनतमादायैवलक्षणगमनसंभवात् कहशीत्याकाशाभावमादायभेदहेतुकव्यभिचारिण्यतिप्रसक्त्याहेत्वभावत्वेनसक
लसाध्याभावाधिकरणवृत्तित्वंविवक्षणीयं तथाचस्वाधिकरणस्वरूपाभावस्यस्वस्मिन्नेवतद्भावत्वेनवृत्तिरितिनातिव्याप्त्यवकाशः एवंचाकाशाभा
वमादायनोक्ताव्याप्तिपरीहारसंभवइतिभावः उक्तस्थलेत्वाकाशाभावस्यहेतुतावच्छेदकसंबंधेनप्रतियोगित्वेप्यधिकरणपरिहारेवातिव्याप्तिवारण
संभवेनतादृशाविवक्षायानिष्प्रयोजनकत्वात् वह्निमद्देहेतुकस्थलेत्वसाध्याभावाधिकरणस्यहेतुरूपप्रतियोग्यनधिकरणत्वेनाकाशाभावरूपहेतुभेद
स्यप्रतियोगिअधिकरणत्वेनाव्याप्तिवारणसंभवादिति कश्चित् यद्वत्त्यभाववत्त्वविशिष्टनिर्धूमत्वव्याप्यसाध्यंवत्त्यभावोस्तुविशिष्टवत्त्यभावोहे ५४
तुस्तत्रवत्त्यभावस्यापिसकलसाध्याभाववृत्तेर्गतत्वात्तत्त्वत्त्यभावभेदासत्वेनमादायलक्षणगमनासंभवात्तदादृशविशिष्टहेतुकस्थलेहेतुभेदस्य
सकलसाध्याभाववन्निष्ठत्वासंभवेपिस्वस्वरस्वविशिष्टान्योन्याभावस्यतथात्वमादायैवलक्षणसंगमनीयमितिकश्चित्प्रावीनमतेविशिष्टाभावेस्यविशे
षणाभावविशेष्याभावाभ्यामनतिरिक्ततयातादृशविशिष्टाभावस्यवत्त्यभावत्वस्तुभयरूपत्वेनसकलसाध्याभाववन्निष्ठत्वासंभवात्तत्रैवमपिविवपि

उत्रवत्त्यभावेहेतो: सत्वेन तादृशसाध्याभावसत्वेन अभिचारणलक्षणपरेतोवपुत्रषा
वात्पत्वविशेष: आपके यर्थविशेषणतां नदोषापात् अव्याप्तिरूपादृशसिध्पथे
साध्यतदभ्यवर्णविशेषाबोध्य इतिध्येय ४

शि०टी० तादृशसंबंधावच्छिन्नप्रतियोगिताकस्यवह्न्यभावादेस्तादृशाभावस्यावृत्तेरतःपावकलक्ष्मवन्निष्ठतयातमादायैवलक्षणसंगमनीयमितिनिर्वह्नित्वेनियामकतया
विषयितादिसंबंधानामसत्ताभावप्रतियोगितानवच्छेदकत्वात्संयोगादिरूपव्यधिकरणसंबंधावच्छिन्नप्रतियोगिताकवह्न्यभावाद्यभावस्यावृत्तेःस्वस
कलत्रूमवन्निष्ठत्वेपिप्रतियोगितानवच्छेदकीभूतवह्न्यभावत्वावच्छिन्नात्तत्कलाद्येनाभावत्वस्यैवावच्छेदकत्वादितिनतमादायापिलक्षणं
गतिः नचगुरुधर्मावच्छिन्नहेतुकस्थलेलक्षणसंगमनायपारिभाषिकमेवावच्छेदकत्वंहेतुतावच्छेदकेनिवेश्यंतथाचवह्न्यभावत्वादेरपितादृशावच्छे
दकत्वमक्षतमेवेतिवाच्यंएतल्लक्षणस्यपर्याप्त्यनपायिनिखिलदोषोद्धारणायस्वरूपकत्वेनपारिभाषिकावच्छेदकत्वंननिविष्टमित्यभिप्रायेणैवतद्दो
षदानादितिनिरस्तत्वात्यामसमपिसकलसाध्याभाववन्निष्ठकालिकसंबंधावच्छिन्नप्रतियोगिताकवह्न्यभावाद्यभावमादायलक्षणसमन्वयसंभवात्तन्म
मात्रस्यकालोपाधितानयेसाध्याभाववतिपर्वतादौकालिकसंबंधेनवह्न्यभावादिसत्त्वात्तत्रतत्संबंधेनतस्याभावोनचतेनेत्येवंनिवाच्यंकालिकसंबंधेन
तत्रवह्न्यभावसत्त्वेपिप्रतियोग्यनधिकरणीभूतवह्निमद्वृत्तित्वावच्छेदेनतत्तत्संबंधावच्छिन्नप्रतियोगिताकतदभावस्यापिसत्त्वात्तस्यतत्प्रतियोगितावच्छे
दकसंबंधेनैवप्रतियोगिवैयधिकरण्यंनिविष्टंप्रतियोगितावच्छेदकसंबंधावच्छिन्नत्वेनैवनिविष्टमित्यभिप्रायेणैवतद्दोषदानेहेतुतावच्छेदकसंब
धेनप्रतियोगिवैयधिकरण्यप्रवेशेनत्वग्रिमलक्षणापेक्षयागौरवमेवेतल्लक्षणवतोवीतेऽनेनसकलसाध्यव्यापकतार्थकतयासाध्याभावव्यापकी १५०
भूताभावप्रतियोगित्वमेवनिष्कृष्टेतल्लक्षणार्थःस्वसमानाधिकरणोपादानमपात्वादिनावह्न्यभावस्यसाध्याभावव्यापकत्वेपिनक्षतिःपदूपावच्छिन्नप्रतियोगिता

अन्वयपदस्य [illegible] भावनिष्ठाभावप्रतियोगितावच्छेदकपरं ५

काभावत्वंसाध्याभावव्यापकतावच्छेदकंतद्रूपवत्त्वस्यैवलक्षणत्वात्एवंचहेत्वभावेप्रतियोगिवैयधिकरण्यंननिवेश्यंनैव्यापकतालक्षणेप्रतियोगिवै
यधिकरण्यानिवेशेनत्वव्याप्यहेतुकव्यभिचारिणिहेत्वभावस्यसाध्याभाववन्निष्ठहेतुरूपाभावप्रतियोगितायाव्यापकत्वाभावेनातिप्रसंगविरहात्
व्यापकताशरीरेचहेतुतावच्छेदकसंबंधेनसाध्याभाववन्निष्ठत्वमभावेनिवेश्यंतेनवृत्त्याद्यभाववतिकालिकादिसंबंधेनधूमादिरूपाभावस्यसत्त्वेपिधूमा
भावादेर्नसाध्याभावव्यापकतानुपपत्तिःसत्तावान्जातेरित्यादौसाध्याभाववतिहेतुतावच्छेदकसंबंधेनहेतोरप्रसिद्ध्याव्याप्तिलक्षणपञ्चकएवदोषःश्री
ल्कवोहेतुतावच्छेदकसंबंधेनहेतुमत्तानाप्रतियोगिस्वसंबंधेनहेत्वभाववत्त्वात्तथाहिःनिबंधकःतादृशसंबंधेनस्वावच्छिन्नाधिकरणभिन्नसाध्याभावाधि
करणपर्याप्तत्वंतद्भिन्नत्वमेवसाध्याभावव्यापकतावच्छेदकत्वंइत्थंचसत्तावान्जातेरित्यादौएतादृशसत्ताभावत्वादिकमेवतद्भिन्नत्वजातिमभावत्व
मितिलक्षणसमन्वयःअयंचएतद्वृक्षवान्कपिसंयोगादित्यादौकपिसंयोगाभाववत्त्वावच्छिन्नानधिकरणत्वाप्रसिद्ध्याकपिसंयोगाभावत्वेनैतादृशत्व
मितिकपिसंयोगाभावत्वस्यसाध्याभावव्यापकतावच्छेदकत्वादतिव्याप्तिवारणायहेत्वभावेप्रतियोगिवैयधिकरण्यविशेषणंदेयमेवनदेयमेववात्राधि
करणत्वाभावस्यैवाधिकरणभिन्नत्वस्थानेनिवेशनीयत्वात्कपिसंयोगाभावादेरिवतदधिकरणतापर्याप्त्यव्याप्यवृत्तित्वात्तदभावस्यसाध्याभावव
न्निष्ठत्वेनातिव्याप्त्यनवकाशात्स्वाधिकरणत्वाभावादिस्वाभावप्रतियोगिकतयास्वनिरुक्तएवेतिविशेषणतावच्छेदकत्वंसाध्याभाववन्निवि
शेषणीयमितिएवंचनिर्दुष्टमव्याप्यवाननिर्वह्नित्वादित्यादौहेत्वभावस्यवह्न्यादेःप्रत्येकंयावद्विपक्षावृत्तित्वेपिहेत्वभाववत्त्वेनैतेषांसाध्याभावव्याप

शि०टी० तादृशसंबंधावच्छिन्नप्रतियोगिताकस्य वह्न्यभावस्य तेनाभावस्यावृत्तेः तथापि सकलधूमवन्निष्ठतया तन्मात्रापेक्षलक्षणगमनीयमिति चिन्त्यं वस्तुतः नियामकतया
विषयितादिसंबंधानामपि तत्ताभावप्रतियोगितानवच्छेदकत्वात् संयोगादिरूपव्यधिकरणसंबंधावच्छिन्नप्रतियोगिताकवह्न्यभावाद्यभावस्याप्रसिद्धेः सकल
धूमवन्निष्ठत्वेऽपि प्रतियोगितानवच्छेदकहेतुतावच्छेदकीभूतवह्न्यभावत्वावच्छिन्नात् तत्र तत्ताभावस्यैवावच्छेदकत्वादिति न तन्मात्रापि लक्षणस्य
गतिः न च गुरुधर्मावच्छिन्नहेतुकस्थले लक्षणस्य गमनाय स्वाभाविकमेवावच्छेदकत्वं हेतुतावच्छेदके निवेश्यं तथा च वह्न्यभावत्वादेरपि तादृशावच्छे
दकत्वमक्षतमेवेति वाच्यं एतल्लक्षणस्यापि तस्यतया निखिलदोषोद्धारेणावश्यकत्वेन प्रातिभासिकावच्छेदकत्वं न निविष्टमित्यभिप्रायेणैवेतद्
परतया निरस्तत्वात् अपि सकलसाध्याभाववन्निष्ठकालिकसंबंधावच्छिन्नप्रतियोगिताकवह्न्यभावाद्यभावमादाय लक्षणसमन्वयसंभवात् तत्र
मात्रस्य कालोपाधिनानयेन साध्याभावव निपर्वतादौ कालिकसंबंधेन वह्न्यभावादिसत्त्वात् तत्र तत्संबंधेन तस्याभावो न च तत्र एवेति वाच्यं कालिकसंबंधेन
तत्र वह्न्यभावसत्त्वेऽपि प्रतियोग्यनधिकरणीभूतवह्निमद्वृत्तित्वावच्छेदेन तत्र तत्संबंधावच्छिन्नप्रतियोगिताकतदभावस्यापि सत्त्वात् तस्मात् प्रतियोगितावच्छे
दकसंबंधेनैव प्रतियोगिवैयधिकरण्यं निविष्टं प्रतियोगिताघटकहेतुतावच्छेदकसंबंधावच्छिन्नत्वेनैव निविष्टमित्यभिप्रायेणैव तदाशयेन हेतुतावच्छेदकसंब
धेन प्रतियोगिवैयधिकरण्यप्रवेशोऽत्र अग्रिमलक्षणापेक्षया गौरवमेवेति तल्लक्षणवतो वीज एतेन सकलसाध्याभावव्यापकताघटकतया साध्याभावव्यापकी ११५०
भूताभावप्रतियोगित्वमेव निष्कृष्टेन तल्लक्षणार्थः समवायेन वह्न्यादौ प्रमेयत्वादिना वह्न्यभावस्य साध्याभावव्यापकत्वेऽपि न क्षतिः पद्मावच्छिन्नप्रतियोगिता

अत्रत्य पङ्क्तिः ... भाव निष्ठाभावप्रतियोगिता वच्छेदकपरं ५

काभावत्वं साध्याभावव्यापकतावच्छेदकं तद्रूपवत्त्वस्यैव लक्षणत्वात् एवं च हेत्वभावे प्रतियोगिवैयधिकरण्यं न निवेश्यं तेन व्यापकतालक्षणे प्रतियोगिवै
यधिकरण्यानिवेशेन स्वव्याप्यवृत्तित्वे हेतुकत्वमिवाऽऽग्रहेत्वभावस्य साध्याभाववन्निष्ठहेतुरूपाभावप्रतियोगितायाव्यापकत्वाभावेनातिप्रसंगविरहात्
व्यापकताशरीरे च हेतुतावच्छेदकसंबंधेन साध्याभाववन्निष्ठत्वमभावे निवेश्यं तेन वह्न्याद्यभावविशिष्टकालिकादिसंबंधेन धूमादिरूपाभावस्य सत्त्वेऽपि धूमा
भावादेर्न साध्याभावव्यापकताहानिः सत्ताद्यात्मनात्मनोरित्यादौ साध्याभाववति हेतुतावच्छेदकसंबंधेन तत्र प्रसिद्ध्याः व्याप्तिलक्षणपञ्चकएवदोषः श्री
स्वाहेतुतावच्छेदकसंबंधेन हेतुमत्तानात्मप्रतियोगिक संबंधेन हेत्वभाववत्ताग्रहः निबंधकः तादृशसंबंधेन स्वावच्छिन्नाधिकरणभिन्नसाध्याभावाधि
करणपदात्त्वं तद्भिन्नत्वमेव साध्याभावव्यापकतावच्छेदकत्वं इत्येवसत्तावात्मनात्मनोरित्यादौ एतादृशस्वत्वात्मनाभावत्वादिकमेव नञ्जिज्ञासया जातमभावत्व
मितिलक्षणसमन्वयः अथैवमेतद्रूपावरुकपिसंयोगादिमानेकपिसंयोगाभावत्वावच्छिन्नानधिकरणत्वाप्रसिद्ध्याकपिसंयोगाभावत्वं नैतादृशं त्व
मितिकपिसंयोगाभावत्वस्य साध्याभावव्यापकतावच्छेदकत्वादित्यव्याप्तिवारणाय हेत्वभावे प्रतियोगिवैयधिकरण्यविशेषणं देयमेव न देयमेव वा स्वाधि
करणत्वाभावस्यैवाधिकरणभिन्नत्वस्थाने निवेशनीयत्वात्कपिसंयोगाभावादेरिव तदधिकरणताप्रत्यव्याप्यवृत्तित्वात्तदभावस्य साध्याभावव
निष्ठत्वेनातिव्याप्त्यनवकाशात् अधिकरणत्वाभावादिस्वाभावप्रतियोगिकतयाप्रसिद्धिरिति विशेषणतावि शेषेणैव तद्धुत्वेसाध्याभाववन्नि
शेषणीयमिति निरुक्तं च निर्धूमत्वव्याप्यवान्निर्वह्नित्वादित्यादौ हेत्वभावस्य वह्न्यादेः प्रत्येकं यावद्विपक्षावृत्तित्वेऽपि हेत्वभावत्वेन तेषां साध्याभावव्याप

साध्याभाववन्निहेतुस्वरूपप्रतियोगिताननुगमः ... कत्वस्वरूपनद्यापकत्वं

शि०टी० कत्वात्तद्व्याप्तिरिति सर्वपक्षेऽप्यकिंचित्करः यत्र यावंतः साध्याभाववंतः संभवंति तत्र प्रातिस्विकरूपेण तत्तदधिकरणवृत्तित्वे हेत्वभावविशेषणतया
लक्षणघटकं न तु साध्याभावव्यापकत्वमित्यभिप्रायेणैव एतद्दोषदानात् प्रकारांतरानुसरणेनापरिष्कारे सकललक्षणानामेव परिष्कारासंभवादि
ति कृतं पल्लवितेन साध्यवद्वृत्तिविशेषपेदमादायाव्याप्तिपरिहारस्तत्रैवेति साध्यवत्त्वावच्छिन्नप्रतियोगिताकत्वमिति साध्यतावच्छेदकविशिष्ट
साध्यवत्त्वपर्याप्तप्रतियोगितावच्छेदकताकत्वमित्यर्थः तेन वह्निमान् धूमादित्यादौ तत्तद्वह्निमत्त्वावच्छिन्नप्रतियोगिताकभेदमादाय न दोषः ता
दृशभेदप्रतियोगितावच्छेदकतायास्तत्तद्विशिष्टत्ववह्निमत्त्व एव पर्याप्तत्वात् त्वमत्रिबललभ्यं अस्याद्विपदसमभिव्याहारबललभ्यं नञ्पदसमभिव्याहारात्तानस्य
वनादृशपदसमभिव्याहारस्थानस्याप्यन्वयितावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाभावप्रत्यायकत्वावच्छिन्नप्रमेव जनकत्वादिति भावः अत्र त्रिबललभ्यमित्यनेन य
थाश्रुतलक्षणवाक्यार्थ एवायमिति सूचितं तादृशसमभिव्याहारस्थले तत्प्रतियोगिकाभावमात्रबोधे तु प्रसंगं स्वत्वयति नहि भवतीति प्रामाणिकव्यवहार
तिरोधः तथा चान्वयिप्रतियोगिकाभावमात्रबोधे नीलघटेऽपि पीतघटादिभेदसत्त्वेन तादृशव्यवहारोऽपि स्यादिति भावः एवं रक्तो न घट इत्यादिप्रयोगादनुयोगि
तावच्छेदकावच्छेदेनैवान्योन्याभावादिरित्यादिपदेन प्रत्याय्यते अनुयोगितावच्छेदकस्य प्रतियोग्यवृत्तिरेव धर्म इति प्रकाशकृताङ्गीकृतं तत्सुत्पत्त्यनुरोधात् घटो घटा
दन्य इति प्रयोगवारणसंभवाच्च नील इति घटादन्य इत्यादौ प्राचीनमते पंचम्याः प्रतियोगित्वमर्थः तत्र च प्रकृत्यर्थस्य घटत्वादिविशिष्टस्य घटत्वाद्यवच्छिन्नत्ववि एम०
शिष्टाधेयतासंबंधेनान्वयः अथवा केवलमाधेयत्वमेव घटस्य संबंधः धर्मिपारतंत्र्येण घटत्वादेरप्यवच्छिन्नत्वसंबंधेन तत्रान्वयोपगमात् एकं विशेषणत्वेनोपस्थि

तस्याप्यन्यत्र पारतंत्र्येणान्वयस्याव्युत्पत्तिसिद्धत्वात् प्रतियोगित्वस्य च व्युत्पत्तिवैचित्र्येणान्यपदार्थैकदेशे भेदे निरूपकतासंबंधेनान्वयः घटान्यदित्यादौ निरूपकतासं
बंधेन घटत्वाद्यवच्छिन्नप्रतियोगिताविशिष्टो लक्षणया घटादिपदार्थः नन्वेवं सर्वपदस्य तत्र हि भक्तार्थविशिष्टलाक्षणिकत्वात् तादृशघटादिपदार्थस्य
चाभेदसंबंधेन भेदेऽन्वयः नवीनमते च घटादन्य इत्यादावनुयोगितापंचम्यर्थः तत्र च प्रकृत्यर्थस्य घटत्वादिविशिष्टस्य स्ववृत्तिघटत्वाद्यवच्छिन्ननिरूपकताकत्व
८ संबंधेनान्वयः अनुयोगितायाश्चाश्रयत्वसंबंधेन भेदेऽन्वयः समासस्थले च घटत्वाद्यवच्छिन्ननिरूपितानुयोगिताविशिष्टे सर्वपदस्य लक्षणा तस्य चाभेदसंबंधे
न भेदेऽन्वयः अथैवं साध्यवदन्यावृत्तित्वमित्यत्र तादृशलक्षणवाक्यात् अभेदसंबंधेन तादृशप्रतियोगिताविशिष्टविशेषितत्वात् तादृशानुयोगिताविशिष्टविशेषि
तो वा यो भेदः तद्वद्वृत्तित्वमेव प्रतीयते तथा च अनुमितिविषयकव्याप्तिस्वरूपप्रतिज्ञासामर्थ्यं तादृशलक्षणाभिधाने अर्थान्तरप्रसंगः तादृशप्रतियोगितासंबंधेन तादृशा
नुयोगितासंबंधेन वा साध्यवद्विशेषितभेदवैशिष्ट्यज्ञानस्यैव लाघवेनानुमितिहेतुत्वादिति चेत् तादृशव्याप्तिज्ञानमनुमितिहेतुः तस्यामेवाव्याप्तिता सर्वथा तत्तस्याः
शाब्दबोधविषयत्वेऽपि तन्मूलकारीन तादृशव्याप्तिविषयकमानसोपनीतभानस्यैव तादृशत्वात्तस्य निर्वाद्यत्वात् नीलो घटः कंबुग्रीवादिमदन्य इत्यादिवाक्या
स्याप्रमाणत्वात् तत्र पटः कम्बुग्रीवादिमदन्य इत्यादिवाक्यस्य प्रमाणत्वात् अन्वयितावच्छेदकनिरूपितपर्याप्तिकावच्छिन्नत्वे प्रतियोगितायां भासतः स्तुपेयं
अतः साध्यवदन्यदित्यादौ मत्वेवं तत्प्रतियोगितावच्छेदककस्य साध्यसंबंधस्य साध्यापेक्षया गुरुतया अनवच्छेदकत्वेऽपि नोक्तलक्षणवाक्यार्थाप्रसिद्धिः पर्याप्ति
कं तदवच्छिन्नत्वं च तद्विशिष्टसंबंधनिष्ठाभावीयप्रतियोगितानवच्छेदकत्वाभावकूटवदवच्छिन्नत्वं एतादृशावच्छिन्नत्वस्य संबंधप्रातिस्विकरूपेण तत्तत्

तादृशव्याप्यपिक ... उपपादनसंभवात्

शि·टी० तियोगिताव्यक्तीनां दुर्ज्ञेयत्वेपि न क्षतिः संबंधत्वांशस्य विशिष्टबुद्धावनपेक्षितत्वात्तदनुमितिं प्रति तत्साध्यावच्छिन्नप्रतियोगितावगाहित्वान्मेव कारणे
लाघवात् न तु साध्यसंबंधावच्छिन्नप्रतियोगितावगाहित्वेनेत्यनुमितेरुपधायकव्याप्तिशरीरे नादृश्येव प्रतियोगिता निवेश्यते· ननु शीलादिमत्वान्यघटादि
त्यादौ विशेषदर्शिनामनुमितेः प्रामाणिकत्वे निरुक्तयाविधाधिकावच्छिन्नत्वमेवानुमितेरुपधायकव्याप्तिघटकं नादृशगुरुधर्मावच्छिन्नसाध्यकानुमान
स्य केवलान्वयिसाध्यकसमशीलत्वादिनस्तु लघुरूपसंबंधरूपावच्छिन्नत्वमेव व्याप्तिशरीरे निवेशयंतीति समासः साध्यसामानाधिकरण्यानधिकरण
त्वलक्षणे यदि तदधिकरणवृत्तित्वरूपसामानाधिकरण्यं निवेश्यते तदा द्रव्यं सत्वादित्यादावतिव्याप्तिः सत्तायाद्रव्यत्वाधिकरणवृत्तितया नादृशा
सामानाधिकरण्यानधिकरणत्वात् तदनधिकरणवृत्तित्वस्य सामानाधिकरण्यपदार्थत्वे च नैतद्दोषः समानलक्षणभेदस्तस्यैतादृशव्यावर्त्तसाध्ये तत्र समा
नाधिकरण्यपक्षे तत्रासमानाधिकरणपरस्य तदनधिकरणाधिकरणत्वे द्रव्यं सत्वादित्यादावतिव्याप्तिः द्रव्यत्वादेः सत्ताघनधिकरणाधिकरण
त्वविरहेण समदे न सत्वादेरूपादानसंभवात् सत्ताया द्रव्यत्वादिसाध्यकव्याप्तिश्च सत्तादेर्द्रव्यत्वाद्यनधिकरणाधिकरणत्वात् तदनधिकरणानधि
करणत्वपक्षे न यानसंभव आचेष्टपदधिकरणानिधिकरणानधिकरणकं साध्यं तत्त्वानधिकरणत्वस्य व्याप्तित्वमायेविशिष्टैकार्थरूपतानुपपत्त्याविशि
ष्टपरामर्शस्यानुमितिहेतुता निर्वाहः यत्तत्त्वानुगमेन तत्त्वाधिकरणत्वाभावकूटस्य निवेशनीयतया गौरवं वेत्याशयेन यत्तत्त्वाघटितं साध्यसा ९५
मानाधिकरण्यपदार्थमाह साध्यनिष्ठेति साध्यनिष्ठपदसामानाधिकरण्यपदस्याधिकरणीभूतयत्किंचिद्व्यक्तिवृत्तित्वाभावः तत्प्रतियोगितत्वं तत्प्रतियोगि

नृंधृमा

कोटिनिविष्टाधिकरणकत्वं साध्यनिष्ठाभावीयाधेयत्वनिष्ठप्रतियोगितायानिरूपितत्वस्य संबंधेन परावच्छेदकं न वृत्तित्वमिति यावत वह्निमाँदित्यादौ साध्य
निष्ठाभावो द्रव्याधेयभावत्वरीय प्रतियोगितायाः संयुक्तसंबंधेनावच्छेदको द्रव्यादिसत्त्ववृत्तिता· धिकरणत्वं धूमादाविति लक्षणसमन्वयः अत्र साध्यनिष्ठाभा
वप्रतियोग्याधेयत्वं साध्यतावच्छेदकसंबंधावच्छिन्नं ग्राह्यं अन्यथा वह्निमान् धूमादित्यादौ पर्वतादिसमवेताद्यभावमादाय अनुपपत्तेः तथा च सत्तावान् स
मवायित्वादित्यादौ साध्यनिष्ठाभावीयसमवेतत्वनिष्ठप्रतियोगितावच्छेदकाधिकरणीभूतसंयुक्तव्याप्तिर्वह्निमान् धूमादित्यादावपि धूमादावपि गोलकीय
वह्न्यादिनिष्ठपर्वतादिवृत्तित्वाभावप्रतियोगिताकपर्वतादिवृत्तिताद्व्याप्तिः साध्यतावच्छेदकव्यापकीभूततद्भावनिवेशे गौरवमित्याशयेन फलिता
र्थमाह साध्यनिष्ठाधेयतेति अत्र निरूपकत्वमिह साध्यनिष्ठाधेयतावच्छेदकेन यात्स्येनैव वह्निमान् धूमादित्यादौ महानसादेः पर्वतीयवह्निनिष्ठाधेयता
निरूपकत्वेपि नाव्याप्तिः एवं साध्यतावच्छेदकसंबंधावच्छिन्नत्वेनाधेयतानिवेशनीयात्तेनाप्यसात्मात्मत्वमहाकालान्यतरत्वादित्यादौ कालस्य
कालिकसंबंधावच्छिन्नान्यत्वादिनिष्ठाधेयतानिरूपकत्वेपि नातिव्याप्तिः नादृशाधेयतानिरूपके तत्राधिकरणत्वमविवक्षितेन तन्निरूपकत्वमा
त्रं निविष्टं प्रथमतो द्रव्यं सत्वादित्यादावतिव्याप्तेराशंकितत्वात्साभिसारि सामान्यतो नाव्याप्तिमुद्धरति साध्यवद्भिन्नस्येति व्यभिचारनिरू
पकाधिकरणस्येत्यर्थः अत्राधिकरणवृत्तित्वं हेतुतावच्छेदकसंबंधेन ग्राह्यं अन्यथा वह्निमान् धूमादित्यादौ वह्न्यादिनिष्ठाधेयतानिरूपकत्वाद्वयवा
दौ धूमादेः समवायेन वृत्तेरव्याप्यापत्तेः इत्थं च सत्तावान् द्रव्यत्वादित्यादौ अव्याप्तिः साध्यनिष्ठाधेयतानिरूपकाधिकरणसामान्यादौ हेतुतावच्छेदकसंबं

१०

शि०टी० धात्मकसमवायादिनाहेतोरप्रसिद्धेः एवं द्रव्यं विशिष्टसत्वादिमाराववपि विशिष्टसत्वादेः सत्वाद्यनतिरिक्ततया साध्यनिष्ठाधेयतानिरूपकाधिकरणगुणा दिहेतित्वानधिकरणत्वासंभवाद्व्याप्तिरिति निष्कृष्टार्थमाह साध्यनिष्ठेति अत्रापि पूर्वदोषवारणाय साध्यतावच्छेदकसंबंधावच्छिन्नत्वेनाधेयत्वं निवेश नीयं एवमधिकरणत्वमप्यविवक्षितं तेनाहशाधेयतानिरूपकत्वव्यापकतेगाभावे निवेशनीया नादृशाधेयत्वनिरूपकहेतित्वमात्रनिवेशे धूमवान्वह्नेरि त्यादौ वह्न्यधिकरणत्वसामान्याभावस्य धूमनिष्ठाधेयतानिरूपकद्रव्यादिहेतित्वादतिव्याप्तिरतो व्यापकतानिवेशः व्यापकत्वं च तद्वन्निष्ठान्योन्याभाव प्रतियोगितानवच्छेदकत्वं न तु तद्वन्निष्ठात्यन्ताभावाप्रतियोगित्वं सर्वस्यैव तथाविधहेतित्वावच्छिन्नाभावप्रतियोगितया तदप्रसिद्धेः ~~तन्निष्ठान्योन्याभावप्रतियोगि तानवच्छेदकत्वं न तु तद्वन्निष्ठात्यन्ताभावाप्रतियोगित्वं सर्वस्यैव तथाविधहेतित्वावच्छिन्नाभावप्रतियोगितया तदप्रसि~~ नवा तद्वन्निष्ठान्योन्याभावप्रतियोगितानवच्छेदक धर्मवत्त्वं ताहशाभावप्रतियोगितानवच्छेदकीभूताभावत्वादिकमादाय वह्न्यधिकरणत्वसामान्याभावस्यापि धूमानधिकरणत्वव्यापकतया अतिव्याप्त्या पत्तेः अनवच्छेदकत्वं वावच्छेदकतापर्याप्त्यनधिकरणत्वं अन्यथा वह्नेरभावादायत्तेदोषः अथ वा यदधिकरणतासामान्याभावत्वं साध्यनिष्ठाधेयतानिरूप कहेत्वंतताभावप्रतियोगितानवच्छेदकं तत्वमेवमत्तरार्थः अनोभावत्वादिनाव्यापकतामादाय न दोषः अधिकरणतावच्छेदकतावच्छेदकसंबंधावच्छिन्ना या त्यानेन वह्निमान्धूमादित्यादौ वह्न्यनधिकरणधूमावयवादौ धूमाधिकरणत्वसामान्याभावासत्वेपि न क्षतिः धूमवान्वह्नेरित्यादौ पर्वतादिवृत्त्यधिकरण त्वाभावस्य धूमानधिकरणत्वव्याप्यस्याधिकरणत्वाभावरूपतयाप्तद्घटकाधिकरणत्वांशे परिमितस्साध्यासामानाधिकरण्यभावसाध्यवैयधिकरण्याभावनिवे

[illegible] पा अतिव्याप्ति वारणाय सामान्यपदं तथा च तादृशाधेयतानिरूपकत्वव्यापकाभावप्रतियोगितावच्छेदकं यद्रूपावच्छिन्नाधिकरणता तद्रूपावच्छिन्नाधिकरणतात्वावच्छिन्ना
भावघटनाहशाधेयतानिरूपकत्वव्यापकतावच्छेदके नद्रूपत्वमिति फलितार्थः तेन धूमानधिकरणत्वव्यापकेपि नेवद्यधिकरणत्वे धूमाधिकरणतोत्वसामान्याभावप्रतियोगित
ावच्छेदके धिकरणत्वसामान्यानिष्ठत्वेपि नातिव्याप्तिः यद्धिकरणतामात्रनिवेशे विशिष्टसत्वादिमादाय व्याप्तिः द्रव्यत्वानधिकरणगुणादिहेतुवधिकरणतावावच्छिन्नाधिकरणतात्व
व्यापकताशरीरे अतो यद्रूपावच्छिन्नेति हेत्वभावस्य व्यापकतानिवेशे हेतुतावच्छेदकसंबंधेन हेतिष्ठत्वे निवेशनीयतया सिद्धसत्वाद्विदशायां सत्वादिमादाय व्याप्तिः साध्यनिष्ठाधेयतानिरूपकाधिकरणेहेतु

शि० टी० अधिकरण

तावच्छेदकसंबंधेन हेतोरप्रसिद्धेस्तादृशाधिकरणत्वाभावस्य व्यापकताघटितत्वमेव तत्र लक्षणं तु न तथा वाधिकरणतायां विशेषणताविशेषणानुमिति तयाऽतेन संबंधेन निष्ठत्वे निवेशे च न दोषः पूर्वोक्तरूपस्य
पीत्यादि नेनति नरोषइति साध्यादौ हेत्वभावच्छेदकसंबंधेन हेतुरप्रसिद्धत्वात्तथा च यादृश्यधिकरणमाया द्वेष सिद्धाया अभावस्य साध्यानधिकरणत्वव्यापक इति निवेशः साध्यवत्पदम्
नेतु
यत्र पानरूप्यमतस्य व्याप्यत्वं साध्यानधिकरण निष्ठत्वेन निरूपितत्वेन हेतोरनुवादात् असंगतं असामानाधिकरण्यपदस्यैव भिन्नत्वेनाधिकरणतोपपत्तिघटितत्वेन तादृशलक्षणघटकाधिकरण
घटितत्वादनुवादत्वाधिकरणतया द्वयमात्रस्य निवेशस्तादृशलक्षणसंगमयति यस्माधिकरणतांशस्य नि अनतिप्रयोजकतयेति अनधिकरणत्वस्य

शेनैवोपपत्तेरिति भावः असामानाधिकरण्यघटितत्वाभावस्यादं रस्यासामानाधिकरण्यघटिताभावघटितत्वेनेव पथ्यमिसमतिप्रयोजनकतयेत्युक्तं तद
साध्या पहायवस्तोधिकरणत्वांशपरित्यज्य हेतुसामानाधिकरण्याद्यभावसाध्यवैयधिकरण्याभावरूपनिष्कृष्टलक्षणार्थरूपं साध्यानधिकरणानधिकरणत्व
[illegible] त्वमित्येव सत्त्वात् तदन्यत्वादित्याद्यव्याप्तिवारणाय विवक्षितस्य प्रथमलक्षणनिष्कृष्टार्थस्य कथं विरोधिप्रतिपादनासंभवात् तदनुवादकतानु
पपत्तेरित्यथाक्रतार्थानुवादपरतया संगमयितुं अनुवादे गौरवलक्षणार्थस्य पाहसाध्येत्यादीनि लक्षणद्वयस्य क्रमेणोक्तिः तत्राभावस्य तेन प्रथ
मलक्षणार्थकथनं एवं च साध्याधिकरणानधिकरणशब्देन साध्यपरधिकरणानधिकरणकं तन्न बोध्यते तदुक्तास्य प्रथमेन तत्त्वसाध्यपदोत्तरसप्त
विशक्त्यातदभावः यस्यापतरवितिप्रथमलक्षणार्थबोधकत्वं साध्यानधिकरणानधिकरणत्वमित्यस्यानवसाध्याधिकरणानधिकरणत्वपरेनञ्पदसमा
य सेनत्वे च न तरयोभावो नञा प्रसोपितं शक्येन तथा च साध्यपदोत्तरं नञो निपातनेः संभवी समस्यमानपदस्य वेनिपतिते सैव नञः साधुत्वात् अन्यथाः विग्रहादित्या
स दौ विग्रहादिपदोत्तरमपि नञ्निपातापत्तेरिति वा अयं संबंधिकार्थबोधको वापरघटितसमुदायेन समं नञ्समासस्य च लेनञोपप्रयनिवेशस्यापि साधुत्वं संपाद
कत्वात् अन्यथा घटानधिकरणत्वं साध्याभाववद्वृत्तित्वमित्यादौ घटाधिकरणत्वाभावसाध्याभाववद्वृत्तित्वाभावस्य पानुपपत्तेर्न हि नञ्नानधिकरण
त्वपदानां घटादिपदैः समासेनाहशार्थप्रतीतिरूपपद्यते अनधिकरणत्वपदादितन्यप्रतीतिविशेष्यीभूताभावेन समं घटादिसंसर्गाभावात् समस्यमा
नपदस्य निपाद्यमावच्छेदककोटिनिविष्टेनापरपदार्थान्वयेनानुपपत्तेस्तस्य निषेधाग्रहस्यादि समासापत्तेः एवं नञान्वयितावच्छेदकावच्छिन्नाभावस्य

स्या

शि॰टी॰ वबोधनात् अधिकरणसामान्यभेदवानेवानधिकरणपदार्थः स्यात् समवायेत्याद्यनधिकरणपदयोः सामयिकसमासंभवाच्चेति साध्यनिष्ठाधेयतानि
रूपकाधिकरणभिन्नत्वाभावरूपः प्रथमलक्षणस्य निष्कृष्टपर्याप्तार्थोपि साध्यानधिकरणानधिकरणत्वमिति शब्देन प्रतिपाद्यते । तथाहि आधेयता
निरूपकार्थकवत्साधिकरणपदघटितेनाधिकरणानधिकरणपदेन अधिकरणमनधिकरणं आधेयतानिरूपकं यस्येति व्युत्पत्त्या अधिकरणनिष्ठभेद साध्यस्य
प्रतियोगितावच्छेदकनिरूपकताकाधेयतावत्त्वेनान्यपदार्थो बोध्यते बहुव्रीहौ विग्रहवाक्याद्यादृशविशेषणविशेष्यभावापन्नस्य बोधः तद्विपरीतविशे
षणविशेष्यभावापन्नस्य समासात् चित्रगोर्यस्येति विग्रहवाक्यादन्यपदार्थसंबन्धित्वेन चित्रगोः चित्रगुरिति समासात् चित्रगोष्ठ संबन्धप्रतियोगित्वेनान्यपदार्थस्य बो न
धात् प्रकृतस्थलेपि च विग्रहवाक्यात् अन्यपदार्थनिष्ठाधेयतानिरूपकतावच्छिन्नभेदवत्त्वेनाधिकरणप्रतीतेः एवं च साध्यं यस्याधिकरणानधिकरणं यदधिक
रणनिष्ठभेदप्रतियोगितावच्छेदकीभूतनिरूपकताकाधेयतावदिति समासात् साध्यनिष्ठाधेयत्वनिरूपकत्वावच्छिन्नभेदवदधिकरणत्वं साध्याधिकरणान वृत्ति
मेय धिकरणशब्देन प्रत्याय्यते तदभावः साध्यपरोक्षसत्त्वघटितलक्षणार्थ इति द्वितीयलक्षणार्थमाह साध्यवत्त्वेनेति तथा च साध्यानधिकरणमधिकरणं आधेयता
त्वे निरूपकं यस्येति व्युत्पत्त्या साध्यानधिकरणाधिकरणशब्देन साध्यानधिकरणवृत्तित्वं प्रत्याय्यते तदभावो द्वितीयलक्षणार्थ इत्यर्थः उत्पादकतेति भा
वः शरणसंबन्धेनेति तत्रैव निषेध्यव्याप्तेस्तत्र वासितानामूले केवलान्वयिनि वह्निमान् धूमादित्यादौ व्याप्तेः तत्कथनात् प्रथमलक्षणे केवलान्वयिसाध्यकमिति हेतु एव॰
शरपतिसाध्यमात्रेतिनाः प्रसिद्धं तेन साध्यनिष्ठाधेयतानिरूपकसामान्यभेदनिवेशासंभवेपि ममप्रसिद्धिः इति हितापत्तिः चित्रिरूपकभेदनिवेशे च तादृशभे
त्वे४

दवधिकरणहेतोरिव व्याप्तिर्वाच्या वक्ष्यमाणक्रमेण नानाव्यक्तिसाध्यकहेतौ तादृशाव्याप्तिमत्त्वात् धूममात्रे तत्कथनं मूलकृतां स्वतनासंपादकमतो धूमरूपस्य
उपलक्षणतामभिप्रायेण पात्रमर्दने व्याचष्टे नानाव्यक्तिकेति अत्र च पर्यासंभवमव्याप्तिर्वाच्या तेन तद्व्यक्तिपावत् धर्मवान् एतत्वादित्यादौ वक्ष्यमाणरीत्याः व्या
प्तिविरहेपि न क्षतिः अत एवाग्रे नानाधिकरणके सर्वत्रेति वक्ष्यति पदानां नानाव्यक्तिसाध्यकेत्यस्य मिथो अधिकरणपृथक्त्वनिरूपितसाध्यतावच्छेदकस्यार्थः अत्र
अव्याप्तिरित्यस्य पूर्वोक्तसाहित्येनेति शेषः तेन अनयोरव्याप्तिश्च पत्तिं विना साध्यनिष्ठाधेयत्वनिरूपकत्वावच्छिन्नभेदनिवेशाभिप्रायेण साध्यनिष्ठाधेयतानि
रूपकसामान्यभेदनिवेशे च केवलान्वयिन्यव्याप्तिरिति परिशिष्टं कविटितिं पृथिवीत्वविशिष्टद्रव्यत्ववत् द्रव्यत्वादित्यादिस्थलीयतात्पर्यानियान्तिविशिष्ट
द्रव्यत्वस्य हेतावनेकत्वात् पृथिव्यादेः साध्यनिष्ठाधेयतानिरूपकत्वासंभवादिति भावः आधेयतायां साध्यतावच्छेदकावच्छिन्नत्वनिवेशेन दोषः अ
धिकरणतानिरूपकतावच्छेदकस्याधेयतावच्छेदकतया पृथिवीनिष्ठाधिकरणतानिरूपकतानवच्छेदकपृथिवीत्वविशिष्टद्रव्यत्वत्वादेः पृथिवीनिरू
पिताधेयतानवच्छेदकत्वात् इत्यभिप्रायं द्वितीयलक्षणे साध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदनिवेशे धूमादेरव्याप्तिरतस्तत्र केवलान्वयिसाध्यकाव्याप्ति कले
रेवपत्तिं विना साध्यवद्व्यक्तिभेदनिवेशे च उभयस्थलेपि व्याप्तिरिति मूलाभिप्रायं स्फुटयति द्वितीये च स्यादिना साध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदः साध्य
वेपधिकरणेपि विवक्षितः साध्यवेपधिकरणपदघटकतयापि वह्निरित्यर्थः केवलान्वयिनि केवलान्वयिन्येव नानाधिकरणकेति एकव्यक्तिसाध्यके स
तावानद्रव्यत्वादित्यादावेकैकसाध्यवतो भेदस्य अप्रसिद्धेः साध्यवतिमत्त्वात् अव्याप्तेर्नानाव्यक्तिकसाध्यकेपि एतद्व्यक्तिधर्मवान् एतत्वादित्यादावव्याप्तिसंभ

व्या

शि०टी० वाच्चानामक्लिकेतितिनोक्तं तथा वह्नितीयलक्षणाभिप्रायेणाधूम इति मूलं नानाधिकरणे साध्यसामान्योपलक्षणमिति भावः साध्यासामानाधिकरण्यानधि-
करणत्वमित्यत्र साध्यासामानाधिकरण्यपदेन साध्याधिकरणवृत्तित्वाभावविवक्षणेपि द्रव्यत्वसत्तादिमादाय वतिव्याप्तिर्न संभवति सामानाधिकरण्य-
स्याव्याप्यवृत्तितया सत्तादावपि गुणाद्यवच्छेदेन द्रव्यत्वादिसामानाधिकरण्याभावसत्वात् किं तु वह्निमान् धूमादित्यादावव्याप्तिः स्वावयवाद्यवच्छे-
देन धूमादावपि वह्न्यादिसामानाधिकरण्याभावसत्वात् साध्यपि हेतुतावच्छेदकसंबंधेन यद्धेतुमत्त्वावच्छिन्नत्वेनाभावविशेष्यतया यत्तु शक्यते
इत्यभिप्रायेण तत्परं तादृशाभावपरतया वर्णयतः सार्वभौमस्य मतमुपन्यस्यति केचित्विति हेत्वधिकरणे इति सप्तम्यर्थो भावान्वयि स्ववच्छिन्नत्वं
तेनैव संबंधेनेति तत्तृतीयार्थोपि वृत्त्यवच्छिन्नत्वं वृत्तिपरस्य संबंधार्थकत्वे तु अभेद एवतदर्थः अनधिकरणत्वपदस्याधिकरणत्वाभावो भावमात्रं वा
पद्यार्थः स्यात्तदा अव्याप्यवृत्त्यधिकरणतायामव्याप्यवृत्तितया सत्तादौ द्रव्यावच्छेदेन साध्यसामानाधिकरण्याभावाधिकरणत्वाभावस्य सामानाधिकर-
व्या० णयरूपतया तद्भावस्य चाकृतत्वादति व्याप्तिस्तु द्रव्यस्थैव तदनधिकरणपदमधिकरणभेदपरं यथाकरोति तदधीतिपद्यप्यधिकरणभेदेना भा-
वभेदाभावात् संयोगादिना धूमाद्यधिकरणपर्वताद्यवच्छिन्नो यः संबंधांतरेण तद्भिन्नरूपादिनिष्ठवह्न्यादिमत्संयुक्तत्वाद्यभावः तस्यैव स्वावयवावच्छे-
न धूमादौ वर्त्तमानतया धूमादेस्तादृशाभावानधिकरणत्वं दुर्घटं तथापि तादृशहेत्वधिकरणावच्छिन्नत्वविशिष्टाभावाधिकरणत्वस्य विवक्षणीयतया न व्या०
दोषः रूपपर्वतेन वह्निमत्संयुक्तत्वमितिवत् धूमेपर्वतेन वह्निमत्संयुक्तत्वमिति प्रतीत्यनुदयात् पर्वतावच्छिन्नत्वविशिष्टनिरूपितायावह्निमत्संयुक्तत्वा-

भावीयवैलक्षण्याधिकरणतायां रूपादावेवोपगमात् अभावाधिकरणतायामेवावाधिकरणविशेषावच्छिन्नत्वं निवेशनीयं तावतापि धूमरूपयोरभिन्नत्वस्याप्यभा-
वस्य परस्पराननुवच्छेदकावच्छिन्नाधिकरणताभेदे नकथितदोषनिराकरणसंभवात् उभयपक्षहेतुतावच्छेदकसंबंधप्रवेशप्रयोजनं क्रमेण दर्शयति तेनेति स्वावय-
वसंयोगेनाहत्यावपीत्यन्वयः तथा च स्वावयवावच्छेदेन साध्यवत्संयुक्तत्वासत्वेन तदभावस्याकृततया प्रथमतो हेतुतावच्छेदकसंबंधानिवेशे स्वावयवरूपस्या-
धिकरणावच्छिन्नसाध्यवत्संयुक्तत्वाभावानधिकरणत्वविरहेण संयोगेन धूमहेतौ कस्यापि साध्यस्याव्याप्तिरित्याशय इति भावः यद्यपि तादृशसंबंधनिवेशेपि
वह्निमत्संयुक्तत्वादेः कालिकाव्याप्यवृत्तितया धूमादावुत्पत्तिकालावच्छेदेन वह्निमत्संयुक्तत्वाभाववृत्तेः पर्वतादेरपि कालोपाधितया तादृशाभावावच्छेदकत्वा-
दव्याप्तिरेव स्यात्तथापीदानीमिति प्रतीतिनियामकतत्कालस्यावच्छेदकत्वादिहेतिप्रतीतिनियामकदेशनिष्ठावच्छेदकतायावैलक्षण्यं तुरीयलक्षणस्य
रभावानुपर्वते धूमेनवह्निमत्संयुक्तत्वमिति प्रत्ययाभावः हेतुमन्निष्ठतादृशावच्छेदकतानिरूपकत्वमेव निवेश्यमतो न दोषः नत्वकालोपाधेरवच्छेदकतायाम-
वच्छेद्याधिकरणेनावच्छेदकस्य कालिकः संबंधोऽवच्छेदकतानियामकः इत्यवतादृशसंबंधेनानवच्छिन्नत्वमेव देशस्यावच्छेदकतायां वैलक्षण्यम् अभ्युपगन्तु-
वक्तव्यत्वात् तथा च अभिधानिकालिकादिसंबंधेन हेतौ वर्त्तमानसाध्यसामानाधिकरण्याभावेप्यभिवानिरूपकाधिकरणीयावच्छेदकतायां कालिकसंबं-
धानवच्छिन्नत्वविरहादतिव्याप्तिरिति वाच्यं कालिकाव्याप्यवृत्तावपि कालिकसंबंधघटितात्मत्वाकाशत्वादिसामानाधिकरण्ये दैशिकसंबंधेनात्मत्वाद्यन-
धिकरणकालस्य देशविधयैवावच्छेदकत्वात् कालिकसंबंधानवच्छिन्नत्वात्तस्यैव वैलक्षण्यस्य देशविधयावच्छेदकतायां स्वीकरणीयत्वात् हेत्वधिकरण इत्यत्र हे-
त्वत्रकाले तादृशसाध्यसामानाधिकरण्यस्य सर्वदा सत्वेऽकदापि तदभावाऽसंभवे ऽपि किं चित्कालानवच्छिन्नत्वरूपव्याप्यवृत्तित्वं विवक्षितमिति भावः

पा त्वधिकरणानवच्छिन्नत्वप्रज्ञान नत्वादिसंबंध

शि·टी० तुपदं त्वधिकरणभिन्नत्वानुयोगितत्वहेतुपदं च नो धूमाद्यंतरसंयुक्तत्वावयवावच्छेदेन धूमादेस्तादृशाभाववत्त्वेपि न क्षतिः एवं च व्याप्तेः प्रतिधूमादिकं भिन्नत्वे
पि केनापि रूपेणानुगमानां नानासाध्यमत्वादिकमवच्छेदकं त्वथवा हेतुपदं हेतुतावच्छेदकावच्छिन्नपरमेव हेतुतावच्छेदकसंबंधेन स्वानुयोगिनो यदधिकरणं त
दनवच्छिन्नापाश्वधिकरणतानिरूपितत्वेन साध्यसामानाधिकरण्याभावाधिकरणतापा विशेषणीयत्वान्नोक्तदोषः न वानुगमः एवं च कालोपाधिविधया
हेत्वधिकरणस्य देशस्यावच्छेदकत्वेनोक्तदोषस्य हेतुतावच्छेदकसंबंधावच्छिन्नावच्छेदकत्वनिवेशेनापि वारणसंभवः पर्वतरूपादौ हेतुतावच्छेदकसंसंबंधा
वच्छिन्नपर्वतादिनिष्ठावच्छेदकताकसाध्यसामानाधिकरण्याभाववत्त्वाप्रसिद्धावपि रूपादिनिष्ठनिरुक्ताधिकरणतायां धूमादिप्रसिद्धनिरुक्ताधिकरणता
नां भेदस्याकृततया तद्द्रव्यत्वेन धूमादेर्लक्षणसमन्वयात् वह्निमन्निवेनितथाचनेनैवसंबंधेनेत्यनुक्तौ किं वित्संबंधेनेत्युक्तौ पर्वताद्यवच्छिन्नवह्निमत्सं
युक्तत्ववत्त्वमपि नरवच्छिन्नवह्निमत्समवेतत्वाभाववत्त्वात् धूमस्य वह्निव्याप्यत्वेनोपपद्यत इति भावः साध्यवत्संबंधसामान्याभावनिवेशे वह्निमत्समवेतत्वाभाव
स्य लक्षणघटकत्वेपि हेत्वधिकरणविशेषावच्छिन्नसाध्यवत्संबंधसामान्याभावस्याप्रसिद्ध्या संभवो बोध्यः साध्यवत्संबंधस्य हेतुमति संबंधासंभवात् ५
वच्छेद्याधिकरणसंबंधिनश्चावच्छेदकतया तन्निष्ठाभावे हेतुमतोः नवच्छेदकताऽननुकूलिरिति नाव्याप्तिर्नासंभवश्चेत्यर्थः साध्यवत्त्वासाध्यतावच्छेदकसं
बंधेन बोध्यात्तेन समवायेन वह्निसाध्यसंयोगेन हेतौ धूमे पर्वताद्यवच्छिन्नवह्निमद्वृत्तित्वसामान्याभावस्यासत्त्वेपि नाव्याप्तिः न वा सद्धेतावतिव्याप्तिः राम०
प· वित्संबंधेन साध्यवान् सद्वृत्तित्वाभावस्य स्वाधिकरणावच्छेदेन सत्त्वेपि दोषः साध्यवत्त्वं च उपलक्षणविधया भावप्रतियोगितावच्छेदककोटौ निवेशनीयं न तु

विशेषणविधया तेनोक्तनिरूपणावच्छिन्नघटादौ गंधाद्यसत्त्वान्नादृशघटाद्यवच्छेदेन पृथिवीत्वादौ गंधादिविशिष्टवृत्तित्वाभावसत्त्वेपि गंधवान् पृथिवीत्वा
दित्यादौ मूलावच्छिन्नवृक्षादौ कपिसंयोगाद्यसत्त्वान्नादृशवृक्षाद्यवच्छेदेन एतद्वृक्षत्वादौ कपिसंयोगादिविशिष्टवृत्तित्वाभावसत्त्वेपि कपिसंयोगी एतद्वृक्ष
त्वादित्यादौ वाव्याप्तिः न च तत्कालदेशावच्छिन्नतत्तदधिकरणावच्छेदेनापि तत्तद्धेतौ तादृशसाध्योपलक्षितधर्मिवृत्तित्वसत्त्वात् न चैवमपि धूमादौ
पर्वतहृदान्यतरावच्छेदकोपादेशः कालो वा तदवच्छिन्नपर्वताद्यवच्छेदेन वह्न्यादिमद्वृत्तित्वाभावस्य धूमादौ सत्त्वात् स्यादिति दुर्वारैवेति वाच्यं तत्तद्देशकालावच्छिन्नप
र्वतादेर्धूमाद्यसंबंधितया धूमादावभावकूटत्वापि नादृशस्यानवच्छेदकत्वात् तन्नैवमुक्तनिरूपणविशिष्टपर्वते धूमस्य न वह्निमत्संयुक्तत्वमित्यादिप्रतीत्यनुपप
त्तेः द्रव्यत्वे गुणेन पृथिवीत्वसामानाधिकरण्यमित्यादिवदुक्तप्रतीतेः सामानाधिकरण्यावच्छेदकत्वाभावावलंबनतान् संभवति विशेष्यस्यावच्छेदकत्वे विशिष्ट
स्यानवच्छेदकत्वासंभवादिति वाच्यं तादृशप्रतीतीनां सामानाधिकरण्ये विशिष्टपर्वतावच्छेद्यत्वाभावावगाहित्वेनैवोपपत्तेः उक्तनिरूपणपर्वते धूमस्य न वह्निमत्सं
युक्तत्वमित्यादौ पर्वतावच्छिन्ने यद्धूमस्य वह्निमत्संयुक्तत्वं तस्योक्तनिरूपणानवच्छेदकत्वमित्यर्थः संभवति धूमनिष्ठवह्निमत्संयुक्तत्वाभावे उक्तनिरूपणपर्व
तोभयावच्छिन्नत्वं तु नार्थः पर्वतस्य प्रतियोग्यवच्छेदकतया तदंतर्भावेण तद्योरभावावच्छेदकत्वस्यासंभवात् घटपटयोर्घटत्वाभावाधिकरणतावत् एतेनोक्तोभया
वच्छिन्नसाध्यसामानाधिकरण्येत्यावश्यकमपहेत्वधिकरणमात्रावच्छिन्नत्वप्रवेशनं कैश्चिदिदं तद्वाद्यमेव न घ्यानतिव्याप्त्यादिनिष्ठधूमसामानाधिकरण्याभाव
स्यापि स्वप्रयोगोलकत्वावयवोभयावच्छिन्नतया हेतुतावच्छेदकसंबंधेन हेतुमन्मात्रानवच्छेद्यतयाः सिद्धासिद्धसंगात्वविशिष्टपर्वतादेरवच्छेदकतामादायाप्रसिद्धा

शि॰दी॰ रणतायावच्छेदकांतराऽनवच्छिन्नहेत्वधिकरणावच्छिन्नत्वम् अभावे निवेशनीयं एवं च पर्वतादेः कालविधया धूमनिष्ठवह्निमत्संयुक्तत्वाद्यभावावच्छेदकत्वस्यापि महत्त्रिः
पर्वतादेः स्थूलकालतया वह्निमत्संयुक्तत्वादिहेतुप्रतियोगिनोऽप्यवच्छेदकत्वात् तन्निष्ठाभावावच्छेदकतायाश्चाविरोधापत्तेः कालावच्छिन्नत्वोपगमादिम्प्या
ऽः हेतुमत्संबद्धसाध्यसामानाधिकरण्याभावस्योक्तयुक्त्या हेत्वधिकरणावच्छिन्नत्वविरहात् हेतुतावच्छेदकसंबंधेन हेतुमत्त्वबंधे हेतुमदवच्छिन्नत्वादृशाभावप्र
सिद्धिमाह तादृशेति हेतुतावच्छेदकसंबंधेन साध्यवद्भिन्नत्वस्य तेन संबंधेन हेतुमदवच्छिन्नाभावस्यैवमर्थः न च तथाविधरूपादौ वह्निमत्संयुक्तत्वाभावो व्याप्यवृत्ति नवेतनादृशहेतुमती ४
रेवेति तत्राधिकरणविशेषस्यावच्छेदकत्वनिर्युक्तिकं प्रतियोगिमतमभावद्वत्त्वाच्च विरोधभञ्जनार्थमवच्छेदकभेदापेक्षणात् धूमवत्कपालादिसमवेतत्वएव वह्नि
मन्महानसादिसंयुक्तघटादौ महानसाद्यवच्छेदेन वह्निमत्संयुक्तत्ववति हेतुमत्कपालाद्यवच्छेदेन वह्निमत्संयुक्तत्वाभावसोऽप्यपि एतद्रूपवान् एतद्रसादिमा
दौ एतद्रूपादिमत्समवेतत्ववति हेत्वधिकरणावच्छेदेन प्रतियोगिमत्त्वात् तदवच्छेदेन साध्यसामानाधिकरण्याभावस्यासंभवात् एतद्रूपादिमति संबंधमात्रेण
वर्तमाने साध्यवत्समवेतत्वाभावस्य व्याप्यवृत्तितया हेत्वधिकरणावच्छिन्नत्वनिरुक्ताभावाप्रसिद्धेः ईदृशरूपादिनिवाच्यपर्वतेद्रूपेन वह्निमत्संयुक्तत्वमिति च नीति
आ वलेनाप्यहेतौ अपि सामानाधिकरण्याभावस्याधिकरणविशेषावच्छिन्नत्वोपगमात् पर्वते व्याप्यहेतौ अभावस्याधिकरणविशेषावच्छिन्नत्वानुपगमे हेतुतावच्छे
दकसंबंधावच्छिन्नसाध्यवद्भिन्नत्वाभावाधिकरणतासामान्ये हेत्वनुयोगिकत्वहेत्वधिकरणावच्छिन्नत्वोभयाभावो विवक्षणीयः तथाच धूमादिनिष्ठसा एम॰
वच्छेदकाद्यवच्छिन्नतदधिकरणतायां हेतुतावच्छेदकसंबंधेन हेतुमदवच्छिन्नत्वस्य रूपादिनिष्ठवह्निसंयुक्तत्वाद्यभावाधिकरणतायां घटादिनिष्ठधूमवत्कपाला

धूमवान् वह्नेरित्यादौ अतिव्याप्तिवारणाय सामान्याभावे २ वह्निमान्द्रिस्त्र्यादावतिव्याप्तिवारणायउभयपदं २

द्यवच्छिन्नतदधिकरणतायां हेत्वनुयोगिकत्वस्याभावेनोभयाभावसत्त्वात् न लक्षणासंभव इति तत्र व्याप्यहेतावच्छेदकानुपगमे पृथिवीरूपादिमदादावतिव्याप्ति
ः पृथिवीत्वादिघटितव्याप्तिलीपरूपादिनिष्ठसाध्यसामानाधिकरण्याभावस्य व्याप्यवृत्तितया तदधिकरणतासामान्ये निरुक्तोभयाभावस्योक्तत्वात् हेत्वधिक
रणावच्छिन्नत्वस्यानेः वह्निमत्त्वे हेत्वधिकरणानवच्छिन्नत्वोभयाभावस्यैव निवेशनीयत्वात् न दोषः तलरूपादिनिष्ठपृथिवीसमवेतत्वाभावाधिकरणता
याम् अवच्छिन्नत्वविरहेणोभयाभावसत्त्वात् एवं च तावत्वेनकृशिनाप्रसिद्धेरपि निवारितत्वात् नादृशोभयाभाववदधिकरणतावद्व्यत्वमेव निवेशनीयं न तूक्ताधिकर
णतासामान्ये हेत्वनुयोगित्वानादृशोभयाभाववत्त्वोभयाभावः प्रयोजनाभावाद्धोऽदिनिवेदैवमपि वक्ष्यमाणापत्तेः कालिकादिसंबंधेन हेतावव्याप्तेः गगनादिवीरेवेति
तत्र कालिकसंबंधेनाहेतौ गगनादावेववर्तिनोभयाभाववत्साध्यसामानाधिकरण्याभावाधिकरणतायाः प्रसिद्धेः अव्याप्तेश्च सर्वत्र नादृशाभावप्रसिद्ध्या स
बंधानेवत्रमानयत्सानुधावनविरोधश्च न स्यात् व्याप्यहेतोरप्यवच्छेदकमेवग्रथकारानुमतमिति हे रूपसत्वादिमदादावाशंकितामतिव्याप्तिमुद्धरति न च
भिवादितिलब्धेनित्यादृशेति हेतुतावच्छेदकसंबंधेन हेतुमतीत्यर्थः अवच्छेदकत्वं सत्वप्रयोजनाहमाभाववत्त्वेहेतुतावच्छेदकसंबंधेन साध्यवद्भिन्नत्वाभाववत्त्व
श्च प्रमाणाकांक्षायामाह सत्तायामिति ईदृशप्रतीत्या इत्यतसामानाधिकरण्यप्रमापणमपि सत्तायाम् अवच्छेदकगुणाद्यवच्छेदेन तदभाववत्तावगाहनादिति
कालेवर्तमानस्यनविवक्षणापप्रतियोगिसामानाधिकरण्यसंभवःतद्विशिष्टस्यहेतुतावच्छेदकसंयोगेनधूमाधिकरणस्याप्रसिद्धेः धूमाधिकरणपर्वतादेस्तत्समान

शि.दी० कालीनतयातत्रकालिकसंबंधेनापितद्वैशिष्ट्यासंभवादितिचात्मत्वसाध्यकपक्षेनानुधावनमफलंनचहेतुसनियामकसंयोगेनधूमसंबंधिपरमाणावेवत्वात्मक्रियावै
शिष्ट्यस्यप्रसिद्ध्यातत्रचात्मक्रियाभावरूपप्रतियोगिनोपिसत्वात्संभवेसेचविवक्षणीयप्रतियोगिसामानाधिकरण्यतादात्म्यसंबंधावच्छिन्नहेतुकस्थलानुरोधेन
हेत्वधिकरणावच्छेदेनेसत्रहेतुसंबंधित्वमात्रस्यैवविवक्षितत्वादितिवाच्यं यादृशपरमाणौकदापिधूमसंयोगोनासीत्तदीयचात्मक्रियात्मकाभाववैशिष्ट्यस्यहेतुसं
५ वंधित्वसत्वेनतमादायैवाव्याप्तिसंभवादितिचेन्नमहाकालस्यहेतुसनियामकसंयोगसंबंधेनहेतुसंबंधितयातत्रकालिकसंबंधेनचात्मक्रियात्मकाभाववैशिष्ट्य
स्यदैशिकाविशेषणतयातदभावस्यापिसत्वेनविवक्षणीयप्रतियोगिसामानाधिकरण्यसंभवात् [redacted] हेतुसनियामकसंयोगस्यापिसंयोगत्वेनहेतुतावच्छेदकसंबं
धत्वात्तच्चनथापिहेतुनियामकसंयोगेनधूमहेतुकस्थले व्याप्तिरूपस्यैवनिर्वाच्यत्वेनरूपेणसंबंधतायामानाभावात्कालस्यहेतुतयाकालेधूमसंयोगस्यका
लनिष्ठधूमाधेयत्वानियामकत्वेपिधूमस्यतेनसंबंधेनकालवृत्तित्वमस्त्येवेतस्यापिसुवचत्वात्वह्निमान्धूमादित्यादौसाध्याभावमादायनाव्याप्तिसंभवकिंतुच
मेक्रियाद्यात्मकमभावमादायैवेसव्याप्तेः स्फुटतरप्रतिपत्त्यर्थमात्मत्वादिसाध्यकस्थलानुधावनस्यसाम्यकत्वाच्चेतितत्त्वज्ञानवानात्ममहाकालान्यतरत्वा
दित्यादौहेतुसमानाधिकरणानांसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकयावदभावानामेवस्वविशिष्टहेत्वधिकरणमहाकालेकालिकसंबंधे
नप्रतियोगिसामानाधिकरण्यसत्वादतिव्याप्तिः नचतादात्म्येनज्ञानव्यापकस्यात्मनोऽभावएवनकालेप्रतियोगिसमानाधिकरणः आत्मनोऽवृत्तितयाकाले
कालिकसंबंधेनाप्यवृत्तेरितिवाच्यं आत्मनः कालावृत्तित्वेकालवृत्तित्वघटितकारणत्वाद्यनुपपत्त्यातदुपगमस्यावश्यकत्वात्नित्यद्रव्याणांकालावृत्तित्वेपि राम०
महाकालभिन्नोद्रव्यत्वात्ईश्वरज्ञानभिन्नगुणत्वादित्यादावतिव्याप्तेर्वृत्तिमत्तामेवमहाकालभेदेश्वरज्ञानभेदव्यापकतयातदभावानांयावतामेवमहाकालेश्व

रज्ञानादौकालिकविशेषणताविषयितासंबंधघटितप्रतियोगिसामानाधिकरण्यसत्वादित्यतआहस्वं ~~[illegible]~~
~~[illegible]~~ आह एवंदलान्तरेपीतिदलान्तरेप्रतियो
गिसामानाधिकरण्यघटकप्रतियोगिमत्त्वादलेसंबंधभेदनिबंधनोदोषः कालिकादिसंबंधमादायातिव्याप्तिरूपः संबंधैक्यविवक्षयाव्यापकताघटकसंबंधप्रतियोगि
मत्ताघटकसंबंधयोरैक्यविवक्षयातथावक्तव्यत्वात् आत्ममहाकालान्यतरत्वात्महाकालभिन्नोद्रव्यत्वादित्यादौसाध्यतावच्छेदकसंबंधावच्छिन्नसाध्यनिष्ठव्याप्यता
निरूपितव्यापकताघटकसमवायदैशिकविशेषणतासंबंधेनतत्तदभावमहाकालभेदाभावादिप्रतियोगिनांकालादावदृत्तेर्नातिव्याप्तिर्भावः अत्रचयेनयेनसं
वंधेनस्वप्रतियोगित्वावच्छिन्नस्यसाध्यतावच्छेदकावच्छिन्नव्यापकतातेनतेनसंबंधेनप्रतियोगिसामानाधिकरण्यमभावस्यविवक्षणीयम् अमयाऽर्द्दनिमत्ता
नप्रतिमन्वेमतिमविषयकत्वादित्यादौहेतुसमानाधिकरणेनिमत्तानत्वाद्यभावस्यप्रतियोगिनंसाध्यंप्रतिविषयितासंबंधेनापिव्यापकतयातेनसंबंधेनहेत्व
धिकरणेप्सत्वाकाशयोः प्रतियोगिसामानाधिकरण्येनातिव्याप्तिः येनयेनेत्युक्तौचतथाविधसमवायसंबंधेनतथात्वात्नातिव्याप्तिः अत्रचसाध्यतावच्छेदका
वच्छिन्ननिरूपितस्वप्रतियोगित्वावच्छिन्नव्यापकताघटकसंबंधत्वेनतादृशसंबंधस्यप्रतियोगिसामानाधिकरण्यशरीरेनसांकर्येणनिवेशनयासत्वभावेसा
ध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वविशेषणवैयर्थ्यात् नहितादृशविशेषणानुपादानेगोत्वाभावमादायासंभवः संभवतिगोत्वाद्यभा ५
वानामपिहेत्वधिकरणेसर्वकृतवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिनिष्ठव्यापकताघटकदैशिकविशेषणतासंबंधेनप्रतियोगिसामानाधिकरण्यसत्वात्धूमवान्
वह्नेरित्यादौधूमाद्यभावस्यायोगोलकेसर्वकृतादिवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोगिसामानाधिकरण्यपिपावत्व्यापकताघटकसंबंधान्तर्गतसंयोगादिनाप्रति

शि॰टी॰ योगिसामानाधिकरण्यविरहात् घटत्वाभाववान् मेयत्वादित्यादौ घटत्वाद्यात्मकाभावस्य तादृशप्रतियोगिसामानाधिकरण्येऽपि विशेष्यतासंबंधघटितसाध्यव्या
पकतावच्छेदकप्रतियोगिताकस्य घटाद्यवृत्तेर्घटत्वाभावादिप्रमायाः स्वात् तादृशसंबंधेनाभावस्य यावद्व्यापकताघटकसंबंधान्तर्गततादृशसंबंधेन घटे प्रतियोगिसा
मानाधिकरण्यविरहादतिव्याप्त्यनवकाशात् अपि तु साध्यतावच्छेदकावच्छिन्ननिरूपितपर्याप्तसंबंधघटितव्यापकतावच्छेदकप्रतियोगिताकाधेयभावात्वेन
त्वेन संबंधेन प्रतियोगिसमानाधिकरण्यं एवं क्रमेणोपनिवेशात् व्यापकतायाः एकदेशलक्षणोपनिवेश इति यत्तु साध्यतावच्छेदकसंबंधेन प्रतियोगिसामानाधिका
रण्यनिवेशात् ज्ञानवानात्ममहाकालान्यतरत्वादित्यादावतिव्याप्तिः इत्थं च व्यापकतापि साध्यतावच्छेदकसंबंधघटिता ग्राह्या अत एव वह्निमान् धूमादित्यादौ
घटत्वादिना घटवृत्तित्वविशिष्टद्रव्यत्वादिना वा द्रव्यत्वादेरभावस्य समवायादिसंबंधघटितसाध्यव्यापकतावच्छेदकप्रतियोगिताकस्य साध्यतावच्छेदकसंयो
गादिसंबंधेन प्रतियोगिसामानाधिकरण्यविरहेऽपि न क्षतिरिति तत्र तथा सति कालिकविशेषणतया महाकालान्यत्वविशिष्टघटादौ साध्ये कालत्वादिहेता
वतिव्याप्त्यापत्तेः तत्र महाकालान्यत्वविशिष्टघटाभावमहाकालान्यत्वाभावादीनां कालिकसंबंधेन महाकाले घटादिरूपप्रतियोगिसामानाधिकरण्य
इतिव्याप्त्यापत्तेः सत्त्वात् परं च महाकालान्यत्वविशिष्टोऽपि घटो महाकाले वर्तते अन्यथा सिद्धान्तलक्षणे महाकालो घटवान् कालपरिमाणादित्यादौ महाकालान्य
त्वविशिष्टघटाभावस्यैव प्रतियोगिव्यधिकरणस्य प्रसिद्धतया भयाभावघटितप्रतियोगिवैयधिकरण्यनिर्वचनायासस्य निष्प्रयोजनकतापत्तेरिति दृ
तविशिष्टसाध्यकस्थले कालत्वादिः सद्धेतुरेवेति मतेन तदपि घटत्वाभाववान् मेयत्वादित्यादौ इत्यादौ घटत्वाद्यात्मकाभावस्य साध्यतावच्छेदकदैशिकवि यम॰
शेषणतासंबंधेन किंचिद्विशिष्टत्वाभावात्मकप्रतियोगिसमानाधिकरणसत्त्वादतिव्याप्तिस्तन्मते दुर्वारैव क्वचित्तेन संबंधेन भावरूपप्रतियोगिसमानाधिकरण्यवि

न्नु

वक्षणीयतया नायं दोष इति वाच्यं तथा सति भावसाध्यकसद्धेतौ निरुक्तयावदभावान्तर्गतभावरूपसाध्याभावस्य भावरूपप्रतियोगिसमानाधिकरण्यासंभवादव्याप्तेः अ
भावपदस्य भावभिन्नाभावपरत्वेऽपि संयोगाभावसाध्यकस्थलेऽपि संयोगात्मकाभावमादाय घटत्वविशिष्टपदस्योत्तरकृत्यस्यासंगत्यापत्तेः एवं साध्यतावच्छेद
कसंबंधेन व्यापकत्वादिनिवेशे सर्वत्रैव स्वादिना धूमवान् वह्नेरित्यादौ वाच्यत्वाद्यभावमादायातिव्याप्तिप्रदर्शनस्यासंगत्यापत्तेश्चेति यत्तु विशेषणताविशेषेण व्याप
कतायां नैव च संबंधेन प्रतियोगिसामानाधिकरण्यं संबंधेन साध्यवत्त्वप्रकारकप्रमाविषयत्वाद्यभावमादाय केवलान्वयिलक्षणसंगमनमतिव्याप्तिवारणं चेति तदपि ज्ञाति
व्याप्त्यात्मत्वादिसाध्यकस्थले साध्याभावमादाय हेतुतावच्छेदकसंबंधव्याप्तिप्रदर्शनविरोधाच्चानुपादेयमेव केचित्तु प्रतियोगितावच्छेदकसंबंधेन प्रतियोगिसा
मानाधिकरण्यनिवेशात् न प्रागुक्तातिव्याप्तिः इत्थं च व्यापकतापि तेनैव संबंधेन वाच्या अतो वह्निमान् धूमादित्यादौ संयोगादिघटितसाध्यव्यापकतावच्छेदकप्रतियो
गिताकस्य समवायादिसंबंधावच्छिन्नप्रतियोगिताकवाच्याद्यभावस्य हेत्वधिकरणे समवायादिना प्रतियोगिसामानाधिकरण्यविरहेऽपि न क्षतिः नादृशाभावानां साध्यता
वच्छेदकसंबंधघटितसाध्यनिष्ठव्याप्यतानिरूपितस्वप्रतियोगितावच्छेदकसंबंधघटितव्यापकतावच्छेदकप्रतियोगिताकत्वाभावेन निरुक्तयावदभावान्तःपातित्वान
चैवं व्यधिकरणधर्मावच्छिन्नाभावस्य संबंधावच्छिन्नप्रतियोगिताकत्वे मानाभावेन तादृशाभावस्य लक्षणघटकतानुपपत्तिरिति वाच्यं संयोगेन घटत्वेन पटो नास्तीत्याद्यनु
भववलात् तादृशाभावप्रतियोगितायामपि संबंधस्यावच्छेदकत्वात् अनुभवानारोहे समानाधिकरणधर्मावच्छिन्नाभावप्रतियोगितायामपि संबंधस्यावच्छेदकत्वासिद्धेः अथ
बाधबुद्धिप्रतिबंधकतायाः संबंधविशेषनियन्त्रितत्वानुरोधेन समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्य संबंधावच्छिन्नप्रतियोगिताकत्वमावश्यकं
अन्यथा एकैकविधघटाद्यभाववतां तस्य संयोगसमवायादिरूप निखिलसंसर्गावगाहितत्प्रतिबंधकत्वप्रसंगात् न च संयोगादिसंबंधावच्छिन्नघटादिप्रकारकबुद्धिं

शि०

प्रतिवस्तुकगमासंयोगादिसंबंधेनघटादिमत्ताविरोधीयोऽभावस्तज्ज्ञानत्वेनप्रतिबंधकत्वात्तोक्तातिप्रसंग इतिवाच्यं वास्तवतादृशाभावज्ञानत्वादिनाप्रतिबंधकत्वेघटाभा
वत्वादिनापदार्थोनावगाहितज्ञानस्यघटादिमत्ताज्ञानाविरोधित्वप्रसंगात्तस्मात्तत्संसर्गकविशिष्टबुद्धौतत्तत्संसर्गावच्छिन्नप्रतियोगिताकाभावत्वावगाहिज्ञान
त्वेनैवप्रतिबंधकतायाचकत्वमतयासमानाधिकरणधर्मावच्छिन्नप्रतियोगितायांसंबंधस्यावच्छेदकतासिद्धिरितिचेन्नर्हिघटत्वविशिष्टपटाद्यवगाहिज्ञानघटत्वादिनापदा
घभावज्ञानयोरपिप्रतिबध्यप्रतिबंधकभावसत्वात्तादृशप्रतिबध्यप्रतिबंधकभावस्यसंबंधविशेषनियंत्रितत्वात्तद्रोधेनव्यधिकरणधर्मावच्छिन्नप्रतियोगितायाअपिसंबं
धावच्छिन्नत्वावश्यकत्वात्व्यधिकरणधर्मावच्छिन्नाभाव[redacted]ज्ञानस्याप्रतिबंधकत्वेबाधग्रंथेउपनीतकांचनमयत्वादिनावह्न्याद्यनुमितिविरोधित्स्याकांचनमयत्वावच्छि
न्नप्रयोगिताकवह्न्याभावस्यहेत्वाभासत्वोक्तेरसंगत्यापत्तेरित्यलमप्रस्तुतविचारेणेतिवदंति तदपिनसाधीयः निखिलाभावस्यकिंचिद्विशिष्टस्वाभावनिष्ठप्रतियोगि
तावच्छेदकीभूततद्देशिकविशेषणतासंबंधेनतादृशप्रतियोगिसामानाधिकरण्यसत्वेव्यभिचारेणव्याप्तेः भावत्प्रतियोगितावच्छेदकसंबंधेनप्रतियोगिसामाना
ष धिकरण्यनिवेशेचनिखिलव्यधिकरणधर्मावच्छिन्नाभावानामेवमृतेनिखिलसंबंधानामेवैकैकत्वादृशाभावप्रतियोगितावच्छेदकतयाक्वचिदपिहेत्वधिकरणे
संयोगविषयित्वादिरूपसकलसंबंधेनप्रतियोगिनोः वृत्तेरसंभवात्पत्तेः प्रकारांतरात्तसणोर्वगौरवादिति स्वरूपाक्तव्यमनुपादायपसाध्यतावच्छेदकव्याप्यप्रतियोगि
ताकस्याभावस्यनिवेशेउपपत्त्यावच्छिन्नसाध्यकेव्यभिचारेणव्याप्तिरुक्तानद्रूपसामान्याभावादिसाध्यकेप्राचीनमतेविरुद्धेपृथिवीत्वादिहेतावित्यत्र किंवा
ऽनेनग्रंथेनसत्तिनत्रापिरूपाद्यात्मकाभावस्यध्वंसत्वप्रागभावादिरूपप्रतियोगिसामानाधिकरण्यसत्वेनातिव्याप्तिसंभवादिमाशंकापरिहाराय तत्स्वस्वमताभिप्रा १४०
येणलक्षणत्वमेवाह रूपादीति यथोक्तलक्षणेऽतिव्याप्तिशंकयानुनेतदंग्रंथावतारः तत्रपृथिव्यन्यत्वाद्यभावस्यापिपावदंतर्गततया तस्य पृथिव्यांप्रतियोगिसामानाधि

करण्यसंभवेनातिव्याप्त्यनवकाशात यत्तु उत्पत्तिकालावच्छेदेनरूपसामान्याभावस्यपृथिव्यांमपिसत्वेनतत्पृथिव्यन्यत्वाभावस्यरूपसामान्याभावव्यापकतावच्छेदकप्रतियो
गिताकत्वेनप्रसिद्धिसंभवादिकांप्राचीनमतावतरणायग्रंथेतत्स्वाभिमानितातदस्सज्ञानापथोक्तलक्षणेऽतिव्याप्तिशंकानिराकरोति रूपादीति सद्धेतुरेवेति यादृशाभा
पृथिव्यन्यत्वाभावस्यलक्षणघटकत्वोपपत्तिस्तादृशीसाध्यवतिहेतुसत्ताया अव्याप्यकतयासद्धेतावेवसर्थइतिव्याख्यानं तदनुपादेयमेव तादृशाशंकितुः
पृथिव्यांरूपसामान्याभावसत्वे विप्रतिपत्त्या वेवातिव्याप्तिशंकासंभवेनाद्येपृथिव्यांरूपसामान्याभावव्यवस्थापनोपयोगिकोक्तानुत्पन्नातसंगत्यापत्तेः प्रलये मु का
हाप्रलये परमाणूनांनित्यतयातत्रोत्पत्तिकालावच्छेदेनरूपसामान्याभावासंभव इतिभावः यद्यपिपाकादुपनाशोत्पत्तिकालेपूर्वरूपात्मकप्रतिबंधकसत्वेनरूपो
[illegible]तानुत्पादेन इदानीमपिपरमाणौरूपसामान्याभावसंभवः तथाप्यविनश्यदवस्थस्यरूपस्यरूपप्रतिबंधकत्वेपूर्वरूपना
शोत्पत्तिक्षणएवपाकजरूपोत्पत्तिसंभवइत्यभिप्राये णप्रलयपर्यंतानुधावनं उत्पत्तिकालइति स्वावयविद्व्यस्यजन्यतयाप्रलयेऽसत्वात्तदवच्छेदेनतत्राभावा
संभवइतिभावः तत्सत्वात्तद्रूपादिसामान्याभावसत्वात नतुसामान्यधर्मावच्छिन्नप्रतियोगिताकाभावस्यात्यंताभावात्मकतयाध्वंसप्रागभाववत्सुतत्क्षिकालाव
च्छिन्नावयविनिरूपध्वंसवत्तिमलयावच्छिन्नपरमाणौकथंरूपसामान्याभावसंभवः ध्वंसप्रागभावयोरत्यंताभावविरोधित्वादिसाशंकानिरस्यतिनत्वेति प्रतियो
गिवदिति यथाप्रतियोगिनंएककालावच्छिन्नैकदेशावृत्तित्वंरूपस्यात्यंताभावविरोधितानथात्वध्वंसप्रागभावयोरपिस्वात्यंताभावविरोधित्वेतितेनेत्यर्थः
मानाभावादिति नतुरूपध्वंसप्रागभावावच्छिन्नाधिकरणेनदत्यंताभावस्यहत्तौप्रमाणाभावः घटादुत्पत्तिक्षणेतन्नष्टितीयक्षणेचतत्सत्वासंभवेनतद्
त्तित्वेनरूपात्यंताभावप्रत्यक्षस्यनुनरासंभवोतद्वितीयादिक्षणावच्छेदेनरूपस्येवतस्य सत्तादभावीयविशेषणतायाअसत्त्वेनतज्ज्ञीयक्षणोऽदावपितादृशाप्र

शि॰टी॰ सत्त्वासंभवात् अनुभवे विप्रतिपन्नस्य प्रत्यक्षप्रमाणमुद्राव्यनिरसितुमशक्यत्वात्त्व अनुमानं चाप्रयोजकमिति ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वं मर्यादायातमित्य
तत्राह अतएवेति ध्वंसप्रागभावयोरत्यन्ताभावाविरोधित्वादेव अनयोश्च रूपाभावे पूर्वापरदशायां रक्तेऽमध्ये श्यामदशायामर्थः रक्तं रूपं नास्तीति प्रत्यय इति ध्वंसप्रागभाव
योरत्यन्ताभावविरोधित्वेन पूर्वरक्तध्वंसभाविरक्तप्रागभावयोः सत्त्वेनासंभवाभावावगाहिन्याः प्रमात्मकतादृशप्रतीतेरुपपत्तेरिति भावः एवं रक्तं रूपं नास्तीति प्र
त्ययः ध्वंसादीत्यादिना प्रागभावपरिग्रहः पूर्वापरेति यत्र पाकादेव घटादौ रक्तरूपनाशानन्तरं रूपान्तरमुत्पन्नं तन्नाशानन्तरं च रक्तान्तरं न तत्राशान्तरोत्पन्नरूपान्तरना
शानन्तरं रक्तोत्पत्तेस्तेन तत्र मध्यदशायां रक्तं रूपं नास्तीति प्रतीत्यापत्तेरित्यर्थः एतेन भवन्मते रक्तत्वावच्छिन्नप्रतियोगिताकात्यन्ताभाववत्तादशायामेव ध्वंसप्राग
भावावेतादृशप्रतीतिविषयौ अनयो रक्तसमानकालीनौ पूर्वापररक्तध्वंसप्रागभावौ च न तथाविधाविति नातिप्रसंग इति निरस्तं तादृशध्वंसप्रागभावयोरेव रूपा
तदृशायां तादृशप्रतीतिनियामकतया तयोरपि तथात्वस्वीकारस्यावश्यकत्वात् तत्र मध्यरक्तध्वंसप्रागभावयोस्तथात्वस्वीकारे पूर्वापररक्तदशायां तादृशप्र
त्ययापत्तेः अथ रक्तत्वावच्छिन्नप्रतियोगिताकत्वेन ध्वंसादिरेव तादृशप्रतीतिविषयः इत्थं च रक्तरूपदशायां लौकिकप्रत्यक्षात्मकतादृशप्रत्ययस्यापाद्यत्वे अनु
५४ मित्यात्मको वा आद्ये रक्तरूपप्रत्यक्षसामग्र्या रक्तत्वावच्छिन्नप्रतियोगिताकत्वेन तदभावप्रत्यक्षप्रतिबन्धकत्वान्नापत्तिः अन्यथा रूपान्तरकालावच्छेदेन तद्देशे रक्तत्वा
वच्छिन्नात्यन्ताभावस्यैव तदानीं धर्मिणि घटितसंनिकर्षानन्तर्हिततया प्रत्यक्षापत्तेः विशेष्यघटितसंनिकर्षत्वेन संनिकर्षस्याहेतुत्वात् रक्तरूपग्रहप्रतिबन्धकदोषा
दिसत्त्वेन तादृशप्रत्यक्षस्येष्टत्वात् नान्त्यः तद्रूपावच्छिन्नव्याप्यवत्तानादिसत्त्वे आनुमानिकतथाविधप्रत्ययस्येष्टत्वात् न च तादृशप्रत्ययस्य प्रमात्वापत्तिः भवन्मते राम॰
पि तथाविधात्यन्ताभावस्य प्रमाणत्वेनेष्टापत्तेः यदा च तत्र रक्तं रूपं तत्कालावगाहिन इदानीमत्र रक्तं रूपं नास्तीति प्रत्ययस्य प्रमात्वं पुनरशक्यापादनं तादृशप्रत्ययेन रक्त
तत्सत्तानादृशप्रत्ययस्य

स २

ठ २

त्वावच्छिन्नप्रतियोगिताकत्वेन तत्कालावच्छिन्नत्वावगाहनात् यदा च तत्र रक्तं रूपं न तत्कालावच्छेदेनैव ध्वंसप्रागभावयो रक्तत्वावच्छिन्नप्रतियोगिताकत्वस्वीकारेण तादृ
शविषयबाधात् धर्मोपलक्षिताभावांशे तत्कालावच्छिन्नत्वावगाहिप्रत्ययस्य प्रमात्वं पुनरिष्यत एव न च तद्धर्मिनिष्ठध्वंसादेस्तत्कालावच्छेदेन रक्तत्वावच्छिन्नप्रतियोगि
ताकत्वकल्पने किं वा तत्कालावच्छेदेन तत्र धर्मिण्येव रक्तत्वावच्छिन्नप्रतियोगिताकात्यन्ताभावकल्पने इत्यत्र विनिगमनाविरहात् ध्वंसाद्यधिकरणे अत्यन्ताभावसिद्धि
र्निष्प्रत्यूहैवेति वाच्यं ध्वंसप्रागभावाधिकरणेऽत्यन्ताभावाकल्पने ध्वंसादेरतिरिक्तात्यन्ताभावाकल्पनेन लाघवात् रक्तरूपात्यन्ताभावस्य तन्मते रक्तरूपध्वंसात्य
न्ताभावसमनियततया तस्यैव ध्वंसात्यन्ताभावत्वात् एवं तद्धर्मावच्छिन्नप्रतियोगिताकत्वस्याव्याप्यवृत्तित्वोपगमे विशेषाभावानामेकाधिकरणे विशेषावच्छेदेन
सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वसंभवात् अतिरिक्तसामान्याभावासिद्धिप्रसङ्गः एवमेकस्यैवाभावस्याधिकरणविशेषकालविशेषरूपवृत्तित्वावच्छेदेन घटत्व
पटत्वादिरूपनिखिलधर्मावच्छिन्नप्रतियोगिताकत्वसंभवेनाभावभेदविलोपप्रसङ्गः एवं रक्तानधिकरणकालावच्छेदेन रक्तध्वंसादेः रक्तत्वावच्छिन्नप्रतियोगिताक
त्वोपगमे तत्समानाधिकरणतत्समनियतध्वंसान्तरस्य तत्समानाधिकरणैकत्वादेरेव तादृशकालावच्छेदेन तत्कल्पने नव्यारोपविनिगमनाविरहप्रसङ्गश्चेति ध्वंस
प्रागभावाधिकरणेऽत्यन्ताभावकल्पनमेवमाप्य अथैतादृशयुक्त्या रक्तध्वंसादिमतीतरत्यन्ताभावसिद्धावपि रूपध्वंसादिमत्यां पृथिव्यां रूपत्वावच्छिन्नाभावो नि
र्युक्तिक एवेति चेत् रूपोत्पत्तिद्वितीयक्षणे पुनस्तदधिकरणे सामान्यसामग्रीबलाद्रूपान्तरोत्पत्तिवारणाय रूपप्रतिरूपत्वावच्छिन्नाभावस्य हेतुत्वं कल्प्यते एवं च उत्प
त्तिकाले पाकाद्रूपनाशोत्पत्तिक्षणे च रूपत्वावच्छिन्नाभावास्वीकारे तत्र रूपानुत्पादप्रसङ्गः रूपोत्पादानन्तरं रूपसामान्यस्य पुनरुत्पादः प्रागभावे हेतुतया दुर्वारः रूप
वत्यपि पाकजन्माविरूपप्रागभावसत्त्वात् न चैवमपि पृथिव्यां रूपात्यन्ताभावो नियुक्तिकः यत्कालावच्छेदेन तत्र रूपात्यन्ताभावोऽभवनाखीकियते तत्कालावच्छेदेन रूपप्राग

शि०दी० भावेद्रूपत्वावच्छिन्नप्रतियोगिताकत्वस्वीकारेणैवोपपत्तेरितिवाच्यं दृन्नोत्तरत्वात् इदंत्वविधेयकानुपपत्तेः कुमारिकालावच्छेदेनघटादौ रूपत्वावच्छिन्नाभावसि
द्धावपिप्रलयकालावच्छेदेनपरमाणौतत्त्वेमानाभावः एवंरूपप्रतिरूपत्वावच्छिन्नाभावहेतुत्वमेवनकल्प्यते स्पर्शोत्पत्त्यनुरोधेनावश्यकल्पनीयस्पर्शसा
मान्याभावस्यतद्धेतुतयैवद्रूपप्रतिरूपानुत्पत्तेः शक्यवारणत्वात्तेवायोस्पर्शोत्पत्त्यनंतरंस्पर्शोत्पत्तिवारणायस्पर्शप्रतिरूपाभावहेतुतायाश्चशक्यत्वात्स्पर्शा
६ भावहेतुतायाश्चावश्यकत्वात्तन्नचरूपेप्रतिस्पर्शाभावहेतुत्वेपत्रपाका पमत्वेस्पर्शनाशात्तत्रस्पर्शोत्पत्तिकालेरूपानुत्पत्तेस्तारप्रसंगइतिवाच्यं एकना
नीयस्यैवाग्निसंयोगस्यरूपरसगंधस्पर्शनाशकत्वयास्पर्शनाशकालेरूपनाशस्यावश्यकत्वादितिएवंध्वंसप्रागभावाधिकरणेसामयिकात्यंताभावानभ्यु
पगंतृमतेनात्दृशात्यंताभावोनतदनधिकरणेकल्प्यतेअन्यत्राधिकरणेनात्दृशाभावकल्पनामपेक्ष्यलाघवादेकैकेष्वतद्धर्मावच्छिन्नवद्देशेषुतद्धर्मावच्छिन्न
प्रतियोगिताकत्वकल्पनेनैवोपपत्तेरितिध्येयं तत्सामानाधिकरण्यं प्रतियोगिसामानाधिकरण्यस्वविशिष्टेति स्वप्रत्राभावेप्रतियोगिसामानाधिकरण्य
ग्राह्यमेव हेत्वधिकरणावच्छेदेनेति हेतुतावच्छेदकसंबंधेनयद्धेतुतावच्छेदकावच्छिन्नाधिकरणंतत्सामान्यांतर्भावेनेत्यर्थः तेनवह्न्याद्यभावस्यधूमावयवा
द्यवच्छेदेनद्रव्यविशिष्टसत्त्वादिमादौ द्रव्यत्वाद्यभावस्यगुणाद्यवच्छेदेनप्रतियोगिसामानाधिकरण्यविरहेपिनक्षतिः पर्वतादेःकालोपाधित्वानभ्युपगमे
धूमवत्वप्रकारकप्रमाविषयत्वाद्यभावस्यक्वचिदपिप्रतियोगिसामानाधिकरण्यस्योपपादयितुमशक्यतयाधूमवान्वह्नेरित्यादावतिव्याप्त्यप्रसक्तेर्दर्शि
तविवक्षायाःस्थूलार्थतप्रयोजनमाह तेनगोत्वेति तद्वानगवादिमति कालिकसंबंधेनगोत्वादिनागवादौ साध्येप्रलयांतर्भावेनाभिचारिणिगोत्वादि २म०
हेतौलक्षणाघटकानांगोत्वाद्यवच्छिन्नाभावानांगोत्वादिमतिएतत्कालेगवाद्यनधिकरणदेशावच्छेदेनमहाकालेचप्रलयावच्छेदेनवर्त्तमानतयाप्रतियोगि

सामानाधिकरण्यमक्षतमेवएवंदैशिकविशेषणताविशेषेणगवादिव्यापकप्रलयान्यत्वादेरभावोपितेनसंबंधेनप्रलयान्यत्वादिमतिमहाकालेकालिकसंबंधेन
वर्त्तमानतयाप्रतियोगिसमानाधिकरणएवप्रतियोगिसामानाधिकरण्यघटकीभूताभावहेतोसंबंधविशेषानिवेशादिमनिव्याप्तिःस्यात्तन्निरुक्तविवक्षणेवस्व
विशिष्टयावद्धेत्वधिकरणांतर्गतप्रलयांतर्भावेनतादृशाभावानांप्रतियोगिसामानाधिकरण्यंनत्वप्रतियोगिनोः हेतोरिति सप्तम्यर्थः गवादिव्यापकस्यवत्वस्य
त्वादेरभावस्याभावस्वरूपस्यध्वंसादिरूपस्यचेत्कालेनप्रतियोगिसामानाधिकरण्यंतत्रतस्याहतेरित्यतोमहाकालेवेत्युक्तंमहाकालेचकालिकसंबंधेनहेतोस्त
थात्वमक्षतमेवगोसाध्यकाह्वलेसाध्यव्यापकतावच्छेदकतत्त्वप्रलयान्यत्वविशिष्टत्वाद्यवच्छिन्नाभावमादायातिव्याप्तिवारणेनसंभवतीतिस्फुटीकरणायतत्तद्
यावच्छिन्नसाध्यकस्थलेप्यतिव्याप्तिमाह यत्रकालत्वमित्यादि अथैतादृशविवक्षापेक्षयालाघवात्प्रतियोगिसामानाधिकरण्यघटकाभावीयहेतौदैशिकवि
शेषणताविशेषसंबंधावच्छिन्नत्वमेवनिवेश्यतांनतथासतिदैशिक[redacted]विशेषणताविशेषसंबंधेनप्रलयान्यत्वादेरभावस्यप्रतियोगिसामानाधिकरण्यवि २६
रहेणातिव्याप्त्युद्धारसंभवात्तन्नचैवंवह्निमान्धूमादित्यादौकालिकसंबंधेनहेत्वधिकरणेहेतोरेवप्रलयत्वादिनाद्रव्यत्वादेरभावस्यदैशिकविशेषणतयाहेतु वृत्तित्वा
भावादव्याप्तिरितिवाच्यंहेतुसामानाधिकरण्यशरीरेपिअभावीयहेतौदैशिकविशेषणताविशेषसंबंधावच्छिन्नत्वस्यनिवेशनीयत्वात्तावतापिलाघवस्यानपायादिति
नचदैशिकविशेषणताविशेषेणप्रतियोगिसामानाधिकरण्यविवक्षणेपिद्रव्यस्थलेव्याप्तिव्याप्तिप्रसंगेलयान्यत्वाभावस्यप्रलयमात्रहेतोरभावमात्राधिक
रणकतयाप्रलयान्यकाधिकरणस्वरूपत्वात्तस्यप्रलयान्यत्वरूपप्रतियोग्यधिकरणपरमाण्वादौहेतोरितिवाच्यं एवमपिप्रलयान्यकालत्वप्रकारकप्रमाविशे
ष्यत्वादेरभावस्यप्रलयानितिरिक्तगगनादावपिवर्त्तमानस्यप्रलयानात्मकतयाप्रतियोगिसामानाधिकरण्यस्यदुरुपपादतयानिव्याप्यनचकाशात्मेवं दैशिकविशेष

शि·टी० णतया प्रतियोगिसामानाधिकरण्यनिवेशेपि दैशिकविशेषणतासंबंधेन प्रलयाद्वृत्तिसाध्यके कालत्वादिहेतावतिव्याप्तिर्दुर्वारैव तत्र प्रलयमात्रस्य व्यभिचाराधिक
रणतया साध्यतावच्छेदकसंबंधेन साध्यं प्रतिव्यापकतावच्छेदिकाया हेत्वभावप्रतियोगिताव्यापकताघटकसंबंधावच्छिन्नप्रतियोगिताकस्य तस्य प्रलयमात्रवृत्तित
याप्रलयात्मकत्वात्रिरुक्तरीत्यैव प्रतियोगिसमानाधिकरणत्वात् इतरसंबंधावच्छिन्नाभावस्य प्रलयानात्मकत्वेपि प्रलयात्मवृत्तितयाऽप्रसिद्धतया तामेव प्रतियोगिसमाना
धिकरणत्वादिति निरुक्तविवक्षणमावश्यकं एतद्दूषियेत्यैव प्रलयावृत्तिसाध्यकानुधावनं ग्रंथकृता इति वक्तव्यं प्रलयादिमात्रवृत्तेरभावस्य प्रलयाद्यनात्म
कत्वेपि दर्शितस्थलेषूक्तविवक्षामन्तरेणातिव्याप्तिवारणमशक्यं प्रलयान्यत्वादेरभावस्यापि स्वप्रतियोगिनिष्ठव्यापकताघटकस्वरूपविशेषसंबंधेन प्रल
यात्मकतानाध्वंसान्तर्गतयत्किंचिद्ध्वंसवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिनोऽधिकरणे ध्वंसान्तरे तस्य प्रतियोगिसमानाधिकरणत्वात् यत्किंचिद्ध्वं
सान्यत्वाभावस्य यत्किंचिद्ध्वंसमात्रवृत्तेस्तद्ध्वंसवृत्तित्वविशिष्टस्वाभावाधिकरणे ध्वंसान्तरे सत्वेपि कालिकसंबंधावच्छिन्नप्रतियोगिताकस्वाभा
वस्य स्वाधिकरणध्वंसावच्छेदेन स्वाधिकरणेपि सत्वेन तत्रैव तत्प्रतियोगिसमानाधिकरणत्वात् प्रलयान्यत्वविषयकत्वोपलक्षितप्रमाया विषयता
संबंधेन केवलान्वयितया तादृशसंबंधावच्छिन्नतादृशप्रमाभावाप्रसिद्धिः प्रलयान्यत्वविषयकत्वविशिष्टप्रमाभावस्य प्रलये प्रसिद्धावपि प्रलये प्रलय
तस्य विषयकप्रमारूपप्रतियोगिसमानाधिकरणत्वात् प्रलयाविषयकप्रमाभावस्य च जन्यप्रमामात्रप्रतियोगिकतया कालिकाव्याप्यवृत्तित्वेन प्र
तियोगिसमयपितत्क्षणकालावच्छेदेन वृत्तेस्तादृशाभावमादाय नातिव्याप्तिवारणसंभवात् उक्तविवक्षणे तु प्रलये प्रलयाविषयकप्रमाभावस्य विषयत ए५०
या प्रतियोगिसमानाधिकरण्यविरहादतिव्याप्तिवारणसंभवः एवमुक्तरीत्यास्यादृत्वाभाववानमेयत्वादिमादावप्यव्याप्तिर्बोध्या हेतुमतिप्रलयपर इति हे

तुमत्सामान्यान्तर्गतप्रलयान्तर्भावेनेत्यर्थः तत्समानाधिकरणाभावात्मकत्वादिरूपप्रतियोगिसामानाधिकरण्याभावात् अत्र गवादेरभावस्येत्यनुषज्यते हे
तुमतीत्यवैशिष्ट्यनिवेशनफलमाह स्वविशिष्टेति सांप्रदायिके ईश्वरसंयोगसामान्याभावानभ्युपगमात् सद्धेतुत्वार्थकपिसंयोगाभावप्रतियोगितात्वधाव
न सकलहेत्वधिकरणवृत्तित्वेपीति नित्यगुणादौ केनापि संबंधेन कपिसंयोगासत्वादिति भावः एतेन हेत्वधिकरणसामान्यान्तर्भावेन प्रतियोगिसमाना
धिकरण्येपीति नित्यगुणादौ केनापि संबंधेन कपिसंयोगासत्वादिति भावः एतेन नासीमिसर्विन नाव्याप्तिरिति नित्यगुणादेः स्वविशिष्टत्वाभावात् दंत

शि०दी० तियोगिसामानाधिकरणत्वात् गोत्वाद्यभावस्य तत्प्रतियोगित्वं च धूमाभावेन जलवृत्तित्वविशिष्टगोत्वाभावो नास्तीति प्रतीति नियामकस्याभावाधिकरणकाभा
वप्रतियोगिकाभावतयाधिकरणीभूतधूमाभावस्वरूपत्वात् जलवृत्तित्वविशिष्टस्यापि गोत्वाभावस्य शुद्धविशेष्यानतिरिक्तत्वादित्याशंक्य जलवृत्तित्वविशिष्टगो
त्वाभावाभावस्य धूमाभावानतिरिक्तधूमाभावस्वरूपत्वे प्रतिक्षिपति न लेत्यादिना नच धूमाभावस्य स्वप्रतियोगिनिष्ठव्यापकताघटकपावत्संबंधान्तर्गतसंयोग
संबंधेन प्रतियोगिसामानाधिकरण्यविरहात्कथमतिव्याप्त्याशंकेति वाच्यं जलवृत्तित्वविशिष्टगोत्वाभावत्वावच्छिन्नाभावस्याप्युक्तयुक्त्या धूमाभावस्वरूपतायां
भवात् संयोगसंबंधेन द्रव्यात्मकप्रतियोगिनैव सामानाधिकरण्यसत्वात् न चैवं जलवृत्तित्वस्यैव तत्प्रतियोगितस्यैव प्रतियोगितावच्छेदकत्वे वृत्तित्वे वैशिष्ट्याकां
तत्वात् तस्य च धूमाभावविशिष्टसकलवह्निमन्निष्ठत्वेन नाभावात्तान्निव्याप्तिः प्रसक्त्यनुपरिचयजलवृत्तित्ववैशिष्ट्यस्यान्तरत्वघटकीभूतभेदप्रतियोगिनि गोत्वाभा
वत्वावच्छिन्नएव विशेषणतत्वस्य नत्वावच्छिन्नविशेषणत्वस्यापि प्रतियोगितावच्छेदकमिति जलवृत्तित्वस्यापि तत्प्रतियोगित्वमित्युच्यते तदा तादृशाभावस्य वि
शिष्टाभावात्मकतया स्वसमानत्वरूपप्रतियोगितावच्छेदकविशिष्टगोत्वाभावाधिकरणे धूमाभावाधिकरणकत्वानुपपत्तिरिति वाच्यं जलवृत्तित्वस्य धूमाभावविशि
ष्टपादृशहेत्वधिकरणे नियमतो वह्नेतादृशव्यभिचाराहितस्थले धूमाभावात्मकनिरुक्तविशिष्टाभावप्रतियोगित्वस्य सामानाधिकरण्यमादायातिव्याप्तिमाश
ङ्क्य जलवृत्तीत्यादिग्रंथस्यावतारणीयत्वात् न च तादृशान्तराभावस्य धूमाभावस्वरूपताप्रतिक्षेपपरत्वे जलवृत्तित्वविशिष्टगोत्वाभावस्याभावइति ग्रंथासंगतिरेवेति
वाच्यं एतादृशग्रंथस्यापि गोत्वाभावप्रतियोगिकाभावत्वेन रूपेण जलवृत्तित्वविशिष्टतादृशान्तरत्वावच्छिन्नप्रतियोगिताकाभावपरत्वात् न चैवमप्ययोगो
लकभेदाद्यभावस्यायोगोलकत्वादिरूपभावात्मकस्य स्वनिष्ठजलवृत्तित्वविशिष्टगोत्वाभावाभावस्वरूपताविरहात् तस्य प्रतियोगिसामानाधिकरण्यपघटनेदस्य

निव्याप्त्यप्रसक्तिः साध्यतावच्छेदकसंबंधेन व्यापकतायां लक्षणघटकत्वे प्रागेव दूषितत्वात् नायोगोलकान्यत्वाद्यभावस्य लक्षणघटकत्वसंभवइति वाच्यं अयो
गोलकभेदाभावादेरपि पर्वतादित्वविशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यसंभवात् न चैवं धूमाभावस्य गोत्वाभावाद्यप्रतियोगिकत्वेपि पर्वतवृ
त्तित्वविशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यसत्वादतिव्याप्तितादवस्थ्यमिति वाच्यं तादृशप्रतियोगिनः स्वप्रतियोगिनिष्ठव्यापकताघटकप
त्संबंधान्तर्गतसंयोगादिना सामानाधिकरण्यविरहात् घटत्वाभाववान् पत्वादिसाध्यकपिघटत्वाभावादिप्रकारकप्रमायाश्चाभावस्य पावद्व्यापकताघटकसंबं
धान्तर्गतविशेष्यतासंबंधेन प्रतियोगिसामानाधिकरण्यविरहेण निव्याप्त्यनवकाशात् न चैवं जलवृत्तित्वविशिष्टगोत्वाभावत्वावच्छिन्नाभावस्य धूमाद्यभावस्व
रूपतया संयोगेन प्रतियोगिसामानाधिकरण्यसंभवे पि धूमवत्वादिप्रकारकप्रमाभावस्य पावद्व्यापकताघटकसंबंधान्तर्गतविशेष्यतासंबंधेन प्रतियोगिसा
मानाधिकरण्याभावाद्धूमवान्वह्नेरित्यादावतिव्याप्त्यप्रसक्त्या तादृशाभावस्य धूमाभावस्वरूपताप्रतिक्षेपोयुक्तइति वाच्यं तादृशाभावस्य तत्स्वरूपत्वे तुल्ययु
क्त्या धूमवत्वादिप्रकारकप्रमाभावनिष्ठस्य जलादिवृत्तित्वविशिष्टगोत्वाभावत्वमतत्प्रकारकप्रमान्यतराभावस्य तत्स्वरूपतया तत्प्रकारकप्रमायाश्चापि तत्प्र
तियोगित्वे न तयेव समं विशेष्यतासंबंधेन तादृशाभावस्य सामानाधिकरण्यसत्वादतिव्याप्तिप्रसक्तेरिति नन्वेवमपि धूमवान्वह्नेरित्यादावतिव्याप्तिर्दुर्वारैव धूमा
द्यभावस्य धूमात्वादिना प्रमेयसामान्याभावस्य प्रतियोगितत्वेन तदभिन्नत्वोपगमात् प्रमेयमात्रस्यैव तत्प्रतियोगितया परिचय धूमत्वादिना प्रमेयं नास्तीति प्रतीतेः
धूममात्रस्यैव प्रतियोगित्वग्रहः न च प्रमेयान्तरस्य तथा प्रतियोगिसामानाधिकरण्येपि वाच्यं न्यूनवृत्तिसमानाधिकरणधर्मानवच्छिन्नप्रतियोगिता
निवेशानीयायावत्प्रमेयनिष्ठप्रतियोगितावच्छेदकविधधूमत्वाद्यवच्छिन्नैव तादृशधर्मानवच्छिन्ना धूमादिमात्रवृत्तिप्रतियोगिनैव तदाश्रयसामानाधिकरण्यं
४ यद्यपि तादृशाभावस्य धूमाभावस्वरूपत्वेपि जलसंयोगि सिन्धुमत्वादिसाध्यके जलत्वात् सामानाधिकरण्येन जलादिवृत्तित्वविशिष्टगोत्वाभावत्वान्यतराभावस्य तत्स्वरूपत्वेन तस्य जलपदं
४ अतिव्याप्तिरसंभव तथापि प्रतीत्यानिप्रसंगेनाधिकरणधर्मावच्छिन्नजलत्वाद्यभावस्य वृत्तित्वेन रजि नादृशाभावानां स्वप्रतियोगिसामानाधिकरण्यविरहात् नातिव्याप्तिः

शि॰टी॰ वन्नायोगोलकाद्यंतर्भावेनेतिमन्तव्यं तेन धूमाभावस्य वह्निधर्मोभयत्वावच्छिन्नाभावसमनियततया तद्भिन्नत्वेन वह्नेरपि तदभावप्रतियोगितयाऽयोगोलका
न्यत्वाभावस्यायोगोलकान्यवृत्तित्वविशिष्टाकाशाभावाभावसमनियतत्वात् तद्भिन्नत्वेनाकाशाभावस्य तत्प्रतियोगितया धूमवत्त्वादिप्रकारकप्रमाभावस्य धू
मवद्विशेष्यकत्वविशिष्टद्रव्यत्वादिप्रकारकप्रमाभावसमनियततया द्रव्यत्वप्रकारकप्रमायाश्चापि तत्प्रतियोगित्वेन धूमपदार्थस्य स्वरूपत्वं तदुभयत्वावच्छिन्नाभा समवल
वसमनियतत्वेन तन्मात्रस्यैव प्रतियोगितया हेतुसमानाधिकरणानादृशाभावानां स्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेन दर्शितप्रतियोगिभिः सामानाधिक
रण्यमक्षतमेवेत्यतिव्याप्तिः अथ साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदिकायाः प्रतियोगितायास्तन्निरूपकाभावानां स्वविशिष्टयावद्धेत्वधिकरणावच्छेदे
न तत्तत्प्रतियोगितायाश्च सामानाधिकरण्यं विवक्षणीयमिति नातिव्याप्तिरिति चेत् तर्हि तादृशी या या प्रतियोगिता तत्तदाश्रयसामानाधिकरण्यपर्यवसानं यावद् अंगते
धिकरणान्तर्भावेन तत्त्वमित्येतावतैव सामञ्जस्ये अभावपाव[illegible]त्वस्य तत्तत्प्रतियोगितानिरूपकत्वस्य हेतुसामानाधिकरण्य[illegible]विशेषणस्य हेत्वधिकरणे च स्ववि
शिष्टत्वविशेषणस्य च वैयर्थ्यप्रसंगः एवं सर्वत्र हेतुसमानाधिकरणमुभयत्वाद्यवच्छिन्नप्रतियोगिताकसाध्याभावमादाय लक्षणासमन्वयसम्भवाद्धिकरणधर्मा
वच्छिन्नाभावस्याप्रामाणिकत्वेपि कुतो निवेशितेन तादृशव्याप्तिलक्षणशंकायां प्रतियोग्यवृत्तित्वेत्यादिनाऽतादृशाभावस्य न संगत्यापत्तिः एवं नलहृदत्वविशि
भया ष्टगोत्वाद्यभावस्य जलत्वाभावस्वरूपतावत् धूमाभावाधिकरणकधूमवद्वृत्तित्वविशिष्टगोत्वाभावद्रव्यान्यत्वाभावस्य धूमाभावस्वरूपतया व्यापकतावच्छेदकपा
वत्संबन्धेन तादृशाभावस्य हेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्यसत्त्वाद् धूमवान् वह्नेरित्यादावतिव्याप्तिश्च अयतो लक्षणान्तरमाह यत्समानाधिकर एम॰
णानामिति अत्रापि यत्तत्पदयोः पूर्ववद्धर्मावच्छिन्नपरतावोध्या वह्निमान् धूमादित्यादौ साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकधर्मावच्छिन्नप्रतियोगिताका

भावावह्नित्वादिना घटाद्यभावा एवमेषां स्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेन वह्नित्वादिरूपप्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणतया लक्षणसमन्वयः अ
त्रापि प्रतियोगिसमानाधिकरण्यनिवेशे उक्तक्रमेण धूमवान् वह्नेरित्यादावतिव्याप्तिरतः प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यनिवेशः तथा च धूमाद्यभा
वानां वह्निधर्मोभयत्वावच्छिन्नप्रतियोगिताऽप्यवध्यादिना सामानाधिकरण्यसत्त्वेपि प्रतियोगितावच्छेदकीभूततादृशोभयत्वाद्यवच्छिन्नसामानाधिकरण्याभावा
नातिव्याप्तिः एवं तादृशाभावाधिकरणकधूमवद्वृत्तित्वविशिष्टगोत्वाभावद्रव्यान्यत्वाभावस्य धूमाभावस्वरूपत्वेपि तादृशाभावप्रतियोगितावच्छेदकधूमवद्वृत्ति
त्वविशिष्टत्वावच्छिन्नेन समं तादृशाभावस्य स्वविशिष्टहेत्वधिकरणान्तर्भावेन प्रतियोगिसामानाधिकरण्यविरहान्नातिव्याप्तिः द्रव्यत्वेन धूमो नालीसादिप्रतीती ना
वद्रव्यत्वादेः प्रतियोगितावच्छेदकत्वं न भासते अपि तु धूमत्वादेरेव द्रव्यत्वादेस्तु तत्तद्व्यक्तिविशेषणतयैव धूमादेरुभासनं स्मृतपदेन तत्तादृशप्रतीति
विषयाभावस्य धूमाभावादिसमनियततया तत्प्रतियोगितावच्छेदकं द्रव्यत्वादिकमपि धूमाद्यभावप्रतियोगितावच्छेदकमिति प्रतियोगितावच्छेदकावच्छि
न्नसामानाधिकरण्ये विवक्षणेप्यतिव्याप्तेरुद्धीनेत्याशंकापानावकाशः एतेन धूमकालावच्छिन्नधूमवद्वृत्तित्वविशिष्टस्य वह्नित्वरूपेणयोः भावत्वस्य धू
६९ माभावसमनियततया वह्नित्वमपि धूमाभावप्रतियोगितावच्छेदकमित्ययातं वह्नित्वेन धूमवद्वृत्तित्वविशिष्टेनालीसादौ तादृशधूमवद्वृत्तित्वविशिष्टत्वस्यै
वप्रतियोगितावच्छेदकत्वावगाहनोपगमात् अन्यथा धूमवद्वृत्तिर्वह्निमति धूमन्नमेव वह्नित्वरूपप्रतियोगितावच्छेदकविशिष्टवह्निरूपप्रतियोगिसत्त्वेन ता
दृशप्रतीत्यनुदयप्रसंगात् अतएव च तादृशवशिष्टमहितस्यैव वह्नित्वस्य तथात्वेनावनापि न क्षतिः प्रतियोगितावच्छेदकपरस्य प्रतियोगितावच्छेदक
तापर्याप्त्यधिकरणपरत्वात् अन्यथैवमपि घटभिन्नत्वेन धूमघटान्यतरं नास्तीत्यनेकघटधूमान्यतरत्वमात्रस्य न प्रतियोगितावच्छेदकत्वभाने धूमसत्त्वेपि घटवति तादृशा

१ एवं द्रव्यत्वत्वेन द्रव्याभावगोलकाभविषयकज्ञानान्यताभावादनतिरिक्तवृत्त्ययोगोलकाविषयकज्ञानाभावस्य धूमस्येव प्रतियोगितावच्छेदकं एवं द्रव्यत्वभिन्नत्वे धूमत्वद्रव्यत्वान्यतराभावस्य

सि॰टी॰ प्रतीत्यनुपपत्तेः नापि घटभिन्नत्वसहितस्य तस्य गौरवान्न किंतु घटभिन्नत्वमात्रस्यैव एवं च तादृशाभावस्य धूमाभावसमनियतत्वात् धूमाभावस्यापि घटभिन्नत्वं प्रति
योगितावच्छेदकं एवं भेदत्वेनायोगोलकभेदघटान्यतराभावान्यतराभावस्यायोगोलकभेदत्वावच्छिन्नाभावसमनियततयाभेदत्वमप्ययोगोलकभेदाभावप्रतियोगिता
वच्छेदकं एवं द्रव्यत्वभिन्नत्वेन द्रव्यत्वधूमत्वान्यतराभावस्य धूमभेदसमनियततयाद्रव्यत्वभिन्नत्वमपि धूमभेदप्रतियोगितावच्छेदकं तादृशधर्मावच्छिन्नानां चायोगोल
कादावपि सत्त्वादतिव्याप्तिस्तदवस्थैवेति चेन्न हि प्रतियोगितावच्छेदकेत्यनेन प्रतियोगितापर्याप्त्यनवृत्तिभिन्नत्वं पदवच्छेदकं तदेव विवक्षणीयं यन्नवृत्तित्वं च स्वसमाना सत
धिकरणभेदप्रतियोगितावच्छेदकत्वे सति स्वसमानाधिकरणत्वं तद्भिन्नत्वं च व्यधिकरणधर्मसाधारणमपि घटधूमान्यतरादिनिष्ठप्रतियोगितापर्याप्त्यनवृत्तमेव
घटभिन्नत्वादिकं न च वह्नित्वेन प्रमेयं नालीत्यत्र प्रमेयसामान्यवृत्तित्वेन वह्नित्वावच्छिन्नप्रतियोगिताया अप्रतीयते वह्निर्नालीत्यत्रापि वह्निवृत्तितया सैव प्रतियोगिता
प्रतीयत इत्युपपन्ने एकधर्मावच्छिन्नविभिन्नप्रतियोगिताकल्पने गौरवात् तत्प्राचकालिकादिसंबंधेन हेतुसमानाधिकरणवह्नित्वावच्छिन्नत्वज्ञानाद्यभावीयप्रतियो
गिता तापर्याप्त्यनवृत्तिभिन्नावच्छेदकाप्रसिद्ध्याव्याप्तिरिति वाच्यं वह्नित्वेन प्रमेयं नास्तीति प्रतीतौ प्रमेयत्वविशेषितस्य वह्नेरेव प्रतियोगित्वभासनेनास्यैवानुपगमात्तादृ
शाभावप्रतियोगितायाः प्रमेयसामान्यवृत्तित्वस्यैवासिद्धेः अथवा प्रतियोगितावच्छेदकपदं प्रतियोगितापर्याप्त्यनतिरिक्तवृत्तित्वपरं स्वच्छेदकं तन्मते स्वानतिरिक्तवृत्तित्व
च स्वव्यापकत्वं तत्त्वान्यत्वं तत्सामानाधिकरण्योभयाभाववत्त्वं न्यूनवृत्तित्वं च अधिकरणेमपि घटधूमान्यतरादिनिष्ठप्रतियोगितापर्याप्त्यनतिरिक्तवृत्त्येव घटभिन्नत्वादिकं तादृशप्र
तियोगितापर्याप्त्यावच्छेदभिन्नादिसाधारणप्रमेयकं वह्नित्वाद्यवच्छिन्नप्रतियोगितायाः प्रमेयसामान्यवृत्तित्वेपि तदनतिरिक्तवृत्त्यवच्छेदकं वह्नित्वादिकमेव स्वव्यापकत्वं तत्का एप॰
न्यत्वस्याहेतोः प्रसिद्धत्वादिति नानुपपत्तिर्गघोपि स्वन्न् वह्निभिन्नायाः प्रतियोगितायाः पदवच्छेदकं तदवच्छिन्नसामानाधिकरण्यं पवि वह्नितं न्यूनवृत्तित्वं सामानाधिकर

धर्मैकधारण २ पा २

घटभिन्नत्वादिनामहानसीयवह्निघटान्यतराभावमादाय उक्ताव्याप्तिवारणाय उक्तप्रतियोगि घटून वच्छेदकविशेषणं व्यापकतायां निवेश्यं अतो न तादृशाभावानां लक्षणघटकत्वमिति २

णपघटितमिति व्यधिकरणधर्मपरिग्रहः तत्प्रतियोगितासमानाधिकरणं सत्त्वं प्रतियोगितानिरूपकाभाववद्वृत्तित्वावच्छेदकं यत्तदन्यत्वं प्रतियोगितावच्छेदकं वा नि
वेश्यं एतत्कृते साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकाभावनिवेशे वह्निमान् धूमादित्यादौ वह्नित्वादिना घटाभावसमनियतत्वेन घटत्वादि
नावच्छिन्नाद्यभावस्य हेतुव्यधिकरणावच्छेदेन वह्न्यादिरूपप्रतियोगिसामानाधिकरण्यसंभवेपि वह्निघटोभयत्वाद्यवच्छिन्नाभावस्यापि तथाविधत्वात्तस्य प्रतियोगि
तावच्छेदकावच्छिन्नसामानाधिकरण्याभावेनासंभवः स्यात् ते व्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वमुक्तं अत एव व्यधिकरणधर्मावच्छिन्नाभावानभ्युपग
मेहेतुसमानाधिकरणस्य साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नाभावस्याप्रसिद्ध्या संभवः अपमात्मात्वानात्मादौ केवलान्वयिसाध्यके
वाव्याप्तिर्भवतीत्यपि व्यापकतया प्रतियोग्यवृत्तित्वं स्यादित्यस्य संगतिः नेत्यपमोत्मात्वानात्मादौ सर्वव्रणवृत्तित्वविशिष्टात्मत्वत्वादेरात्मत्वादिव्यापकताव
च्छेदकतया तद्वच्छिन्नाभावस्यैवोक्तरूपावच्छेदेन हेतुसमानाधिकरणतयाऽहं वाच्यं तेष्वात्मादावपि एतत्कृणवृत्तित्वविशिष्टवाच्यत्वत्वादेर्विषयतासं गुणत्वानुज्ञानता
धेन जन्यज्ञानत्वविशिष्टविषयकजन्यज्ञाननिष्ठतया किंत्वादेः साध्यव्यापकतावच्छेदकतया तद्वच्छिन्नाभावस्यैव एतत्कृणावच्छेदेन पलपावच्छेदेन च हेतुसमा नापा
नाधिकरणतया व्यधिकरणधर्मावच्छिन्नाभावानभ्युपगमेपि तादृशाभावाप्रसिद्धिरिति वाच्यं प्रतियोगित्वेयधिकरणघटितव्यापकतायाः एवं निवेशनी
यतयानिरुक्तधर्मावच्छिन्नाभावानामपि साध्यवत्त्वेन तादृशधर्माणां व्यापकतावच्छेदकत्वासंभवात् न च साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभाव
एव किंतु निविष्टप्रमेयसाध्यकस्थले संयोगसमवायाद्यन्यतमस्वरूपव्यधिकरणसंबंधावच्छिन्नप्रमेयत्वादिनिष्ठप्रतियोगितावच्छेदकताकाभावमादाय लक्षणस
मन्वयसंभवादिति वाच्यं तथा सति लघुरूपसमनियतगुरुधर्मस्याभावप्रतियोगितावच्छेदकत्वेन तद्रूपावच्छिन्नसाध्यकेन तथाविधाभावाप्रसिद्ध्याः व्याप्त्यापत्तेः

नावच्छेदकावच्छिन्नप्रतियोगि ~

शि·टी० अत्र च ज्ञानवानात्ममहाकालान्यतरत्वादिमान् व्याप्तिवारणाय साध्यतावच्छेदकसंबंधेन व्यापकत्वं तेनैव संबंधेन प्रतियोगिसामानाधिकरण्यं विवक्षणीयं महाका
स्थले लान्यत्वविशिष्टघटादिसाध्यकै कालत्वादेरव्यभिचारित्वेऽपि तत्र हेतुसमानाधिकरणस्य महाकालान्यत्वविशिष्टघटाद्यभावस्य प्रतियोगितावच्छेदकविशिष्टसामाना
धिकरण्याभावेनाव्याप्त्यभावात् तादात्म्यसंबंधेन प्रमेयसाध्यकस्थले तादृशसंबंधेन साध्यं प्रति तादृशसंबंधेन व्यापकतायाम् अवच्छेदकीभूतोपि प्रमेयत्वादिरूपके
वलान्वयिधर्मस्तदवच्छिन्नस्य संयोगसमवायविषयितादिसंबंधावच्छिन्नाभावमादायैव लक्षणसमन्वयसंभवात् अभावप्रतियोगितायां साध्यतावच्छेदकसंबंधावच्छिन्न
त्वस्य प्रयोजनविरहेण निवेशानिवेशोपि अधिकरणसमवायित्वाद्यवच्छिन्नप्रतियोगितावच्छेदकताकप्रमेयत्वादिमद्भेदमादायापलक्षणसमन्वयसंभवात् समवा
यित्वपावाच्यत्व वेदे दोपि द्रष्टव्य इति मिश्रोक्ता नादृशभेदस्यापि सोऽन्तःसन्मतत्वात् इतिकेचित् न तस्मात् घटत्वा·भाववान् प्रमेयत्वादिसाध्यके सर्वोक्तदिशा तिव्याप्तेः स्वप्रति
योगितावच्छेदकावच्छिन्नव्यापकताघटकपावत्संबंधेन प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यनिवेशनमपि नसन् नव्यास्तीदं वाच्यत्वेपेत्वादिसाध्यको विष
यतासंयोगादिसंबंधावच्छिन्नप्रतियोगिताकाभावमादाय व्यधिकरणधर्मावच्छिन्नाभावानभ्युपगमेऽपि लक्षणसामंजस्यात् प्रतियोग्यवृत्तित्वमादिग्रंथासंगतेः एते
व न विषयतासंबंधेन व्यापकता तेनैव संबंधेन प्रतियोगिसामानाधिकरण्यं विवक्षणीयं साध्यत्वप्रकारकप्रमात्वाद्यवच्छिन्नाभावमादाय सर्वत्र लक्षणसंगमनम् अव्या
प्तिनिरासेऽपि निरुक्तेत्वेत्वादिना वाच्यत्वादीनाम् अभावः सुलभः इमे तादृशग्रंथासंगतेश्च ज्ञेयत्वस्य ज्ञानविषयतात्मकस्य विषयतासंबंधेनाव्यापकत्वात् किंतु
स्वप्रतियोगितावच्छेदकसंबंधेन व्यापकत्वं तेनैव प्रतियोगितावच्छेदकावच्छिन्नाभावसामानाधिकरण्यं विवक्षणीयं व्यभिचारिणि साध्याद्यभावस्य किंचिद्विशिष्टत्वा एम०
भावनिष्ठप्रतियोगितावच्छेदकविशेषणताविशेषणवतादृशाभाव तद्रूपप्रतियोगितावच्छेदकावच्छिन्नमानाधिकरण्ये [redacted]

संबंधेन २

वच्छेदकत्वस्तु प्रतियोगितावच्छेदकावच्छिन्ने भावत्वमनिवेश्य प्रतियोगितावच्छेदकः एतयाभावादिति तैमेव निवेशनीयं तादृशाभावविशिष्टत्वं वा अभावस्य भावरणामिति नचे

[redacted] पि तदवच्छिन्नभावसामानाधिकरण्यासंभवान्नातिव्याप्तिः किंचिद्विशिष्टस्य स्वस्य योः भावः सामानाधिकरण्यसंबंधेन नहि विशिष्टस्याभावस्य विशिष्ट स
त्वसमनियतोपि स्वस्मादिति क्रूरं एवं च अभावमात्रप्रतियोगिकाभावस्यैव तद्भावप्रतियोगिरूपतायाः सिद्धांतसिद्धत्वात् अतो धूमाद्यभावस्य घटादिहेतित्वविशिष्टधूमाद्यभा
वाभावविशिष्टत्वाद्यवच्छिन्नाभावसामानाधिकरण्येपि नक्षतिः यावदभावानामपि स्वत्राप्यभावपदं भाव भिन्नपरं अतः कालिकादिसंबंधेनहेतुसमानाधिकरण
स्य वह्न्यादिव्यापकतावच्छेदकद्रव्यत्वाभावत्वावच्छिन्नप्रतियोगिताकस्य द्रव्यत्वादेः स्वप्रतियोगितावच्छेदकावच्छिन्नभावसानाधिकरण्यासंभवेपि न क्षतिः एवं च तिक
पिसंयोगाभाववान् प्रमेयत्वादित्यादौ कपिसंयोगात्मकाभावस्य लक्षलक्षणघटकत्वेपि विवक्षणीयस्य विशिष्टस्य सार्थकता सर्वोक्तदिशा व्यवसेयानवभावभिन्ना
भावविक्षणेपि अप्रमात्मज्ञानादिसाध्यको दैशिकविशेषणतया हेतुसमानाधिकरणस्य साध्यव्यापकतावच्छेदकीभूतकालिकसंबंधावच्छिन्नप्रतियोगिता
काकाशाभावाभावत्वाद्यवच्छिन्नप्रतियोगिताकस्याकाशाभावादेः स्वप्रतियोगितावच्छेदकावच्छिन्नभावसानाधिकरण्यासंभवात् लक्षणसमन्वयासंभव इ
ति वाच्यं आकाशाभावीयतादृशाभावत्वस्य दैशिकविशेषणतया साध्यवद्वृत्तिकाभावस्य प्रतियोगितावच्छेदकतया साध्यव्यापकतावच्छेदकत्वविरहेण त
मूल दवच्छिन्नाभावस्य लक्षणघटकत्वात् अत्र स्व वा व्यापकतावच्छेदकं शएव भावे वृत्तित्वविशेषणं इदं वा व्यंतेपेत्वादिसाध्यको वमधिकरणसंबंधावच्छिन्नप्रतियो मात्र
गिताकवाच्यत्वाद्यभावस्य प्रतियोगितावच्छेदकं न प्रतियोगितावच्छेदकसंबंधघटितव्यापकतावच्छेदकमतस्तादृशाभावस्य न लक्षणघटकत्वमिति नोक्त
प्रतियोग्यवृत्तीत्यादिग्रंथासंगतिरिति न च प्रतियोगितावच्छेदकसंबंधेनव्यापकताविवक्षणेपि इदं वाच्यं ज्ञेयत्वादिसाध्यको विषयितासंबंधेन वाच्यत्वत्वादिमतो
ज्ञानादेः स्वरूपसंबंधेनाभावत्वस्य स्वप्रतियोगितावच्छेदकीभूतस्वरूपसंबंधघटितवाच्यत्वनिष्ठव्यापकतावच्छेदकवाच्यत्वत्वावच्छिन्नप्रतियोगिताकत

३५

दि॰टी॰ याहेतुसमानाधिकरणेनयास्वरूपसंबंधेनप्रतियोगितावच्छेदकावच्छिन्नवाच्यत्वादिसमानाधिकरणेनयाः[redacted]व्यधिकरणधर्मावच्छिन्नाभावानभ्युपगमेऽपितमादायके
वलकृणसामंजस्यमितिनादृशग्रंथासंगतिनादवस्थ्यमितिवाच्यंधूमवान्वह्नेरित्यादौसंयोगसंबंधावच्छिन्नप्रतियोगिताकधूमाद्यभावस्यकालिकसंबंधेनधूम
त्वादिविशिष्टवह्न्यादिनासंयोगेनसमवायसंबंधावच्छिन्नप्रतियोगिताकस्यायोगोलकात्वजातित्वाद्यवच्छिन्नाभावस्यकालिकसंबंधेनतादृशजातित्वादिवि
शिष्टयोगोलकाद्यरूपादिनासमंसमवायेनस्वरूपसंबंधावच्छिन्नप्रतियोगिताकस्यधूमवत्वप्रकारकप्रमाविषयत्वाद्यभावस्यकालिकसंबंधेनतादृशविषयत्वत्वा
विशेष दिविशिष्टसंयोगादिधूंसेनानुयोगितासंबंधेनतादृशविषयत्वत्वादिविशिष्टनादृशविषय॰त्वाद्यभावेनचसमंस्वरूपसंबंधेनविषयतासंबंधावच्छिन्नप्रतियोगि
ताकधूमवत्वप्रकारकप्रमाद्यभावस्यविषयितासंबंधेनकालिकसंबंधेनवातादृशप्रमात्वादिविशिष्टपरयोगोलकादिविषयकंतानेनेनसमंविषयतासंबंधेनस
मानाधिकरणप्रत्वादनिव्याप्तेवीरणायप्रतियोगितावच्छेदकतायतकसंबंधेनेवप्रतियोगितावच्छेदकवैशिष्ट्यस्यविवक्षणीयतयावह्निमान्धूमादित्यादौवि
स्व षयितासंबंधेनद्रव्यत्वत्वादिमतःसमवायादिसंबंधावच्छिन्नाभावस्यप्रतियोगितावच्छेदकसमवायादिसंबंधघटितदुरत्वादिनिष्ठव्यापकतायास्वरूपसंबंधे
नावच्छेदकीभूतयोद्रव्यत्वादिःतदवच्छिन्नप्रतियोगिताकस्यस्वप्रतियोगितावच्छेदकताघटकविषयितासंबंधेनप्रतियोगितावच्छेदकविशिष्टत्वादिस्यसमहेत्व
गिता धिकरणेप्रतियो॰वतावच्छेदकसमवायादिनासामानाधिकरण्येनसंभवतीनिव्यापकतावच्छेदकतायामपिस्वप्रतियोगितावच्छेदकताघटकसंबंधावच्छिन्नत्वस्या
वश्यंनिवेशनीयतयाद्रव्यत्वध्वंसेयत्वादित्यादौदर्शितभावनालक्षणघटकत्वादितिदिक्चानन्वयलक्षणेसमवायित्वादिनावाच्यत्वाद्यभावीयसमवायित्वादिरूपप्र १५०
तियोगितावच्छेदकस्यवाच्यत्वादिव्यापकतानवच्छेदकत्वान्वाच्यत्वादिसाध्यकस्थलेनतादृशाभावानांलक्षणघटकतानथाचतादृशाभावएवदुर्लभइत्यतआहदेयेत

रूप॰

वृत्ते

कृपिसंयोगत्वावच्छि०

शि॰टी॰ एतत्वादिमादौ कपिसंयोगाभाव वस्य द्रव्ये हेतुसमानाधिकरणतया गुणादौ च निरवच्छिन्नवृत्तिकतया तमादाया व्याप्तेर्वारणासंभवात् हेत्वधिकरणनिरूपितनिर
वच्छिन्नाधेयतावत्वं हेत्वधिकरणनिष्ठनिरवच्छिन्नाधिकरण[redacted]
गाकत्वं वा लक्षणघटकपदार्थः केचित्तु व्याप्यवृत्तेर्हेतुसमानाधिकरणसाध्याभावस्येति समुदा
यस्य हेत्वधिकरणे व्याप्यवृत्तिर्यः साध्याभावस्तस्येत्यर्थः हेत्वधिकरणे व्याप्यवृत्तित्वं च हेत्वधिकरणीभूतयत्किंचिद्व्यक्तिनिष्ठाभावप्रतियोगितायाः सा
मानाधिकरण्येनानवच्छेदकं यद्भावनिष्ठं तद्व्यक्तित्वं तत्वं न च विशिष्टसत्तावान् जातेरित्यादौ गुणादिनिष्ठसत्तादिरूपाभावप्रतियोगितया विशिष्टसत्वाद्य
भावस्य व्याप्यवृत्तित्वानुपपत्तिः यद्भावाभावत्वावच्छिन्नानधिकरणत्वं हेतुमत्तत्वविवक्षणे अधिकरणधर्मावच्छिन्नाभावस्यासंग्रहप्रसंगस्तद्भावाप्रसिद्धे
यथ्र तिवाच्यं किंचिद्धेत्वधिकरणवृत्तिनावच्छेदकानुयोगितानिरूपकतानवच्छेदकयद्भावत्वं तत्वस्य विवक्षितत्वात् गुणो गुणान्यत्वविशिष्टसत्ताभावोनास्ती
स समवायेन विशिष्टसत्ताभावत्वावच्छिन्ननिरूपितानुयोगिताविशिष्टापासत्तायाः गुणादिवृत्तित्वान् अनुपगमेन विशिष्टसत्ताद्यभावस्य व्याप्यवृत्तिताति
वीहादिसाहुः ननु संयोगिभिन्नं घटमपत्वादित्यत्रा निव्याप्तिः संयोगिभेदाभावस्य तद्वद्प्रतियोगितावच्छेदकीभूतसंयोगात्मकस्याव्याप्यवृत्तित्वेन लक्ष
णघटकत्वाद्यधिकरणधर्मावच्छिन्नाभावमादाय लक्षणगमनादितिचेन्न संयोगिभेदस्य व्याप्यवृत्तित्वेन तस्य द्रव्यत्वेन संयोगप्रकारकप्रमाविशेष्यत्वावच्छि
न्नभेदस्य पानियतया तद्भिन्नत्वेन तद्भेदप्रतियोगितावच्छेदकं द्रव्यत्वादिकमपि संयोगिभेदाभावः तस्य हेत्वधिकरणे व्याप्यवृत्तितया तन्निष्ठप्रतियोगितावच्छे र्यम०
दकत्वस्य साध्यतावच्छेदके सत्वेनातिव्याप्तिर्नावकाशान्तरं एवं द्रव्यत्वविशिष्टसत्ताभाववान् द्रव्यत्वादित्यादौ [redacted] व्याप्यवृत्तेः सत्तादिरूपाभावस्य प्रतियोगितावच्छे
व

सत्व

कं साध्यतावच्छेदकं भिन्नयात्मिक्पपिना शंकनीयं तत्रापि सत्वे पि द्रव्येद्रव्यत्वादिविशिष्टसत्ताभावो नास्तीत्यादि प्रमया तद्यासाहि विशिष्टनिरूपिताधिकरणताविशेषस्यैव
विशिष्टाभावाभावत्वोपगमान् विशिष्टाभावस्य विशिष्टाधिकरणताभावस्य नियततया तद्भिन्नत्वेन विशिष्टसत्ताधिकरणतायाश्च विशिष्टाभावप्रतियोगित्वात् प
रेतु संयोगत्वेन संयोगनिरूपिताया अधिकरणतायाः किंचिदवच्छिन्नत्वे पि संयोगिभेदाभावत्वेन तन्निरूपिताधिकरणता निरवच्छिन्नैव द्रव्यं संयोगिभेदस्याप्यस्य यादवच्छे
दकमतेन भावैव तद्भावत्वावच्छिन्नवत्ताप्रतीतेः एवं द्रव्ये सत्तात्वाद्यवच्छिन्नसत्ताद्यधिकरणतासत्वे पि द्रव्यत्वविशिष्टसत्तात्वादिनैवतदवच्छिन्नप्रतियोगिताकाभावाभा
भता वत्वेनापि न वृत्तिः तत्र विशिष्टे भावो नास्तीत्यनुपपत्त्या च साध्यनिष्ठप्रतियोगिताकाभावत्वावच्छिन्ननिरूपितानवच्छिन्नाधिकरणता हेत्वधिकरणवृत्तित्वात् तत्प्र
तियोगितानवच्छेदकत्वमेव साध्यतावच्छेदके निवेशनीयं तेन न कश्चिद्दोष इत्याहुः यत्तु हेत्वधिकरणवृत्तित्वं पर्याप्तेन केनचित्संबंधेन न तु कालिकसंबंधेन धूमाधिकरण
वृत्तित्वविवक्षितावच्छिन्नवह्न्यभावादिकमादाया व्याप्तिः [redacted] ः परिचकालिकादिसंबं
धेन कालेवह्न्यभावादेर्हि निर्वह्न्यनधिकरणदेशावृत्तित्वेन तिनाऽसौ हेत्वधिकरणे निरवच्छिन्नवृत्तिके इति मन्तेन तदापि सत्तावान् जातेरित्यादौ हेतुमन्निष्ठानादौ विषयित्व
संबंधेन वर्तमानं साध्याभावमादाया व्याप्तिर्दुर्वारैव दैशिकविशेषणतासंबंधेन हेत्वधिकरणवृत्तित्वनिवेशेच घटत्वाभावादिसाध्यकप्रमेयत्वादिहेतौ निव्याप्तिः तत्र स
मानाधिकरणधर्मावच्छिन्नप्रतियोगिताकस्याभावरूपसाध्याभावस्य तेन संबंधेनाहेतुमदधिकरणधर्मावच्छिन्नाभावस्यैव लक्षणघटकत्वात् एवं कालिकादिसंबंधाव
च्छिन्नप्रतियोगिताकेष्वाकाशाभावाभावे साध्ये आत्मत्वादिहेतावव्याप्तिः दैशिकविशेषणतया हेतुसमानाधिकरणस्याकाशाभावस्य प्रतियोगितावच्छेदकेसत्वात् दकतायाः साध्यतावच्छ
कालिकसंबंधेनाकाशाभावरूपप्रतियोगिसत्तायाएव कालिकसंबंधावच्छिन्नप्रतियोगिताकाकाशाभावाभावो नास्तीति प्रत्ययनियामकत्वात् आकाशाभावस्यैव ना

DR. BHAU DAJI

शि॰टी॰ दृशसाध्याभाववत्त्वघटितबाधकविरहादि निवेशस्यापि यादृशप्रतियोगिताकत्वप्रकारकज्ञानं प्रतिप्रादृशसंबंधेन स्वप्रकारकज्ञानं विरोधिना दृशसंबंधेन हेत्वधिकरणवृत्तिर्यो ऽभाव
स्तदीयतादृशप्रतियोगितानवच्छेदकत्वस्यैव निवेशनीयत्वादाकाशाभावस्यदैशिकविशेषणतासंबंधावच्छिन्नाकाशाभावाभाववत्ताज्ञानविरोधित्वान विषयः अपि
भाव: भा तु कालिकसंबंधएव विषयः स्वत्वेन संबंधेनाव्याप्यत्वनिवर्तनेस्वतस्त्वाकाशाभावीयसाध्यनिष्ठप्रतियोगितायामादृशप्रतियोगितेसनैवोपादानसंभवः अपितुस्व
वत्ता धिकरणधर्मावच्छिन्नसाध्याभावीयप्रतियोगितायाएवतादृशाभाववत्ताज्ञानस्यैववैदेशिकविशेषणतासंसर्गकस्याधिकरणधर्मप्रकारेण साध्यवत्तावगाहिनंप्र
मंप्रतिविरोधित्वात्सामान्यतः प्रतियोगिप्रकारकज्ञाननिवेशेआकाशप्रकारकेज्ञानं प्रतिदैशिकविशेषणतासंसर्गेणाकाशाभावप्रकारकज्ञानस्यप्रतिबंधक
तयाउक्तदोषतादवस्थ्यमितियादृशप्रतियोगिताश्रयेसुक्तंप्रतियोगिताश्रयवत्ताज्ञानंवतत्प्रतियोगितावच्छेदकधर्म[redacted]प्रकारकंयात्तेनाकाशत्वेनतादृश
साध्यवत्ताज्ञानंप्रतिदैशिकविशेषणतयाआकाशाभावप्रकारकज्ञानस्यविरोधित्वेपिनक्षतिः एवंचप्रतियोगिताश्रयावगाहित्वनिवेशप्रयोजनाभावाद्यादृ
शप्रतियोगितावच्छेदकावच्छिन्नप्रकारताशालिज्ञानंप्रतिप्रतिबंधकमित्येववक्तव्यंसाध्यवत्ताज्ञानविरोधित्वंवा एतत्तलक्षणे निवेश्यंनचाकाशत्वादिनासा
ध्यवत्ताज्ञानविरोधितामादायपूर्वदर्शितदोषतादवस्थ्यात्साध्यतावच्छेदकावच्छिन्नप्रकारकज्ञानविरोधित्वपर्यंतनिवेशेअधिकरणधर्मावच्छिन्नप्रतियोगि
ताकसाध्याभाववत्ताज्ञानस्यापिअधिकरणधर्मादिप्रकारकेसाध्यवत्ताज्ञानेप्रत्येवविरोधित्वेन[redacted]साध्यतावच्छे सम॰
दकावच्छिन्नप्रकारकज्ञानाविरोधितयातादृशसाध्याभावाप्रसिद्धिरितिवाच्यंघटत्वादिविशिष्टवह्निमदित्यादिज्ञानस्यापिसाध्यतावच्छेदकावच्छिन्नप्रकारकतायाअधिकत्वि

न्नादित्यायेनाकृतत्वात्त वचनमात्रावच्छिन्नप्रकारकेनाकत्वप्रवेश्यंनिवेश्यंअन्यथाआकाशत्वनिरुक्तसाध्यतावच्छेदकोभयत्वरूपेणसाध्यत्वात्तंप्रतिदैशिकविशेष
णतयाआकाशाभाववत्ताज्ञानस्यविरोधितयातद्दोषतादवस्थ्यमितिकथंअधिकरणधर्मावच्छिन्नाभावसंग्रहः इतिवाच्यंप्रतियोगितावच्छेदकमात्रावच्छिन्नप्रकार
तानिवेशेपिअधिकरणधर्मावच्छिन्नाभावासंग्रहात्तदवच्छिन्नप्रकारताप्रत्यनिवेशउक्तस्थलेआकाशाभावीयदैशिकविशेषणतावारणासंभवात्तद्धितीयलक्षणे
यादृशप्रतियोगितावच्छेदकयादृशप्रतियोगितासंबंधावच्छिन्नप्रकारतावच्छेदकतानिरूपितावच्छिन्नप्रकारताशालिज्ञानंप्रतियेनसंबंधेनस्वप्रकारकज्ञानंविरोधीतिवि
वक्षणंवदेतल्लक्षणेसाध्यतावच्छेदकप्रकृतप्रतियोगितावच्छेदकाः निरूपितानवच्छिन्नप्रकारताकज्ञानविरोधितानिवेशेतत्प्रतीकारसंभवात् आकाशत्वादेराकाशाभाव
त्वादिरूपप्रतियोगितावच्छेदकानिरूपितत्वात्तद्वच्छिन्नप्रकारताकज्ञानविरोधितामादायदोषाभावात्हेतुसमानाधिकरणस्याप्यहृत्रेवह्नित्वादिनाघटाभावस्यप्रति
योगितावच्छेदकमेववह्नित्वादिरूपंसाध्यतावच्छेदकमतः साध्याभावस्येतियद्यपिवह्नित्वेनघटाभावादेर्घटत्वेनवह्न्यभावाद्यभिन्नतयातादृशाभावोपिसाध्याभावएव
तथापिप्रतियोगितावच्छेदकभेदेनाभावभेदमतेनेदंलक्षणंसमनियताभावानामैक्यापेक्षयेणाव्याप्तिमलक्षणंअथवाहेतुसमानाधिकरणाभावीयसाध्यनिष्ठप्रति
योगितानवच्छेदकत्वनिवेशान्नदोषः वह्नित्वादिनाघटाद्यभावस्यघटत्वादिनावह्न्याद्यभावाभिन्नत्वेपितदीयघटादिनिष्ठप्रतियोगितायाएवअधिकरणेवह्नित्वाद्यव
च्छिन्नत्वेनवह्न्यादिनिष्ठप्रतियोगितायांवह्नित्वादेरनवच्छेदकत्वात्प्रतियोगितासाध्यतावच्छेदकसंबंधावच्छिन्नत्वनिवेशनीयातेनसंबंधान्तरावच्छिन्नप्रतियोगिताक
साध्याभावमादायनासंभवः व्यधिकरणधर्मावच्छिन्नप्रतियोगितायाअपिसंबंधावच्छिन्नत्वव्यवस्थापितमेव प्रतियोगितावच्छेदकत्वंचसाध्यतावच्छेदकताघटकंसं
बंधावच्छिन्नंग्राह्यंतेनगुणत्वादृव्यत्वादिमान्सत्वादित्यादौहेतुसमानाधिकरणस्यविषयितयागुणत्वादिमतः समवायेनाभावस्यसत्तादिनिष्ठप्रतियोगितावच्छेदकत्वेपिसाध्यतावच्छे ४२

३ अथ घटत्वेन महानसीयवह्नेः साध्यप्रतियोगिकत्वनिवेशादेव सामञ्जस्यमिति निष्प्रयोजनं तथाप्यभावे साध्यप्रतियोगिकत्वनिवेशे व्यधिकरणधर्मावच्छिन्नाभावमादाय लक्षणगमनमिति प्रत्य
शि॰टी॰ दकस्य न क्षतिः सर्वत्र द्वित्वावच्छिन्नप्रतियोगिताकसाध्याभावमादायैवैतल्लक्षणसमन्वयसंभवात् व्यधिकरणधर्मावच्छिन्नाभावानभ्युपगमेऽपि क्षतिविरहेण व्यधिकरणध
र्मावच्छिन्नाभावखण्डनमूलकतोक्तिः किंचित्करस्य नो लक्षणेन तो हेतुसमानाधिकरणस्येति अत्र च व्यधिकरणधर्मावच्छिन्नाभावस्याप्रामाणिकत्वे व्यधिकरणधर्मा
वच्छिन्नाभावप्रतियोगितावच्छेदकत्वमादाय व्याप्तिवारणायोपात्तस्य सामानाधिकरण्येनेत्यस्य वैयर्थ्यात् लक्षणसामंजस्यमिति नाहृत्याभावखण्डनं संगच्छते अत्रापि हे
तुसमानाधिकरणस्य व्याप्यहेत्वोरिमस्य पूर्वोक्त एव पर्यवसितार्थः व्याहत्यादिकमपि पूर्वोक्तमेव कालिकसंबन्धावच्छिन्नप्रतियोगिताकाकाशाभावा [illegible] न्त्रात्मत्वा
दित्वादाव व्याप्तेर्वारणाय पूर्वोक्तरीत्यनुसरणे गौरवाद्याप्यहेतित्वमित्यन्य प्रतियोगिव्यधिकरणत्वेनाभावं विशेषयति प्रतियोगिव्यधिकरणस्येति पूर्वलक्षणे साध्या
भावस्य विशिष्योपादानात् तस्य हेत्वधिकरणे साध्यरूपप्रतियोगितासामानाधिकरण्यप्रादुर्भावरूपकमेवैकव्यक्तिवृत्तिसाध्यकेः तत्तत्प्रतियोगिव्यधिकरणसाध्या
भावाप्रसिद्ध्या व्याप्तिरिति तत्रोक्तं प्रतियोगिव्यधिकरणत्वं च न प्रतियोग्यधिकरणवृत्तित्वं संयोगी सत्त्वादित्यादौ संयोगाद्यभावस्यातथात्वाद्भावान्तरमादायाति
व्याप्तेः किंतु प्रतियोग्यनधिकरणवृत्तित्वं एवं च प्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्तीति फलितं पर्यवसितार्थः प्रतियोग्यनधिकरणत्वं च साध्यतावच्छेदक
संबन्धेन प्रतियोग्यधिकरणभिन्नत्वं अतः समवायेन ज्ञानादिसाध्यकस्मृत्यादिहेतौ नातिव्याप्तिः इत्थं च प्रतियोगितानसंबन्धविशेषावच्छिन्नत्वेन विशेषणीया विशे
षणताविशेषेणाभावसाध्यके सर्वस्यैवाभावस्य तेन संबन्धेन किंचिद्विशिष्टस्याभावरूपप्रतियोगिसमानाधिकरणतया प्रतियोगिव्यधिकरणाभावाप्रसिद्धेस्तोया
दृशप्रतियोगितायाः अनधिकरणत्वं हेतुमत्ताहृशप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकं यत्साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यमिति सि ग॰
द्धान्तलक्षणे च समाणरीत्या निष्कर्षणीयं अन्यथा विशिष्टसत्तावान् जातेरित्यत्रातिव्याप्तेर्वारणाय माहृशप्रतियोगितावच्छेदकविशिष्टानधिकरणत्वं हेतुमत इत्यस्यैव वा

च्च तथा वह्निमान् धूमादित्यादौ वह्नित्वादिना घटत्वाद्यभावीयप्रतियोगितायाः लक्षणघटकत्वासंभवात् तदवच्छेदकवह्नित्वावच्छिन्नानधिकरणत्वस्य हेतुमत
सत्त्वात् तथा च सामानाधिकरण्येनेत्यनर्थकं अत्र केचित् यादृशप्रतियोगितावच्छेदकविशिष्टयादृशप्रतियोगिताश्रयोभयानधिकरणत्वं हेतुमत इत्येव तत्साध्य
कापविवक्षणीयं दर्शिताभावीयप्रतियोगितावच्छेदकवह्नित्वादिविशिष्टस्य हेतुमतिसत्त्वेऽपि तादृशप्रतियोगिताश्रयघटादेरसत्त्वात्तदुभयानधिकरणत्वं हेतुमतोऽक्ष
तमेवेति तादृशप्रतियोगितावच्छेदकत्वमादाय दोषवारकतया सामानाधिकरण्येनेत्यस्य सार्थकता न च वह्नित्वेन घटाद्यभावस्य प्रतियोगिताया वह्निभिन्नवृत्तित्वे
वस्वीक्रियते न तु घटादिरूपप्रतियोगिभेदेन भिन्नाभावस्य प्रतियोगितावच्छेदकस्यैवैकात्तया च घटादिनिष्ठप्रतियोगिताश्रयसाध्यादेरेव साधनवति सत्त्वात् तादृ
शप्रतियोगिताश्रयानधिकरणत्वं नतरामिति न सामानाधिकरण्येनेत्यस्य सार्थकतासंभवः प्रतियोगिभेदेन प्रतियोगिताभेदे तु महानसीयवह्न्यादिनिष्ठायाः वह्न्यादि
सामान्याभावीयप्रतियोगितायाः पर्वतीयवह्न्याद्यवृत्तितया तादृशप्रतियोगिताश्रयानधिकरणत्वस्य हेतुमति पर्वतादौ सत्त्वात् वह्नित्वादेस्तदवच्छेदकत्वमादाय व्याप्ति
रिति वाच्यं यतः प्रतियोगिभेदेन प्रतियोगिताभेदः अपितु अवच्छेदकभेदेनैव एवमपि वह्निभिन्नत्वात् घटादिनिष्ठा वह्निभिन्नत्वेन वह्न्यभावीयप्रतियोगितायाः वह्निभिन्नैः
संभावितत्वात् तदाश्रयानधिकरणत्वस्य वह्निमन्मे हेतुमत्यक्षततया तादृशप्रतियोगितावच्छेदकत्वमादायः व्याप्तेर्वारकतया सामानाधिकरण्येनेत्यस्य सार्थक्यं
महाकालो घटवान् कालपरिमाणादित्यादौ महाकालान्यत्वविशिष्टघटाद्यभावीयप्रतियोगितायां हेतुनां ताहशी महाकालस्य तदवच्छेदकमहाकालान्यत्वविशिष्ट
घटत्वाद्यवच्छिन्नाधिकरणतानभ्युपगमात् अथ वा वक्ष्यमाणरीत्या साध्यतावच्छेदकसंबन्धसामान्ये यादृशप्रतियोगितावच्छेदकविशिष्टप्रतियोगिकत्व यादृशप्र
तियोगिताश्रयप्रतियोगिकत्वहेत्वधिकरणीभूतस्य तत्किंचिदनुयोगिकत्वेन द्वित्वावच्छिन्नाभावसत्त्वे तदवच्छेदकत्वमेव बाध्यं एवं च तत्राहत्तिगगनाद्यभावप्रतियोगि

शि॰टी॰ नैवताहृशीः एवं च वह्नित्वादिना घटाद्यभावप्रतियोगितावच्छेदके वह्नित्वविशिष्टप्रयोगिकत्वतदाश्रयवह्निभिन्नप्रतियोगिकत्वयोः कस्मिन् संबंधे सत्वेन ताहृ
शप्रतियोगितायाश्च पितथात्वात् तद्धारकतयापि सामानाधिकरण्येन तस्य सफलत्वम् अवसेयम् इत्याहुः परे तु अत्र तन्ताभावस्येवान्योन्याभावस्यापि प्रतियो
ग्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकत्वोपगमात् पर्वतादौ वह्नित्वविशिष्टाद्यवच्छिन्नजलादिमद्भेदोपि प्रामाणिकः एवं च तावच्छेदकविशिष्टावच्छिन्न
त्वाश्रयवृत्तिप्रतियोगिताकभेदवद्वृत्त्यधिकरणकं पन्प्रतियोगित्वं तदनवच्छेदकत्वं साध्यतावच्छेदकस्य निवेशनीयं एवं च वह्नित्वादिना जलाद्यभावी
यप्रतियोगितादृशस्वकथितभेदस्य तदवच्छेदकवह्नित्वादिविशिष्टावच्छिन्नवत्ताश्रयजलादिमन्निष्ठप्रतियोगिताकत्वात् तत्र तदवच्छेदकतामादा
यदोषवारणाय सामानाधिकरण्येनेति संयोगी द्रव्यत्वात् वह्निमान् धूमादित्यादौ संयोगत्ववह्नित्वाद्यवच्छिन्नसंयोगवह्न्याद्यभावप्रतियोगितायाः संयोग
वह्न्याद्यवच्छेदगुणद्रव्यादिभेदगुणत्वद्रव्यत्वाद्यवच्छिन्नसंयोगिपर्वतभेदवारणाय तथात्ववारणाय निष्ठानवच्छिन्नानयोरूपादानं अथवा यादृशप्रतियोगितावच्छे
दकावच्छिन्नयादृशप्रतियोगिताश्रयवृत्तिप्रतियोगितावच्छेदकताकभेदवत्वं हेतुमन्निष्ठतदनवच्छेदकत्वं विवक्षणीयं वह्नित्वादिना घटाद्यभावप्रतियोगितायास्तादृशी
तादृशप्रतियोगितावच्छेदकवह्नित्वाद्यवच्छिन्नतादृशप्रतियोगितासमानाधिकरणप्रतियोगितावच्छेदकताकस्य वह्नित्वेन घटवान्नेति प्रतीतिविषयभेदस्य हेतुम
न्निष्ठत्वात् अधिकरणधर्मस्य अत्यन्ताभावप्रतियोगितावच्छेदकताक [redacted] त्ववदन्योन्याभावप्रतियोगितावच्छेदकतायामप्यवच्छेदकत्वात् अत एव समवायिनाप्यत्र वह्नेरोपि द्रष्टव्य इति मिश्रैरभिहितं रत्नमव राम॰
तादृशप्रतियोगितावारणाय सामानाधिकरण्येनेति हेतुमतो वह्नित्वेन घटवद्भेदवत्त्वे घटत्वेन वह्निमद्भेदवत्वं वारणाय वह्नित्वाद्यवच्छिन्नवह्निनिष्ठप्रतियोगितायाः तादृ

शत्ववारणाय प्रकृतप्रतियोगितासमानाधिकरणत्वतदवच्छेदकावच्छिन्नत्वयोर्भेदप्रतियोगितावच्छेदकतायां निवेशनं महाकालो घटवान् कालपरिमाणादित्यादौ म
हाकालत्वविशिष्टघटाद्यभावीयप्रतियोगितामादायैव लक्षणसमन्वयः न तु गगनत्वपटत्वादिना घटाद्यभावीयप्रतियोगितान्यायाः गगनाद्यवच्छिन्नपटावच्छिन्न
कालभेदं गगनत्वपटत्वाद्यवच्छिन्नघटाद्यवच्छिन्नभेदं वादाय पूर्वं प्रतीकार्थ [redacted] संभवेपि सामानाधिकरण्येन तदवच्छेदकस्याप्रसिद्धेः अथवा तादृशप्रतियोगि
तासामान्ये यद्धर्मसामानाधिकरण्यविशिष्टयद्धर्मावच्छेद्यत्वाभावस्तद्धर्मविशिष्टसामानाधिकरण्यं अभिप्रेतं विवक्षणीयं एवं च अधिकरणधर्मावच्छिन्नप्रतियो
गितामादायापि लक्षणसमन्वयः न च संभवतीत्यवधेयं वह्नित्वेन वह्निधूमोभयं नास्तीति तादृशप्रतीतिविषयाभावस्य वह्निमान् वह्निधूमोभयवान्नेति प्रतीतिसिद्धभेदमादाय प्रति गृहीतेन
अ योग्यधिकरणत्वेपि तस्य प्रतियोगितावच्छेदकत्वं न वह्नित्वमात्रे पर्याप्तं तथा सति वह्नित्वरूपप्रतियोगितावच्छेदकविशिष्टरूपप्रतियोगिमति तादृशाभावाप्रसिद्ध्या प्र
संगात् किंतु वह्नित्वतदुभयत्वयोरेव तत्र पर्याप्तिरिति तादृशप्रतियोगितायाः समानाधिकरणतयावच्छेदकत्वेपि वह्नित्वस्य न क्षतिः यदि च तादृशाभावप्रतियोगिता
वच्छेदकं वह्नित्वादिकमेव न तु प्रतियोगिविशेषणतावच्छेदकमुभयत्वम् प्रतियोगिविशेषणतानापन्नप्रतियोगितावच्छेदकताग्राहकप्रतीत्या तद्विशेषणतापन्नेन तदनवगा
हनात् अन्यथा वह्निवैशिष्ट्यघटोनालीमादायापि वह्नित्वघटत्वाद्युभयाद्यवच्छेदकत्वपर्याप्त्यवगाहनीविसानसामानाधिकरण्येन सत्त्वेपर्याप्तेः वह्नित्वेनोभया
भावप्रतियोगितावच्छेदसमविष्टत्वेन तादृशाभावस्य केवलान्वयित्वानुपपत्तिरिति समन्वेन तदसामानाधिकरण्येनेत्यस्य प्रतियोगितापर्याप्त्यधिकरणद्वित्वेनेत्य
र्थः इत्याहुः न तु भयमपि नभोक्तं एवं सति घटत्वादिना साध्याभावप्रतियोगितायामप्यतिरिक्तप्रतियोगिवैयधिकरण्यनिरूपकत्वसंभवे न प्रथममलं प्रतियोग्यवृत्त्यधिक क्षणे
स्मरणीय रणे धात्वसमनिवीजनतयासंदर्भविरोधापत्तेः वस्तुतो यादृशप्रतियोगितासंबंधावच्छिन्नप्रकारतावच्छेदकपक्षे किंचिद्धर्मावच्छिन्नानधिकरणत्वे हेतुमन्निष्ठतदनवच्छेदक

दि०टी० त्वं साध्यतावच्छेदकस्य विवक्षणीयं कपिसंयोगत्वाद्यवच्छिन्नकपिसंयोगादिनिष्ठप्रतियोगितासंसर्गावच्छिन्नप्रकारतावच्छेदकं कपिसंयोगत्वादिकमेव तदवच्छिन्नानधिकरणत्वं
च न हेतुमत्तरत्तिनः कपिसंयोगी एतद्वृक्षत्वादित्यादावव्याप्तिः घटत्वावच्छिन्नप्रतियोगिताकत्वसंबंधेन च प्रमेयत्वादिना प्रतियोगिनो घटत्वेन प्रमेयं नास्तीत्यादिप्रतीत्यभावात् प्रमेय
त्वाद्यवच्छिन्नानधिकरणत्वस्य हेतुमत्यसंभवात् घटत्वाद्यवच्छिन्नप्रतियोगितायाः यादृशप्रतियोगितारत्वेनोपादानासंभवात्तथाविधप्रतियोगिताया अप्रसिद्धिरतो प्र
त्कं विशिष्टं कं दंडिमान्दंडसंयोगादित्यादौ न तद्दंडत्वावच्छिन्नानधिकरणत्वमादाय दंडसामान्याभावस्य प्रतियोगिव्यधिकरणेऽपि न क्षतिः तत्तद्दंडत्वावच्छिन्नात्यंताभावप्रतियो
गितावच्छेदकत्वमादाय दोषवारणाय तत्र परंपरासंबंधेन दंडत्वादेः साध्यतावच्छेदकत्वस्वीकारस्यावश्यकत्वात् नतु संयोगत्वतद्द्रव्यत्वादिविशिष्टप्रतियोगिविषयकाभावप्र
नेसंयोगत्ववह्नित्वादिरूपसामान्यधर्मावच्छिन्नप्रतियोगिताकतायाः संसर्गतया भाने मानाभावात् तत्संयोगत्वतद्वह्नित्वाद्यवच्छिन्नानधिकरणत्वेऽपि हेतुमतो न क्षतिः संयोगत्वव
ह्नित्वाद्यवच्छिन्नप्रतियोगितायाः घटत्वाद्यवच्छिन्नत्वेन घटो नास्तीत्यभावबुद्धौ संसर्गतया भानोपगमे भ्रमानिरूपितत्वेन प्रकारताविशेषणीया विशिष्टसत्तावान् ज्ञानेत्या
दौ विशिष्टसत्तात्वाद्यवच्छिन्नप्रतियोगितासंबंधावच्छिन्नप्रकारतावच्छेदकविशिष्टसत्तात्वाद्यवच्छिन्नानधिकरणत्वस्य हेतुमति सत्वात्तन्निवृत्तिः वह्नित्वाद्यवच्छिन्नघ
टादिनिष्ठाधिकरणधर्मावच्छिन्नाभावीयप्रतियोगितासंबंधावच्छिन्नप्रकारतावच्छेदकघटत्वाद्यवच्छिन्नानधिकरणत्वस्य हेतुमति सत्वात्सामानाधिकरण्येनेत्यस्य सा
र्थकता एकमात्रवृत्तिसाध्यकस्थले साध्यविशिष्टप्रतियोगितासंसर्गावच्छिन्नप्रकारतावच्छेदकावच्छिन्नानधिकरणत्वं न हेतुमन्तरत्तिसाध्यवृत्तित्वाविशिष्टप्रतियोगिताया नञ
अप्रसिद्ध्यानपेक्षावक्तलक्षणे प्रतियोग्यधिकरणत्वनिवेशितं वह्नित्वादिना उभयाभावमादाय दोषस्तु सर्वत्र वारणीयः इति परे तु पर्दिघटत्वेन वह्निर्नास्ति वह्नि एम०
त्वेन घटो नास्तीत्यादौ वह्नित्वघटत्वादिरूपसमानाधिकरणधर्मस्यापि प्रतियोगितावच्छेदकत्वभासनेऽप्यन्यथा तादृशप्रतीतिः प्रतियोगितत्वद्वयमात्मतया पुनरुक्त्या तद्यथा भा
नि

नेन द्विशिष्टवैशिष्ट्यानवगाहितया तन्निर्विकल्पकानंतरमनुत्पत्त्यापत्तेः न च वह्नित्वघटत्वादेः प्रतियोगितावच्छेदकत्वानवगाहनेन निर्विकल्पकानंतरं तादृशाभा
वबुद्धिविशेषे प्रतियोगितावच्छेदकतया पदार्थभासनेन निर्विकल्पकानंतरमेवाभावप्रतीत्युपगमादिति वाच्यं वह्नित्वादिनिर्विकल्पकानंतरं तथाविधप्रत्ययो
पगमे विशेषाभावेन तत्तुल्यं वह्नित्वादेः प्रतियोगितावच्छेदकत्वानवगाहि वह्निर्नास्तीत्याद्याकारकसमानाधिकरणधर्मावच्छिन्नाभावप्रत्ययस्यापि स्वीकारापत्ते
रित्यनेन तादृशाप्यवृत्तिनानिवेशपक्षे वह्नित्वादेर्व्याप्यवृत्तिघटत्वाद्यवच्छिन्नवह्न्याद्यभावप्रतियोगितावच्छेदकत्वमादाय असंभवप्रसक्तिरित्यालोच्य प्रतियोगिवै
यधिकरण्यनिवेशनमनुसृत्य तदर्थः प्रतियोगितावच्छेदकविशिष्टानधिकरणवृत्तित्वमेव तथा च तदपि हेतुमतो घटत्वादिविशिष्टानधिकरणतया वह्नित्वादिना
घटाद्यभावमादाय दोषप्रसक्त्या सामानाधिकरण्येनेत्यस्य सार्थक्यसंभवात् न च प्रतियोगितावच्छेदकविशिष्टानधिकरणत्वं प्रतियोगितावच्छेदकावच्छिन्नप्र
तियोगितावच्छेदकतावच्छेदकताकभेदवत्त्वं तथा च संयोगत्वाद्यवच्छिन्नघटादिभेदमादाय संयोगाभावस्य प्रतियोगिव्यधिकरणत्वापत्तिः भेदप्रतियोगिता
वच्छेदकतायाः प्रकृतप्रतियोगितासामानाधिकरण्यनिवेशनेन प्रोक्तिस्यादिना ज्ञानहि हेतृतीयकल्पएव पर्यवसानं प्रतिघटत्वादिना वह्न्याद्यभावस्यापि प्रतियो
गिव्यधिकरण्यापत्त्या वह्नित्वादेस्तत्प्रतियोगितायाः सामानाधिकरण्येनावच्छेदकतयाः स्वाभिप्रतिवाच्यं अधिकरणधर्मावच्छिन्नप्रतियोगिताकभेदानभ्युपग
मेनैवोक्तापत्त्यसंभवात् घटत्वेन पटो नास्तीत्यादौ घटत्वाद्यवच्छिन्नपटाद्यभावस्यैवाविषयतोपगमात् प्रतियोगितावच्छेदकसामानाधिकरण्येनावच्छेदकतात्
शप्रतियोगितावच्छेदकताकभेदाभेदो निवेश्यः अथैवमपि घटत्वाद्यवच्छिन्नवह्न्याद्यभावस्य घटत्वाद्यवच्छिन्नघटादिव्यधिकरणस्य प्रतियोगितावच्छेदकत्वमादाय सा
व्याप्तिर्दुर्वारैवेति चेत्सामानाधिकरण्येन प्रतियोगितायामवच्छेदकं यद्यत्तदवच्छिन्नतत्समानाधिकरणप्रतियोगितावच्छेदकताकभेदस्यैव निवेशनीयत्वात् अथ वह्नित्वा

[illegible]

शि॰टी॰ दिनाद्यन्ताद्यभावस्य पदघटत्वादिकं प्रतियोगितावच्छेदकं न तादृशघटादिमत्तितादृशाभावाप्रसक्तत्वप्रसंगः इति वह्नित्वघटत्वाद्योरवच्छेदकतापर्य्याप्तिरूपगन्तव्यान यावानवच्छेदकपदस्या
वच्छेदकतापर्य्याप्त्यनधिकरणो यावान्धर्म्मस्तत्पर्य्याप्तत्वेन तादृशाभावप्रतियोगितामादाय दोषप्रसक्तेः सामानाधिकरण्येनेत्यस्यैव पर्य्याप्तत्वात्र कारणमेवेति वेन्न प्रतियोगिविशे
षणतापत्त्यन्तरतापत्त्योरवच्छेदकताविलक्षणप्रत्येकमेवावच्छेदकतापर्य्याप्तेः पर्य्याप्तिविवक्षामात्रेण प्रतीकारासंभवात् सामानाधिकरण्येनेत्यस्य सार्थक्यं [illegible]
तत्पर्य्याप्त्यनधिकरणे [illegible] नतृपि [illegible] यादृशं विलक्षणमवच्छेदकत्वं तत्पर्य्याप्ताकाभावे [illegible] प्रतियोगिताविशेषणतापत्त्यस्य यादृशं विलक्षणमवच्छेदकत्वं त
पदच तत्पर्य्याप्त्यनधिकरणत्वलाभात् [illegible] अधिकरणधर्मानवच्छिन्नप्रतियोगिताकाभावस्यैव तन्मतियोगितावच्छेदकविशिष्टविरोधित्वोपगमेनोक्ताभावस्य घटादिमति हत्नोवा
धकाभावात् अस्तु वा विलक्षणावच्छेदकतात्वेन प्रत्येकं पर्य्याप्तयोरप्यवच्छेदकत्वयोस्तन्मतियोगितावच्छेदकत्वेनानुगतयोः समानाधिकरणधर्मव्यधिकरणधर्म
द्वये पर्य्याप्तं तादृशानुगतरूपावच्छिन्नपर्य्याप्त्यधिकरणधर्मावच्छिन्नस्यैवाभावविरोधित्वेनाव्यधिकरणधर्मावच्छिन्नाभावस्य प्रतियोगिमति सत्त्वोपपत्तिः एवं च कृद
त्ववह्नित्वोभयावच्छिन्नवत्यभावमादाय पर्य्याप्तिविवेशव्याहतिप्रदर्शनं समानाधिकरणधर्मस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावप्रतियोगितानवच्छेद
कत्वपक्षीयव्याप्यवृत्तित्वघटितलक्षणाभिप्रायेणेति बोध्यम् अव्यभिचारिसंबंधरूपतावच्छेदकत्वाः अभिचारिसंबंधप्रतियोगितानवच्छेदकत्वे नत्परस्यया
भिप्रायेणेति भावः ननु साध्यतावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तित्वरूपस्य व्यभिचारपदार्थस्य तत्तत्शरीरे निवेशात्कथमेवमितरन्त्वाह हेत्वादिनिपयाहेत्वन्वपि
साध्यतावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तित्वं व्यभिचारः तथा साध्यतावच्छेदकानपि नोहेतुसमानाधिकरणाभावप्रतियोगितायाः सामानाधिकरण्येनावच्छेदकत्वस्या
पितथात्वादित्यर्थः वह्निधूमस्य व्यभिचारीत्यत्राभाववद्वृत्तित्वं व्यभिचारपदार्थः तत्रैकदेशे वाभावे षष्ठ्यर्थः प्रतियोगितायाः निरूपकत्वसंबंधेनान्वयः प्रतियोगितायां २८०
चाधेयतासंबंधेन धूमस्यावच्छिन्नत्वसंबंधेन धूमविशेषणतापन्नधूमत्वस्यान्वयः इति धूमत्वावच्छिन्नधूमाभाववद्वृत्तित्वलाभः साध्यतावच्छेदकावच्छिन्नसाध्यानभावेन

न तत्र व्यभिचारपदार्थेनाशङ्कानं तत्प्रसंगात्साध्यवाचकपदं वैयर्थ्यापत्तेश्च एवं समानाधिकरणाभावप्रतियोगितायां सामानाधिकरण्येनावच्छेदकत्वं व्यभिचा
रपदार्थः सामानाधिकरण्यं च व्यतिरिक्ते विश्रान्तप्रथमान्तपदोपस्थाप्यस्यापि वह्नेर्निरूपकत्वेनान्वयः वह्न्याद्यन्तर्भावेनैव वा शक्तिः धूमपदं लक्षणया धूम
त्वपरं आधेयत्वं षष्ठ्यर्थः अन्वयश्चास्यावच्छेदकत्वे निरूपकत्वमित्यप्रसङ्गयार्थः तथा च धूमत्वनिष्ठत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकता
निरूपको वह्निरित्यन्वयबोधः यद्यपि लाघवरूपविनिगमकसत्त्वादभाववद्वृत्तित्वमेव व्यभिचारपदशक्तिकल्पनमुचितं तथापि स्वपरत्वाद्यन्त
स्याव्यभिचारिनिष्ठामाणिकव्यवहारानुरोधात् उपदर्शितगुरुरूपस्यापि व्यभिचारपदार्थत्वमावश्यकं तन्त्रवाच्यत्वाभावात् प्रसिद्धान्तरभाववद्वृत्तित्वाभावबोधा
संभवात् उक्तरूपस्य व्यभिचारपदार्थत्वे व्यभिचारस्याभावो व्यभिचारभिन्नत्वं भावास्त्रपदोपस्थाप्यत्व समानाधिकरणाभावप्रतियोगितानवच्छेदकत्वमव्यभिचा
पदार्थः इत्यप्रयोजनार्थो निरूपकत्वं वाच्यत्वपरं वाच्यत्वपरं वेष्यर्थः आधेयत्वं तथा च वाच्यत्वनिष्ठत्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकतानिरूप
कं तत्पदमिति अन्वयबोधः अथ एवमप्यव्यभिचारिसंबंधपदेनोक्तव्याप्तेः कथं लाभः तत्वाव्यभिचारिपदेन तादृशप्रतियोगितानवच्छेदकत्वाश्रयपदसंबंधस्य तदा
पसामानाधिकरण्यमिति तल्लाभ इति वाच्यं वह्नित्वधूमाव्यभिचारी इत्यप्रयोगाभावात् उक्तधर्मबोधकाव्यभिचारपदसमभिव्याहृतमतृत्वार्थो यस्मात्प्रयत्नो बोधक
त्वात् अव्यभिचारिपदार्थान्वयितावच्छेदकपदप्रतिपदवच्छिन्नसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वबोधकतायाव्युत्पत्तिसिद्धत्वात् साध्यतावच्छेदकस्या
व्यभिचारिपदार्थत्वे हेतुसमानाधिकरणेत्यादिको निवेशो विशेषकताश्चेन्निवेश्य अव्यभिचारिसंबंधहेत्वस्याव्यभिचारिहेतुनिष्ठसाध्यसामानाधिकरण्यमित्यर्थः
एवं च साध्यतावच्छेदकनिष्ठत्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकतानिरूपकहेतुनिष्ठसाध्यसामानाधिकरण्यमिति पर्य्यवसितं उक्तलक्षणस्याव्य
भिचारार्थतापर्य्यन्तं तु पयाङ्कतविशेष्यविशेषणभावेन तदा यत्रस्याव्यभिचारिसंबंधपदेन बोधपितुमशक्यतया पारिभाषिकता पादुर्भाव्यत्वात् न च यद्रूपावच्छिन्नस्य पक्ष

शि॰टी॰ व्याप्तित्वं तद्रूपेण तस्याव्यभिचारित्वं वेधपदार्थत्वेपि न क्षतिरिति वाच्यं एवं सति साध्याभाववद्वृत्तित्वमात्रस्य व्यभिचारपदार्थत्वेपि व्यतिरेकिसाध्यकोक्तव्याप्तेरव्यभिचा
रिसंबंधरूपतोपपत्तेरुक्तधर्मस्य व्यभिचारपदार्थत्वव्यवस्थापनानुपयुक्तत्वात् उक्तलक्षणेपि साध्यसामानाधिकरण्यपदं तदभावाव्यभिचारिसंबंधरूपतापादनाय व्यवस्थाप
यितुं प्राक्तत्वात् साध्यसामानाधिकरण्यपदेन तदभावेपि प्रतियोगिसमानाधिकरणत्वसमानाधिकरणाभावत्वरूपपर्यवसितस्य स्वलक्षणार्थस्य संबंधरूपता
संभवात् अवच्छेदकत्वमिति अनवच्छेदकमित्यर्थः अवच्छेदकपदं तत्रानुपपत्त्या विषयावच्छेदककमित्यर्थः तत्पर्याप्त्यधिकरणत्वं पर्याप्तिसंबंधेनावच्छेदकतावत्त्वं तथा च पर्या
प्तिसंबंधेनावच्छेदकतावच्छिन्नस्य भेदोऽनवच्छेदकपदेन विवक्षित इति भावः विशिष्टवह्न्यभावस्य प्रतियोगितावच्छेदकत्वेपि वह्नित्वस्यान्वयः महानसीयत्वादिविशिष्टवह्न्य
भावस्य प्रतियोगितायां महानसीयत्वसहितस्य वह्नित्वस्यावच्छेदकत्वेपि आश्रयत्वसंबंधेनावच्छेदकतावत्त्वमतस्य वह्नित्वे दुर्लभत्वादिति भावः प्रतियोगिविशेषणता
वच्छिन्नधर्मान्तरसहितवह्नित्वावच्छिन्नाभावमादाय दर्शयितां प्रतियोगिविशेषणतापन्नधर्मस्यैव प्रतियोगितावच्छेदकत्वं प्रतीयत इति नियमानभ्युपगन्तॄणां अधिकरणे
धर्मावच्छिन्नाभाववादिनः प्रतियोग्यवृत्तिधर्मसहितप्रतियोगिधर्मपर्याप्तप्रतियोगितावच्छेदकताकोऽभावोऽस्तीति मतानुसारेण तादृशाभावमादाय यापि दूषणं
दर्शयति उक्तरत्वेति उभयावच्छिन्नाभावप्रतियोगितावच्छेदकोभयघटकप्रत्येकस्यावच्छेदकतायाः आहत्वादिति भावः न क्षतिरिति अत्रावच्छेद्यांशे अपि विशेष
णाभावापत्तेस्तु तस्यासत्त्वेपि नानाधर्मेषु पर्याप्तं यत्तदवच्छेदकत्वपर्याप्तिसंबंधेन तदवच्छिन्नस्य भेदस्य तत्पर्याप्त्यनवच्छेदकप्रत्येकधर्ममात्रवृत्तिधर्मावच्छेदेन सत्ता
द्वह्नित्वादेस्तादृशप्रतियोगितानवच्छेदकत्वस्य घटत्वाद्यवच्छिन्नघटपटोभयत्वाद्यवच्छिन्नभेदवद्विशिष्टज्ञानरहत्त्वादिति भावः ननु च वह्निनिष्ठरूपत्ववह्नित्वोभयावच्छिन्नप्र
तियोगितायाः सामानाधिकरण्येन यदवच्छेदकतावत्त्वं तद्वह्नित्वमात्रे पर्याप्तं द्रव्यत्वस्य व्यधिकरणतयैवावच्छेदकत्वात् प्रत्येकपर्यवह्नित्वस्य तादृशावच्छेदकता राम०
वच्छिन्नत्वानिर्वाह इति वाच्यम् अतः सामानाधिकरण्येनानवच्छेदकत्वमित्यस्य तत्र तत्प्रतियोगितासमानाधिकरणवृत्तियत्प्रतियोगितावच्छेदकत्वं तदवच्छिन्नभेदकूटव

त्वमर्थः इत्यं च द्रव्यत्वद्वह्नित्वोभयावच्छिन्नप्रतियोगितायाः समानाधिकरणवृत्त्येकैकमेवावच्छेदकत्वमुभयपर्याप्तं तदवच्छिन्नभेदो वह्नित्वे अनाहत एवेति न्यूनसंयोगादिसाध्य
कसद्धेतावव्याप्तिवारणाय तदभावव्यापकतावच्छेदकव्याप्यवृत्तित्वादिविशेषणोपादाने तत्साध्यकसत्त्वादिरूपव्यभिचारिहेतावतिव्याप्तिप्रसंगः अभावांतस्यैव लक्षणघटकत्वादिसा
शक्याव्यभिचारिहेतुकस्थले संयोगाद्यभावस्य लक्षणघटकत्वप्रदर्शनेन यादृशानिसत्ववतीतिव्याप्यवृत्तिसूपलक्षणे प्रतियोग्यधिकरणत्वेन पिवाध्यं अयं भावः व्या
प्यवृत्तित्वमनवच्छिन्नवृत्तिकात्वं न वा स्वसमानाधिकरणाभावप्रतियोगित्वसामान्याभावः प्रतियोग्यधिकरणत्वे च प्रतियोग्यधिकरणवृत्तित्वं किं त्वनवच्छिन्न
वृत्तिकत्वं स्वाधिकरणत्वं किं विशिष्टाभावाप्रतियोगित्वं वा व्याप्यवृत्तित्वं प्रतियोग्यनधिकरणवृत्तित्वं च प्रतियोगिव्यधिकरणं संयोगाद्यभावसाधारणहेत्वधिक
रणे व्याप्तत्वस्याविवक्षितत्वात् सद्धेतुस्थले न तादृशलक्षणघटकतानवगुणादेर्हेत्वनधिकरणत्वात् सत्त्वादिहेतौ केचिद्गुणत्वं प्रतियोगितावच्छेदकत्वं द्रव्यादिना द्रव्यत्वहेतुक
णेपि बोध्यं विवरणीयमन्यथा लक्षणसमन्वयनगुरुधर्मावच्छिन्नसाध्यकव्यभिचारिण्यतिव्याप्तेरिति भावः तथा च संयोगादिरूपसाध्याभावस्य व्याप्यवृत्तित्वादिरूपविशे
षणेन व्यावर्त्तनेपि न क्षतिः व्याप्यवृत्त्यभावान्तरप्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वस्य संयोगत्वादौ सत्त्वेन तदवच्छिन्नसाध्यकव्यभिचारिण्यतिप्रसक्तिरिति यथाश्रु
ताशयोः व्याप्यत्वे सद्धेतुसंगच्छते तत्राव्याप्तेः तत्साध्यस्थानात् स्थले तु तस्य हेत्वधिकरणतया तत्र व्याप्यवृत्तिः प्रतियोग्यधिकरणसाध्याभावो लक्षणघटक एवेति वस्तुस ४६
रमाणमिति निविष्टांतलक्षणस्यादितदवच्छेदकस्य हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकविशिष्टसत्तात्वाद्यनतिरिक्तवृत्तितया सत्तात्वसाधारणतया व्याप्ति
वारणाय स्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकत्वरूपं तदनतिरिक्तवृत्तित्वस्यैव विवक्षणीयतया तादृशाभावव्याप्यवृत्तित्वविशेषणयोगेन विरहेण संयोगादि
साध्यकसद्धेतौ हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकसंयोगत्वादेर्निरुक्तानतिरिक्तवृत्तित्वस्य संयोगत्वादिसाधारणत्वविरहेणाव्याप्तेरनवकाशो न हेतुसमानाधिकर
णाभावे व्याप्यवृत्तित्वनिवेशनेवैयर्थ्यात् नव स्वविशिष्टसंबंधिनिष्ठाभावे व्याप्यवृत्तित्वविशेषणदाने संयोगे न इत्यस्य व्याप्यवृत्तितापत्तेः संयोगेन साध्यतायां हेतुसमाना

शि॰टी॰ धिकरणसाध्यतावच्छेदकं संबंधावच्छिन्नाभावो प्रतियोगितावच्छेदकं यद्विशिष्टसंबंधिनिष्ठाभावो यत्साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगितानवच्छेदकं तादृशधर्मप्रसिद्धिः
तादृशाभावप्रतियोगितावच्छेदकीभूतसकलधर्मावच्छिन्नानामेव संयोगेनाभावानां केवलान्वयित्वादिति स्वविशिष्टसंबंधिनिष्ठाभावे व्याप्यवृत्तित्वविशेषणस्यावश्यकतेति
वाच्यं संयोगस्य भविष्यत्वात्तद्धर्मावच्छिन्नप्रतिकाभावस्याव्याप्यवृत्तितया निवेशाने संयोगेन साध्यतायां हेतुसमानाधिकरणसाध्यतावच्छेदकसंबंधावच्छिन्नाभावो गुणा
दीनामेव व्याप्यवृत्तिर्न तु द्रव्यस्येति तादृशाभावप्रतियोगितावच्छेदकं यद्विशिष्टसंबंधिनिष्ठतादृशाभावप्रतियोगितानवच्छेदकं तादृशधर्मप्रसिद्धिरतस्तस्मात्प्रतियोगि
तायां साध्यतावच्छेदकसंबंधावच्छिन्नत्वपरिमत्यैकसंबंधावच्छिन्नत्वस्य विशेषणतानिविशेषावच्छिन्नत्वस्य चाविशेषणत्वपक्षेऽपि वा व्यवलंबनीयतया व्याप्यवृत्तित्वविशेष
णे वैयर्थ्यास्पदुरुद्धत्वात् तस्मात्तत्वस्य माणं वेति ग्रंथस्याभावे व्याप्यवृत्तित्वविशेषणं तेरयमेव तद्दाने पि संयोगत्वादौ द्रव्यत्वसमानाधिकरणाभावप्रतियोगितापर्या
प्तिभाषिकावच्छेदकत्वविरहेणाव्याप्तिप्रसक्तेरित्याशयः तत्र च पारिभाषिकावच्छेदकत्वशरीरे निविष्टस्वविशिष्टसंबंधिनिष्ठाभावे व्याप्यवृत्तित्वविशेषणमावश्यकं अ
न्यथात्वत्पुक्त्या सत्वादिहेतुके पि संयोगत्वादौ पारिभाषिकावच्छेदकत्वाविर्वाहादिति हेतुमम स्थितभावे पि तद्विशेषणमावश्यकमन्यथाव्याप्तेरित्याशंकां सत्वादिहेतु
कस्थले गुणत्वाद्यवच्छिन्नाभावप्रतियोगितायाः पारिभाषिकावच्छेदकं संयोगत्वादौ परद्रव्यवान्तमिव तिवे निर्गुणत्वाद्यवच्छिन्नाभावानां व्याप्यवृत्तित्वाभिधानेन च सं
योगत्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकत्वस्यैव तदाद्यजन्यद्रव्ये उत्पत्तिकालावच्छेदेन गुणत्वावच्छिन्नाभावसत्वेनैव तन्मते गुणत्वस्य संयोगत्व
विशिष्टसंबंधिनिष्ठाभावीयप्रतियोगितानवच्छेदकत्वं न संभवतीति निर्गुणवृत्तित्वानुधावने संयोगी गुणान्यत्वे सति सत्वादित्यादौ गुणवृत्तित्वेन विशिष्टहेतुसमानाधि
करणाभावप्रतियोगितावच्छेदकमतः संयोगसाध्यकव्यभिचारिमात्रे यादृशप्रतियोगितावच्छेदकमप्रसिद्धाय संयोगत्वस्य पारिभाषिकावच्छेदकत्वं संभवति तादृशध एम॰
र्ममादाय व्याप्यत्वसमवेतत्वेति प्रागल्भ्यलक्षणदूषणकदोषेण दूषयितुमुपन्यस्यति साध्यतावच्छेदकविशिष्टस्यादिविशिष्टाभावो विशेष्यविशेषणसंबंधाभावरूपअ

याभावस्तु परंपरासंबंधेन वृत्त्यभाव इति मतेनेदं लक्षणं अस्य साध्याधिकरणधर्मावच्छिन्नाभावं विनापि लक्षणसमन्वयसंभवे प्रतियोगवृत्तित्वेति ग्रंथानुपपत्ति
रिति वोध्यम् अवच्छेदकत्वमिहानतिरिक्तवृत्तित्वं न तु स्वरूपसंबंधविशेषः यद्योक्तधर्मयोस्तादृशावच्छेद्यावच्छेदकभावे मानाभावात् स्वपदे हेतुतावच्छेदकावच्छि
न्नपरं तथा च साध्यतावच्छेदकविशिष्टसाध्यसामानाधिकरण्यानतिरिक्तवृत्ति यद्धर्मविशिष्टसमानाधिकरणं साध्याभाववत्वं तद्धर्मवत्वं व्याप्तिरिति समुदितार्थः स
द्वैतो साध्यासमानाधिकरणस्य साध्यतावच्छेदकावच्छिन्नसाध्याभावस्य हेतुसमानाधिकरणत्वनियमात्तादृशसाध्याभावत्वं साध्यसामानाधिकरण्यानति
रिक्तवृत्तीति लक्षणसमन्वयः व्यभिचारिणि तादृशसाध्याभावस्यापि हेतुसमानाधिकरणतया तदनतिरिक्तत्वमेव तदिति न लक्षणसमन्वयः गुणान्यत्वविशिष्टसत्वा
वानित्यादावपि नित्याभिवारणाय साध्यतावच्छेदकविशिष्टेति साध्याधिकरणत्वं साध्यतावच्छेदकसंबंधेन बोध्यं तेन संयोगादिना धूमादेरभावस्य धूमादिमन्निष्ठा
वयवे सत्वापि नाव्याप्तिः द्रव्यविशिष्टसत्वादिसाध्यव्यभिचारिवारणाय हेतुतावच्छेदकविशिष्टत्वेनोपादानं तद्विशिष्टाधिकरणं हेतुतावच्छेदकसंबंधेन बोध्यं तेन धू
मादिमत्वापि निष्टवह्नित्वाद्यवच्छिन्नत्वत्वाद्यभावस्य वह्न्यादिसामानाधिकरण्यविरहे पि न क्षतिः वह्न्यादिसामानाधिकरण्यघटकवृत्तित्वं दैशिकविशेषणता
संबंधेन बोध्यम् तेन द्रव्यं सत्वादित्यादौ दैशिकविशेषणतया हि तु समानाधिकरणस्य द्रव्यत्वत्वाद्यवच्छिन्नद्रव्यत्वाद्यभावस्य कालिकादि संबंधेन साध्यवन्निष्ठा का
लादिवृत्तित्वे पि न क्षतिः यद्यपि हेतुसमानाधिकरणसाध्याभावत्वघटकमभावत्वं रूपविशेष्यमतो रिक्तसाध्यके साध्यासमानाधिकरणाभावसाधारणमिति विशि
ष्टसामानाधिकरण्यं तदस्याव्याप्तित्वरूपं तदनतिरिक्तवृत्तित्वं दुर्वचं तथापि यावंतः स्वसमानाधिकरणसाध्याभावा विशिष्टसाध्यसमानाधिकरणास्तत्वस्य विवक्षि
तमत्वात् यत्समानाधिकरणेति पदं दुर्विशिष्टसमानाधिकरणेनसर्थः तेन द्रव्यं गुणकर्मान्यत्वे सति सत्वादित्यादौ सत्तासमानाधिकरणद्रव्यत्वत्वावच्छिन्नद्रव्य
त्वाभावप्रमायोसाध्यवत्तातानप्रतिबंधकत्वे पि न क्षति यद्धर्मावच्छिन्नसामानाधिकरण्यशरीरे हेतुतावच्छेदकसंबंधेन यद्धर्मावच्छिन्नाधिकरणत्वं निवेशनीयं तत्र

दी०टी० योजनं तु स्फुटमेव अधिकरणवृत्तित्वं च निरवच्छिन्नं ग्राह्यं तेन कपिसंयोगी एतद्वृक्षत्वादित्यादौ हेतुसमानाधिकरणकपिसंयोगत्वावच्छिन्नकपिसंयोगाभावादिविषयक
प्रमायाः शाखावृत्तित्वरूपेन तेन निरुक्तवृत्तित्वं दुर्वचं · तथापि · यावतः स्वसमानाधिकरणसाध्याभावाविशिष्टसाध्यसमानाधिकरणत्वस्यार्थस्य विवक्षणीयत्वात् · यत्स
मानाधिकरणेति पद्रूपविशिष्टसमानाधिकरण्यवृत्तित्वज्ञानविरहकालिकायाः साध्यवत्ताज्ञानप्रतिबंधकत्वेपि न क्षतिः प्रमायां प्रमासामान्येतेन व्यभिचारिणा नातिव्याप्तिः
समानाधिकरणधर्मावच्छिन्नाभावत्वेन अधिकरणधर्मावच्छिन्नसाध्याभाववत्ताज्ञानस्यापि विरोधित्वात् तदवच्छेदेनापि लक्षणाघटनासंभवः तत्तु नातन्त्रसामान्यमनुपेत्य प्रमासा
मान्यनिवेशनं प्रमापदं च यावद्रूपमभिप्रायं मतः उक्तप्रमात्मकज्ञानस्याभावत्वाशेषमात्वेपि न क्षतिः साध्यकत्वज्ञानपदमपि तत्सामान्यपरं अन्तो अधिकरणधर्मावच्छिन्नसा
ध्याभाववत्ताज्ञानस्य तद्धर्मवत्वेन साध्यवत्ताज्ञानविरोधित्वेपि न क्षतिः एवं च साध्यपदं साध्यतावच्छेदकविशिष्टपरं ज्ञानं च स्वसमानधर्मितावच्छेदकत्वेन स्वविषयीभूता
भावप्रतियोगितावच्छेदकसंबंधसंसर्गत्वेन विशेषणीयं न तोधूमत्वाद्यवच्छिन्नसंयोगसंबंधावच्छिन्नप्रतियोगिताकधूमाद्यभाववत्ताज्ञानस्य साध्यवत्ताज्ञानसामान्यो
नर्गतद्व्यत्वादिना धूमादिप्रकारकं भिन्नधर्मावच्छिन्नविशेष्यकधूमत्वावच्छिन्नप्रकारकं समवायादिसंबंधेन धूमत्वाद्यवच्छिन्नप्रकारकं वज्ज्ञानं प्रत्यप्रतिबंधकत्वा
त्कामिनीजिज्ञासादेरवचनादृशज्ञानसामान्यविरोधित्वादिति व्याप्तेर्नावकाशः साध्याभावपदवैयर्थ्यादिति · अत्र च साध्यतावच्छेदकविशिष्टसामानाधिकरण्य
वच्छेदकत्वं व्यापकतादृशसामानाधिकरण्यकत्वं तथा च साध्यतावच्छेदकविशिष्टसामानाधिकरण्यत्वं यत्समानाधिकरणसाध्याभावव्यापकतावच्छेदकं
तत्त्वं व्याप्तिरित्येतादृशार्थपर्थकत्वे प्रथमलक्षणे साध्याभावपदवैयर्थ्यं यत्समानाधिकरणनिष्ठाभावप्रतियोगितावच्छेदकत्वाभावरूपयत्सामानाधिकर
ण्यव्यापकतावच्छेदकत्वात् यत्समानाधिकरणसाध्याभावनिष्ठाभावप्रतियोगितावच्छेदकत्वाभावरूपस्य यत्समानाधिकरणसाध्याभाववत्वव्यापक २५०
तावच्छेदकत्वस्यातिरिक्ततया तद्घटितलक्षणे यत्सामानाधिकरण्यव्यापकतावच्छेदकस्यानिवेशात् तद्घटितत्वेन सर्वप्रकृतलक्षणे वैयर्थ्यावव

काशः तदेवं यत्समानाधिकरणसाध्याभावव्यापकसाध्यवत्ताज्ञानप्रतिबंधकत्वाभाववत्त्वमित्येतादृशार्थत्वे द्वितीयलक्षणेपि न तद्वैयर्थ्यं यत्समाना
धिकरणप्रमात्वव्यापकताघटिताभावात् यत्सामानाधिकरणसाध्याभावप्रमात्वव्यापकतायामभावान्तरस्यैव निवेशादित्यवधेयं साध्याभाववन्निति
यन्निष्ठसाध्याभाववद्वृत्तित्व त्वविशिष्टनिरूपितविषयितासामान्ये प्रकृतानुमितिप्रतिबंधकतावच्छेदकत्वाभाववत्त्वमित्यर्थः वह्निमान्धूमादित्यादौ हेतु
निष्ठसाध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपितविषयिता अधिकरणधर्मावच्छिन्नाभाववद्वृत्तित्वविषयितैव सा च न वह्न्यनुमितिप्रतिबंधकतावच्छेदिका तच्छालि
ज्ञानस्यानुमितिप्रतिबंधकत्वान्न व्यभिचारिणि साध्यतावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तित्वविषयितापि तादृशी तद्वतो ज्ञानस्य व्यभिचारज्ञानविधयानुमिति
प्रतिबंधकत्वात्तादृशविषयितायाश्चानुमितिप्रतिबंधकतावच्छेदकत्वान्नातिव्याप्तिः साध्याभाववद्वृत्तित्वरूपविषयस्य प्रतिबंधकतावच्छेदककोटिप्रवेशादिति
व्याप्तिः अतो विषयितापर्यन्तनिवेशनम् हेतुनिष्ठसाध्याभाववद्वृत्तित्वत्वविशिष्टे प्रतिबंधकतावच्छेदकविषयतापर्याप्त्यभावविवक्षणे साध्यप्रतियोगिका
भावमात्रनिवेशे व्यभिचारिण्यतिव्याप्तिः प्रतियोगितायां साध्यतावच्छेदकावच्छिन्नत्वावगाहित्वे एव ज्ञानस्यानुमितिप्रतिबंधकतया तद्घटितविषये प्रतिबंध
कतावच्छेदकविषयताया अपर्याप्तेः साध्यतावच्छेदकावच्छिन्नसाध्याभावनिवेशस्त्ववश्यमेवेति तदुपेक्षितम् · यन्निष्ठत्वानुपादाने धूमाद्यंशे वह्निमान्धूमा
माद्यंशे वह्नित्वावच्छिन्नवत्त्वाभाववद्वृत्तित्वावगाहि भ्रमनिष्ठवह्नित्वेन वह्न्यभाववद्वृत्तित्वविशिष्टनिरूपितविषयितायाश्चानुमितिप्रतिबंधकताव
च्छेदकत्वाद् वह्निमान्धूमादित्यादावव्याप्तिरतस्तदुपादानं तथा च भ्रमविषयवह्न्यभाववद्वृत्तित्वस्य हेतुनिष्ठत्वाभावान्न दोषः यन्निष्ठपदार्थनिरूपितविषयता
सामान्ये यन्निष्ठसाध्याभाववद्वृत्तित्वविषयिता सामान्यमिति यावत् पर्युच्यते न ह्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वमेव यत्र समानाधिकरणधर्मा
वच्छिन्नसाध्याभाववद्वृत्तित्वेन भानं तादृशज्ञानीयहेतुनिष्ठतथाविधसाध्याभाववद्वृत्तित्वविषयितायाश्चानुमितिप्रतिबंधकतावच्छेदकत्वात् सम्भवो व्याप्तिर्व

शि॰टी॰ त्तिसाध्याभाववद्वृत्तित्वविशिष्टनिरूपितत्वं विषयिताविशेषणं तादृशभ्रमविषयितावत्त्वसाध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपितात्तादृशविषयितानिरू
पकस्य चाधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वस्य विशेषणीभूतेयत्समानाधिकरणधर्मावच्छिन्नसाध्याभाववभाववद्वृत्तित्वत्वेन हि विशिष्टत्वाभावान्नव
नहि विशिष्टनिरूपितत्वपरित्यागावच्छिन्ननिरूपकताकत्वं न तत्समानाधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वस्य तद्भ्रमविषयवृत्तावसत्त्वेपि न क्षिप्ते विषय
तानिरूपकत्वेप्यधिकरणीभूयावच्छेदकत्वात् भ्रमविषयतायास्तद्विशिष्टनिरूपितत्वमन्तरेणैव परिचयश्लक्ष्णगत्या पक्षे न दोषः किं तु तन्निष्ठनिरूपितत्वमे
वविशिष्टनिरूपितत्वं तदाद्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपितत्वमेवोक्तभ्रमविषयितायाश्चकृत्तमिति कथं न व्याप्तिः इति नि
वाच्यं विशेषणीभूतधर्मान्तरविशिष्टेन व्यावर्त्तमानस्य विशेष्यस्याभावे विशेषणांशे प्रकारीभवत्साध्यको विशेष्यसंबन्धितावच्छेदकताप्याभानात्साध्याभाववद्वृत्ति
त्वत्वरूपविशेषणविशिष्टविषयेण निरूपकीभूय विषयिता व्यावर्तनेन व्यावर्त्तकविषयस्य चाश्रयतया व्यावर्त्तकं यत्साध्याभाववद्वृत्तित्वं तन्निरूपितत्वं नस्यापि निरूपक
तावच्छेदकीभूयविषयितायां व्यावर्त्तकत्वादुक्तभ्रमविषयिताया आहत्तिः न ह्यव्यावर्त्तकविषयव्यावर्त्तकस्य न निष्टसाध्याभाववद्वृत्तित्वस्य तादृशविषयितानिरूप
कतानवच्छेदकत्वादिति तादृशविषयिताया लक्षणघटकत्वादेवं चोक्तभ्रमविषयितायाव्यावर्त्तकतयैव साध्याभाववदसद्भ्रमार्थकं तादृशविषयिताया उक्त
क्रमेण हेतुनिष्टसाध्याभाववद्वृत्तित्वत्वविशिष्टानिरूपितत्वेपि हेतुनिष्ठाधेयतात्वविशिष्टनिरूपितत्वानपायात्. साध्याभावमनुपादायाप्यधिकरणे ह
त्तितात्वविशिष्टविषयविषयितानिवेशे तु हेतोः समानाधिकरणधर्मावच्छिन्नाभावाधिकरणीयत्वभ्रमविषयिताया हेतुविशेषणे तन्निरूपके अधिकरणे समा
नाधिकरणधर्मावच्छिन्नाभाववत्त्वविषयताकारणानुभवात्साध्याभावांशानिवेशस्यापि सार्थक्यात् न च नाचयत्नानिवेशेपि वह्नित्वावच्छिन्नवह्निप्रतियोगिक राम॰
त्वेनाधिकरणधर्मावच्छिन्नप्रतियोगिताकवद्व्यभावमवगाह्य तादृशाभाववद्वृत्तित्वावगाहियज्ज्ञानं तदीयतादृशसाध्याभाववद्वृत्तित्वविषयितापि साध्याभा

DR. BHAU DAJI MEMORIAL

ववद्वृत्तित्वत्वविशिष्टनिरूपितैवाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वं कोपः साध्याभाववत्त्वं हृद्वृत्तित्वत्वस्यैवमन्यत्र न हि शोषणतयाभानात्तन्निविशिष्टत्वस्यैव तादृ
शज्ञाननिष्टविषयितानिरूपकसाध्याभाववद्वृत्तित्वे सत्त्वादिति निर्दोषतादवस्थ्यमिति वाच्यम्. अभावांशे साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसं
बन्धेन साध्यप्रकारकमिव तज्ज्ञानमेवात्रेति विशिष्य चाधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावे साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसंबन्धेन
साध्यप्रकारकतादृशज्ञानविषयघटकस्य साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसंबन्धेन साध्यविशिष्टस्याधिकरणधर्मावच्छिन्नाभावस्य प्रसिध्यता
दृशज्ञानविषयताया विशिष्टनिरूपितत्वासंभवात् समानाधिकरणधर्मावच्छिन्नसाध्याभाववदधिकधर्मावच्छिन्नसाध्याभाववद्वृत्तिविशेषितानाधिकरणवृ
त्तित्वावगाहिनः समानाधिकरणधर्मावच्छिन्नाभावांशे भ्रमरूपज्ञानस्य विषयितायाअधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपितत्वात्स
मानाधिकरणधर्मावच्छिन्नसाध्याभावविषयितानिरूपिताधिकरणविषयनिरूपिताधेयत्वविषयितानिरूपितात्वेन प्रतिबन्धकतावच्छेदकत्वाद्व्याप्तिरिति वाच्यं
हेतुसमानाधिकरणविशिष्टसाध्याभावत्वविशिष्टविषयितायाः प्रतिबन्धकतावच्छेदकत्वाभावस्य विवक्षणीयत्वात् उक्तभ्रमे च समानाधिकरणधर्मावच्छि
न्नाभावविषयितायास्तादृशविशिष्टनिरूपितत्वाभावेन तस्याः प्रतिबन्धकतावच्छेदकत्वव्याप्तिर्दोषैरेवाभिवेशेन. न तादृशभ्रमस्याप्रामाणिकत्वात् प्रामा
णिकत्वे च संसर्गीयविषयतां दृष्ट्या निरूपकतया लक्षणघटकत्वेनाभाव विषयताया विशेषणीयतया सामंजस्यात्. अथ साध्यरूपविशेषणविशिष्टस्या
भावस्य विषयितानिरूपकतया लक्षणघटकत्वे साध्याभावयोः संबन्धस्य संबन्धविधया लक्षणघटकत्वमावश्यक. स च संबन्धः साध्यतावच्छेदकावच्छि
न्नप्रतियोगिताकत्वरूपो ह्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वरूपस्याननुगतत्वात्तत्प्रथमस्य निवेशे केवलान्वयिनि साध्ये विशेषिताभावस्यैवाप्रसिद्धेः
व्यतिरेकिसाध्यकसद्धेतौ च तादृशहेतुसमानाधिकरणाभावाप्रसिद्धिः न संभवः चरमस्य निवेशे च सर्वत्राव्यभिचारिण्यतिव्याप्तिः प्रतियोगितावच्छेदकधर्मा

शि॰टी॰ णांशेपलक्षणीभूतेनकेनचिद्रूपेणानुगमस्यनिवेशोनसंभवतिप्रतियोगितावच्छेदकोपलक्षणस्यसंबंधघटकतयाभानात् नचावच्छेदकावच्छिन्नत्वाविशेषितप्र
तियोगितायाएवसंबंधतयानिवेशान्नाननुगमनिबंधनोदोषइतिवाच्यं अवच्छेदकावच्छिन्नत्वाविशेषितप्रतियोगिताविषयकाभावज्ञानस्यप्रतियोगिमत्ता
ज्ञानाविरोधितयातज्ज्ञानाविरोधिनः प्रतियोगिविशेषिताभावज्ञानस्यकत्वनुभवविरुद्धत्वेनतयाऽवच्छेदकावच्छिन्नत्वाविशेषितप्रतियोगितायाः संसर्गतया
ऽभानात्तत्तद्रूपावच्छिन्नप्रतियोगिताकत्वसंबंधेनसाध्यतावच्छेदकविशेषितएवाभावोनिवेश्यः ननुसाध्यविशेषितवह्नित्वादिनाघटाभावएववह्न्या
दिसाध्यकधूमादिहेतुकस्थलेलक्षणघटकइतिवाच्यं प्रमेयत्वाद्यवच्छिन्नसाध्यकस्थलेनादृशाभावाप्रसिद्धेः एवंस्वावच्छिन्नप्रतियोगिकत्वसंबंधे
नवह्नित्वादिविशेषितवह्नित्वादिनाघटादेरभावेभासमानेपत्रसंबंधघटकप्रतियोगितायांबाधितस्यवृत्त्यादिनिष्ठत्वस्यभानेनादृशज्ञानीयाभावविषयिता
याउक्तसंबंधेनसाध्यतावच्छेदकविशिष्टाभावनिरूपिततयाऽनुमितिविरोधितयावाऽनुपपन्नत्वेनोक्तत्वात् स्वावच्छिन्नसाध्यनिष्ठत्वविशिष्टप्रतियोगितानि
वेशोवक्षसर्वत्रसहेतुनावप्रसिद्धेः एवंप्रतियोगिविशेष्यतायत्रस्वाभावेप्रतियोगितारतेनसमानाधिकरणधर्मस्यस्वानतेनाधिकरणधर्मस्यस्वाव
च्छिन्नप्रतियोगिताकत्वसंबंधेनप्रकारत्वंप्रामाणिकंनतुप्रतियोगिविशेष्यतानापत्तेवह्निमान्वह्नित्वेनघटोनास्तीत्येवप्रतीतेः नतुवह्नित्वेननास्ती
तिप्रत्यायविशिष्टप्रतियोग्यविशेषितस्योक्तसंबंधेनसाध्यतावच्छेदकविशेषितनिरूपितविषयितालक्षणेननिवेश्यतेपितुस्वनिरूपकहेतुसमा
नाधिकरणाभावनिष्ठोयः संबंधः तन्निरूपितत्वस्याभावस्यविषयितानिरूपकतयानिवेशोनसंभवत्येवनिवेशेवप्रतियोग्यादिविशेषिताभावीयत्व
नविशिष्टगसाध्यनिष्ठतत्संबंधावच्छिन्ननिरूपकतावच्छेदकताकत्वेनयत्रहेतुसमानाधिकरणघटत्वावच्छिन्नवन्न्याद्यभावेवह्नित्वाद्यवच्छिन्नप्रति गम०
योगिताकत्वसंबंधेनवृत्त्यादेः साध्यस्यप्रकारतेनादृशज्ञानविषयितानिरूपकाभावनिष्ठोननिरुक्तनिरुक्तनिरूपकतावच्छेदकतावच्छेदकः संबं

धर्मितद्विषयितास्वीकारात् यत्रवह्नित्वावच्छिन्नघटाभावेतन्निष्ठवह्नित्वावच्छिन्नप्रतियोगिताकत्वमेववह्नेः संबंधतयाभासतेतत्रतत्संबंधप्रतियोगीनवह्निरपितु
घटएवेतिसाध्येऽपालवृत्तत्संबंधप्रतियोगित्वनिवेशान्नादृशज्ञानीयाभावविषयितास्वीकारः साध्यनिवेशाद्यत्रवह्नित्वेनघटएववह्नित्वावच्छिन्नप्रतियोगिताक
त्वसंबंधेनतत्संबंधानुयोगिनिवह्नित्वावच्छिन्नप्रतियोगिताकघटाभावेप्रकारस्तादृशज्ञानीयाभावविषयितायास्तत्संबंधप्रतियोग्यवच्छिन्ननिरूपकताकत्वेप्य
नुमितिविरोधित्वेपिवनदोषः यत्रघटत्वावच्छिन्नवह्न्यभावेघटत्वावच्छिन्नप्रतियोगिताकत्वमेववह्नित्वावच्छिन्नप्रतियोगिताकत्वेनवह्नेः संसर्गतयाभास
तेतादृशज्ञानस्यप्रामाणिकत्वे साध्यप्रतियोगिकोहेतुसमानाधिकरणाभावानुयोगिकोयद्धर्मावच्छिन्नप्रतियोगिताकत्वसंबंधस्तद्धर्मावच्छिन्नप्रतियोगि
ताकत्वत्वाविशिष्टसंबंधावच्छिन्ननिरूपकतावच्छेदकताकत्वेविवक्षणीयमितिदिक् व्यधिकरणधर्मावच्छिन्नाभाववद्वृत्तित्वविषयतायाः प्रतिबंधकतावच्छे
दकत्वाभावादनिव्याप्तिरतः सामान्येत्युक्तं प्रकृतानुमितिपदं प्रकृतानुमितिसामान्यपरंस्वन्यथाव्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वाभावविष
यकस्मृत्यादिवनात्मकप्रकृतानुमितिप्रतिबंधकतावच्छेदकत्वस्यहेतुनिष्ठतादृशसाध्याभाववद्वृत्तित्वविषयितायामपिसत्वात्तद्धेतावुपलक्षणग
मनासंभवात् एवंप्रकृतेत्यनुपादानेकामिनीजिज्ञासादोषप्रसिद्धायाः नुमितिसामान्यप्रतिबंधकतावच्छेदकत्वाभावोधूमाभाववद्वृत्तित्वत्वादिविष
यतायाः सत्तेनएवंतद्विषयकज्ञानस्याप्यन्यलिंगकान्यसाध्यकान्यसंसर्गकानुमितिप्रतिबंधकत्वात्तत्रनः प्रकृतेति तत्साध्यकतद्धेतुकतत्संसर्गकपरं सद्धेतु
निष्ठव्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वविषयितायाअनुमितिप्रतिबंधकत्वरूपासिद्ध्यादिज्ञानवृत्तित्वादसंभवः स्यादतोपविशिष्टसाध्याभाववद्वृत्तित्ववि
षयकज्ञानसामान्यस्यानुमितिप्रतिबंधकत्वमुपेक्षमिरुक्तविषयितासामान्येऽनुमितिप्रतिबंधकतावच्छेदकत्वाभावमर्पनानुधावनं अवच्छेदकत्वंचस्वरूपसं
बंधविशेषः नचधूमाभाववद्वृत्तित्वत्वेनघटादिविषयकज्ञानस्यानुमितिप्रतिबंधकतयाधूमाभाववद्वृत्तित्वत्वविशिष्टविषयिताशालिज्ञानत्वेनप्रतिबंधकताक

दी०ती० न्यनस्यासंभवात्तादृशविषयितायाः प्रतिबंधकतानिरूपितस्वरूपसंबंधरूपावच्छेदकताघटितत्वेनानिरुक्तव्याप्तिरिति वाच्यं तत्साध्याभाववद्वृत्तित्वत्वप्रकारितानिरूपित
विषयिताशालिज्ञानत्वेनानुमत्याधारणप्रतिबंधकताकल्पने गौरवात्तादृशविषयितात्वेन वाहधसाध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपितविषयितायाः
प्रतिबंधकतावच्छेदकत्वस्य क्लृप्तत्वात् तत्र व्यभिचारोऽनुमितिकारणव्याप्तिज्ञाने प्रत्येकप्रतिबंधकत्वादनुमितिप्रतिबंधकत्वमिति व्याप्तिवादिनाम्
निव्याप्तिरितिवाच्यं तज्ज्ञानकज्ञानप्रतिबंधकमावच्छेदकताभावस्यैव विवक्षितत्वात् अनुमितिविरोधित्व तान्यस्य अनुमितिप्रतिबंधकतावच्छेदकता
भावप्रकारकज्ञानस्यैवानुमितिहेतुत्वं तस्मिन्नेव निरुक्तविषयतानिष्ठतादृशावच्छेदकत्वाभावघटितत्वस्यैव अनुमितिकारणीभूतज्ञानविषयत्वादि
तिभावः अनुमित्यविरोधितया अनुमितिजनकज्ञानाप्रतिबंधकतया साध्याभाववद्वृत्तित्वादिज्ञानस्य अनुमितिजनकताभावादितिभावः अतिप्रसंगा
दिति हेतुनिष्ठसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभाववद्वृत्तित्वविषयिताशालिनोऽनुमितिजनकज्ञानप्रतिबंधकतावच्छेदकत्वाभावस्या
क्लृप्तत्वादितिभावः नवहेतुनिष्ठसाध्याभाववद्वृत्तित्वविषयितानुमितिप्रतिबंधकतावच्छेदिका स्यैतादृशज्ञानीयहेतुनिष्ठसाध्याभाववद्वृत्ति
त्वविषयितायाः अपि तादृशविषयितासामान्यान्तर्गततया तत्र प्रकृतत्वाभिज्ञानप्रतिबंधकत्वेऽच्छेदकत्वस्यापि सत्त्वेनातिव्याप्त्यनवकाश
इतिवाच्यं एवं सति हेतुतावच्छेदकेऽपि हेतुनिष्ठव्यधिकरणधर्मावच्छिन्नाभाववद्वृत्तित्वे अनुमितिप्रतिबंधकतावच्छेदकत्वाभावनिष्ठतादृशसाध्याभाववद्वृत्तित्वविषयिता
या अनुमितिप्रतिबंधकतावच्छेदकत्वसत्त्वेन लक्षणगमनासंभवादिति विशेषणत्वेन तादृशविषयितायाः एव लक्षणे निवेशप्रयोजनविषयिताविशेषणत्वेन साध्या
भाववद्वृत्तित्वविषयितायाः प्रतिबंधकतावच्छेदकत्वेनातिव्याप्तिवारणसंभवादिति ध्येयं मिश्राणामसामानाधिकरण्यघटनेन साध्याभाववद्वृत्तित्वरूपां व्याप्तिं परिष्कृ ५५०
त्यापि सम्मतिमाह न त्वित्यादिना नवद्वीपमतेऽधिकरणधर्मावच्छिन्नाभावसजातीयस्य प्रतियोगितावच्छेदकत्वादिना अधिकरणवृत्तित्वाभावस्य हेतौ सत्त्वादतिव्याप्तिरतो पाव

न्नमितिन्याच्यवावरं तर्गतसमानाधिकरणधर्मावच्छिन्नाभावसजातीयस्य नद्यधिकरणवृत्तित्वाभावस्य हेतावसत्त्वान्नातिव्याप्तिः न नैवसमानाधिकरणधर्मावच्छिन्न
साध्याभावाधिकरणवृत्तित्वस्य व्यधिकरणधर्मावच्छिन्नाभावमादाय निव्याप्तिवारणाय प्रत्येकं तत्सजातीयत्वाद्रूपनिरवच्छन्तर्गमाणरूपेण व्यधिकरणधर्माव
च्छिन्नसाध्याभाववद्वृत्तित्वाभावस्य समानाधिकरणधर्मावच्छिन्नसाध्याभावसजातीयत्वाभावान्न दोषः यावत्साध्याभावत्वेन साध्याभावानां निरूपकतया सामान्येः
न्वयव्यतिरेकिसाध्यके वह्निमान् धूमादित्यादौ यावत्साध्याभावनिरूपितत्वस्य क्वचिदप्यसामान्येः सत्त्वाय यावत्साध्याभावसजातीयप्रसिद्ध्योः व्याप्तिलक्षण
क्तित्वेन तेषां सामान्येः न्वयत्वाभावपतत्रादिति नत्तत्सजातीयाद्रूपत्वेनोपस्थितानां समानाधिकरणव्यधिकरणधर्मावच्छिन्नाभावसजातीयानां एकस्मिन्नधिकर
णावृत्तित्वाभावे एकत्र हेतुमितितीस्वापेपुनर्व्याप्तिरोकिसाध्यके व्याप्तिः एकत्रोभयसामान्याभावादेन एकैकाभावे एकैकाभावसजातीयाभेदान्वय उपगत
व्याप्त्येतदर्थनामप्यथाहकं प्रत्येकमिति प्रथमावृत्त वक्ता तेन तत्र अधिकरणवृत्तित्वाभावात् तस्य विशेषणं यावत्साध्याभावत्वेन साध्याभावानामधिकरणे न्व
येवह्निमान् धूमादित्यादौ नत्र दूरात् वृत्तित्वावच्छिन्नसाध्याभावघटितसमुदायाधिकरणतायाः क्वचिदप्यसत्त्वेनाव्याप्तिः स्यादतस्तत्र द्योक्तित्वेन साध्याभावाना
मधिकरणे न्वयव्यतिरेकं तत्रादिति तत्त्वमिति अव्याप्तिवारणत्वमिसमर्थः नत्वनत्तत्सजातीयत्वं तत्र वह्निधर्मवत्त्वं तथा च समानाधिकरणधर्मावच्छिन्नाभा
वत्साभाववादिधर्मवत्त्वं व्यधिकरणधर्मावच्छिन्नाभावेऽपि वर्तते इति तत्सजातीयत्वाद्यभिचारिण्यतिव्याप्तिरत आह सामान्येति समानाधिकरणेति स
मानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वान्यतररूपेणेत्यर्थः तनीयार्थश्चाभेदस्तस्य च सामान्येन्वयः विव
क्षणीयमिति शेषः तथा च तत्सजातीयाद्रूपस्य नत्र भावहित्तिताद्रशान्यतररूपवत्त्वं तत्त्वमर्थः यद्यपि वह्नित्वावच्छिन्नाभावनिष्ठस्वसमानाधिकरणधर्मावच्छिन्न
प्रतियोगिताकत्वं स्वसमानाधिकरणवह्नित्वावच्छिन्नप्रतियोगिताकत्वरूपं तत्र तदधिकरणवृत्तित्वाभावः संभावित एव तथापि स्वासमानाधिकरणधर्मावच्छि

दि॰टी॰ त्राभावप्रतियोगितानवच्छेदकत्वं स्वसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वं स्वसमानाधिकरणधर्मावच्छिन्नाभावप्रतियोगितानवच्छेदकत्वमेव स्वा
धिकरणधर्मावच्छिन्नप्रतियोगिताकत्वमिह विवक्षितं न तु साध्याभाववद्वृत्तित्वाभावो भयसाधारणमेव समनियताभावे समवेते च स्वाधिकरणनिष्ठधर्मावच्छिन्ना
भावप्रतियोगितानवच्छेदकत्वरूपो ऽधिकरणरूपो वा अधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वे ऽस्य स्यान्नार्थ एव वारणीयः तन्मते ऽधिकरणधर्मावच्छि
न्नसाध्याभाववद्वृत्तित्वाभावयोरैक्यात् तादृशसाध्याभाववत्त्वस्य यादृशप्रतियोगितानिरूपकत्वं तादृशप्रतियोगितानिरूपकत्वस्य तथाविधवद्वृत्तित्वा
भावेऽपि सत्वात् एतेन समनियताभावैक्यमते ऽधिकरणधर्मावच्छिन्नाभावस्य समवायादिसंबंधावच्छिन्नगगनत्वावच्छिन्नगगनाद्यभावाभिन्नतया तस्य स
मानाधिकरणधर्मावच्छिन्नगगनादिनिष्ठप्रतियोगितानिरूपकतया ऽधिकरणधर्मावच्छिन्नाभावस्य निरुक्तरूपवत्त्वानुपपत्त्या स्वसमानाधिकरणध
र्मावच्छिन्नसमानाधिकरणधर्मावच्छिन्नाभावस्य निरुक्तरूपवत्त्वानुपपत्त्या स्वसमानाधिकरणधर्मावच्छिन्नसमानाधिकरणसंबंधावच्छिन्नप्रतियोगिता
निरूपकत्वपर्यन्तनिवेशनामासेनोपादेयः समनियताभावैक्यमते गगनाभावत्वगगनाभावभिन्नत्वान्यतररूपेणापि साजात्यविवक्षणसंभवती
ति ध्येयं ननु यावत्साध्याभावान्तर्गतानां तत्तत्साध्यवत्तद्भावादीनामधिकरणे हेतोर्वह्निमान् धूमादित्यादावव्याप्तिः तत्र तत्साध्याभावव
त्तिद्वितीयादौ नियतसमानाधिकरणताभिमानादिति द्वितीयलक्षणे समर्थः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियो
गिताकाभाव एव साध्याभावपदेन विवक्षित इति भावः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकाभावविवक्षणेन तथावि
धवह्निघटोभयाभावमादाय तद्धेयतादृवस्थ्यमतः प्रथमलक्षणे तिनोक्तसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभावविवक्षणे वाच्यत्वादिसा ५५०
ध्यकस्थले वाच्यत्वत्वादिना घटाद्यभावमादाय लक्षणसमन्वयेऽपि स्वरूपसंबंधेन तादात्म्यसंबंधेन तु वा प्रमेयमात्रसाध्यकस्थले न तथा वि

ध्याभावाप्रसिद्ध्या अव्याप्तिरतो व्यापकतावच्छेदकपर्यन्तानुधावनं न तथा वलेऽपि वाच्यत्वत्वादिना वा अत्यन्ताभाव एव नये निरोधः साध्यतावच्छेदकसमनिय
तप्रतियोगिताकाभावनिवेशे च वह्न्यादिसाध्यके तादात्म्येनाभयाभावादिकमादाय दोषः स्यात् अत्र स्वरूपसंबंधेन धर्मानवच्छिन्नत्वं प्रतियोगितायां निवेश्य वारणेऽपि
सत्त्वादिसाध्यकस्थले विशिष्टसत्ताद्यभावमादाय दोषः इति तादृशाभावो न निवेशितः व्यापकतावच्छेदकावच्छिन्नप्रतियोगिता स्वरूपत्रिधर्मावच्छिन्नातिरि
क्तस्वरूपधर्मावच्छिन्नत्वाभावप्रतियोगितानवच्छेदकत्वं निवेशनीयं तेन वह्न्यादिसाध्यकस्थले वह्नित्वादिना महानसीयवह्निघटोभयाभावमादाय न दोषः
स्वरूपत्वमिति रीतिरिक्तस्वरूपत्वं विवक्षितमाह निर्वाच्यं तेनाधिकरणधर्मावच्छिन्नाभावासंग्रहः व्यापकतावत्साध्यतावच्छेदकसंबंधावच्छिन्नाया तेन
संयोगादिना वह्न्यादिसाध्यके समवायादिना वह्न्याद्यभावमादाय संभववारणाय साध्यतावच्छेदकसंबंधावच्छिन्नत्वेन प्रतियोगितायां विशेषणीयम् तथा
समवायादिना द्रव्यत्वादिसाध्यके विषयतादिसंबंधेन साध्यव्यापकस्य तादृशे समवायादिना भावमादाय दोषस्यानवकाशः तादात्म्यसंबंधेन प्रमेयसा
ध्यकस्थले समवायिलक्षणं अधिकरणधर्मावच्छिन्नप्रतियोगितावच्छेदकताके भेद एव लक्षणघटकः समनियताभावैक्यमते तादृशभेदस्य अधिकरणध
र्मावच्छिन्नप्रतियोगिताकात्यन्ताभावाभिन्नतया अधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वेन तत्साजात्यस्य प्रसिद्धेः संभवात् न तु संयोगेन प्रमेयत्ववानिति प्र
तीतिसाक्षिक संयोगावच्छिन्नप्रमेयत्वनिष्ठप्रतियोगितावच्छेदकताके भेद एव लक्षणघटकः अत्र तेनाभावस्य येन संबंधेन तद्रूपावच्छिन्नं धर्म तत्सं
बंधेन तद्वच्छिन्नप्रतियोगिताकभेदस्याप्युक्तप्रतीतिबलात् सिद्धिरिति तत्र वह्निमान् धूमात् गुणवान् द्रव्यत्वादित्यादौ विषयितादिसंबंधेन वह्नि
त्वगुणत्वादिमतः साध्यतावच्छेदकसंबंधावच्छिन्नाभावस्याप्रसिद्धत्वात् व्यापकतावच्छेदकताघटकसंबंधावच्छिन्नत्वेन प्रतियोगितावच्छेदकता
याश्चावश्यं निवेशनीयतया तादृशाभावस्य सामानाधिकरण्येऽपि लक्षणघटकत्वासंभवात् ननु कतावच्छेदकतात्वादिना दोष कपिसंयोगत्वावच्छिन्न

शि·टी· यिसंयोगाद्यभावस्यापिलक्षणघटकतयातदधिकरणेहेतोर्वृत्तेरव्याप्तिः नवसाध्यतावच्छेदकावच्छिन्नव्यापकताशरीरेप्रतियोगिवैयधिकरण्यनि
वेशस्यनिष्फलत्वम् कपिसंयोगत्वादेः साध्यव्यापकतावच्छेदकत्वाभावात्तादृशाभावानांनलक्षणघटकत्वेनिवाच्यंसंयोगेनवह्न्यादिसाध्य
कस्थलेवह्नित्वादीनांसंयोगरूपसाध्यतावच्छेदकसंबंधघटितव्यापकतावच्छेदकत्वसंपन्नव्यापकताशरीरेप्रतियोगिवैयधिकरण्यनिवेशस्याव
श्यकत्वात् अन्यथासाध्यंवस्तुत्वत्रिकालावच्छेदेनचवह्नित्वद्रव्यत्वाद्यवच्छिन्नस्यसंयोगसंबंधेनाभावस्यतत्साध्यतावच्छेदकसंबंधघटितव्यापकतावच्छेदकस्यैवा
प्रसिद्धिप्रसंगात्· तथाचतत्तदधिकरणपदेनतत्तदभावीयव्याप्यवृत्तित्वनिरूपकाधिकरणमेवविवक्षणीयं व्याप्यवृत्तित्वानिरूपकत्वंचनिरवच्छिन्नाधेयतानिरू
पकत्वं एवंचसंयोगाद्यभावस्यतथाविधाधिकरणंगुणादिरेवेतिनदोषः इत्थंचकपिसंयोगाधिकरणत्वाभाववान्प्रमेयत्वादित्यादौकपिसंयोगतदधिकरणत्वा
दिरूपाणांयावत्साध्याभावांतःपातिनामभावानांतथाविधाधिकरणाप्रसिद्ध्याः व्याप्तिरतः साध्याभावं व्याप्यवृत्तित्वेनविशिनष्टि व्याप्यवृत्तित्वेतिनतथा चता
दृशाभावस्यतथाविधयावद्वृत्तेर्नगगनत्वात्तथाविधाधिकरणाप्रसिद्धावपिनक्षतिः व्याप्यवृत्तित्वंचनिरवच्छिन्नवृत्तिकत्वंवच्छिन्नवृत्तिकामत्वेनैव्यासतिसंयोगेन
द्रव्यादिसाध्यकप्रमितवात्रिसंयोगेनधूमत्वाद्यवच्छिन्नधूमाभावस्यमहानसादाववच्छिन्नवृत्तिकतयाः योगालकालमत्वाद्यभावेसाध्यतावच्छेदकसंबंधघटित
व्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वविशिष्टाधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्यैवलक्षणघटकतयानिव्याप्तिः एवंचद्रव्याभावसंयोगाद्य
भावस्यापिकदाचित्रिरवच्छिन्नवृत्तिकत्वेनलक्षणघटकतयातदीयाव्याप्यवृत्तितानिरूपकाधिकरणवृत्तित्वाभावमादायदोषवारणायाधिकरणपदस्यव्याप्यवृ
त्तितानिरूपकाधिकरणपरत्वमावश्यकमिमवधेय कालिकसंबंधावच्छिन्नप्रतियोगिताकाकाशाभावाभावेसाध्येऽस्मात्तत्वादिहेतावव्याप्तिः व्याप्यवृत्तेः साध्या १५०
भावस्याकाशाभावरूपस्यव्याप्यवृत्तितानिरूपकाधिकरणात्मादौहेतोर्वृत्तेस्तदभावीयप्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यनिरूपकाधिकरणमेवतत्तद

धिकरणपदेनविवक्षणीयं प्रतियोगितावच्छेदकावच्छिन्नत्वनिवेशादेकत्वरूपान्यत्वविशिष्टगुणत्ववान्गुणत्वादित्यादौसमवायरूपसाध्यतावच्छेद
कसंबंधघटितविशिष्टसाध्यव्यापकतावच्छेदकविशिष्टगुणत्वत्वाद्यवच्छिन्नाभावस्यप्रतियोगिवैयधिकरण्यनिरूपकतापाहेतुमेयसत्वेपिनाति
व्याप्तिः तथाचकालिकसंबंधावच्छिन्नप्रतियोगिताकाकाशत्वाभावाभावादिसाध्यकात्मत्वादिहेतावव्याप्तिः तत्रव्याप्यवृत्तियावत्साध्याभा
वांतःपातिनःस्त्राकाशत्वाभावादेःप्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्याप्रसिद्धेः कालेप्याकाशावच्छेदेननादृशसाध्यरूपतदभावीयप्रति
योगिसत्वात् तत्रैवतादृशाभावस्यप्रतियोगिसमानाधिकरणत्वात् अतो व्याप्यवृत्तित्वमुपेक्ष्यतादृशाभावेप्रतियोगितावच्छेदकावच्छिन्नवैय
धिकरण्यमेवनिवेश्यप्रतियोगितावच्छेदकावच्छिन्नत्वनिरूपकत्वसमनियताभावेमयानविशेष्यतासंबन्धाधिकरणधर्मावच्छिन्नाभावप्रतियोगितयानतत्प्रति
योग्यनधिकरणाप्रसिद्ध्याननसंग्रहः विशिष्टसाध्यव्यापकतावच्छेदकावच्छिन्नयत्किंचित्प्रतियोगिताश्रयवैयधिकरण्यनिवेशेचघटत्वादिनाघटाद्य
भावस्यघटादिवैयधिकरण्येनलक्षणाघटकतानिर्वाहेपिप्रतियोगिभेदेनप्रतियोगिताभेदस्यनैनमतानविषयत्वादिसाध्यकेयत्किंचित्कालावच्छेदेनपर
माणवादौप्रसिद्धस्यसाध्यतावच्छेदकावच्छिन्नाभावस्ययत्किंचित्प्रतियोगितानधिकरणत्वेः प्रतियोगिवैयधिकरण्यनिरूपकाधिकरणाप्रसिद्ध्याः व्याप्तिः न
न्वायियत्किंचित्प्रतियोगितात्वेनतादृशानधिकरणत्वप्रतिक्षिप्तपारयत्किंचित्प्रतियोगिताश्रयप्रतियोगिवैयधिकरण्यनिरूपकाधिकरणेहेतोर्वृ
त्तेः व्याप्तिवारणाय एवंवह्निमान्धूमादित्यादौद्रव्यत्वाद्यवच्छिन्नस्यसंयोगेनयोःभावस्यत्रैकालिकत्रिकालावच्छेदेनवर्तमानस्यगुणेप्रतियोगिव्यधि
करणाभावेक्षिप्यप्रतियोगिवैयधिकरण्यनिरूपकाधिकरणगुणादौहेतुतावच्छेदकसंबंधेनहेतोरप्रसिद्ध्याव्याप्तिवारणायहेतुतावच्छेदकसंबंधेनकस्यापि
तदधिकरणेप्रतियोगिवैयधिकरण्यमभावेविशेषणीयं एवंचतद्रूपान्यत्वविशिष्टसत्तावान्जातेरित्यादौसमवायघटितसाध्यव्यापकतावच्छेदकविशिष्टस

दी. टी. ततात्वाद्यवच्छिन्नाभावस्य हेत्वधिकरणे सत्त्वादिरूपप्रतियोगिसमानाधिकरणतया अधिकरणधर्मावच्छिन्नाभावस्यैव लक्षणघटकतया ऽनिष्टासिद्धेः प्रति-
योगितावच्छेदकावच्छिन्नत्वोपादानम्· अथ केवलान्वयिस्थले लक्षणघटकानां वाच्यत्वत्वाद्यवच्छिन्नघटाद्यभावानां सर्वेषामेव प्रतियोगितावच्छेदकवाच्य-
त्वत्वावच्छिन्नानधिकरणाप्रसिद्धिः न च यत्किंचित्प्रतियोगितावच्छेदकावच्छिन्नानधिकरणहेतित्वमेव निवेशनीयं तथा च समनियताभावानामैक्योपगमे-
न व्यतिरेकितावच्छेदकधर्मस्यापि तत्त्वाभावप्रतियोगितावच्छेदकतया तदवच्छिन्नानधिकरणत्वस्य प्रसिद्ध्या नेयं लक्षणघटकतेति वाच्यं तथा संति संयो-
गाभावसाध्यकस्थले संयोगाद्यात्मकाभावस्य यत्किंचित्प्रतियोगितावच्छेदकसमवेतसामान्याभावत्वावच्छिन्नानधिकरणहेतित्वात्तद्भाववत्त्वेनासंभव इ-
ति विशिष्टसाध्यव्यापकतावच्छेदकत्वेन प्रतियोगितावच्छेदकविशेषणे उक्तस्थले तादृशप्रतियोगितावच्छेदकावच्छिन्नस्वप्रतियोगिसमानाधिकरणे-
ऽपि मेनत्स्मत्वमधिकरणान्तार्थः न तु प्रतियोगित्वेऽप्यधिकरणपदार्थ इति स्वत्वं केवलं तत्स्वप्रतियोगितावच्छेदकावच्छिन्नस्वप्रतियोगिसमानाधिकरणप्रमेय-
नेदस्मत्वमधिकरणान्तार्थः न तु प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यनधिकरणहेतित्वं अधिकरणधर्मावच्छिन्नाभावस्य प्रतियोग्यप्रसिद्ध्याः संग्रहा
ते नैवं सति धूमवान्वह्नेरित्यादौ साध्यतावच्छेदकीभूतसंयोगसंबंधघटितव्यापकतावच्छेदकधूमत्वाद्यवच्छिन्नसंयोगसंबंधावच्छिन्नप्रतियोगिताका
ऽधूमाद्यभावानां तदुत्पत्तिकालावच्छेदेन धूमादिमति तद्धेतुः अधिकरणधर्मावच्छिन्नाभावस्यैव प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यधिकरणतयाऽति-
व्याप्तिरिति वाच्यं साध्यतावच्छेदकसंबंधेन व्यापकतानिवेशपक्षेऽपि संबंधेन व्यापकतानत्संबंधावच्छिन्नव्यापकतावच्छेदकावच्छिन्नाभावनिवेशस्य
विषयतावच्छेदेन साध्यव्यापकतानत्स्य समवायसंबंधावच्छिन्नाभावमादायोक्तदोषस्य वारणीयतयाऽयोगोलकभेदादेरभावमादाया निव्या- १५०
प्तिवारणासंभवात् तथा तादृशप्रतियोगितावच्छेदको यो धर्मस्तद्विशिष्टतादृशप्रतियोगिताश्रयसामानाधिकरण्यविवक्षणीयं तेन समनियताभावे

समवेते वाच्यत्वत्वादिना घटाद्यभावस्यापि घटत्वादिना वाच्यत्वाभावाभिन्नतया वाच्यत्वादिप्रतियोगिकत्वेन प्रतियोगितावच्छेदकवाच्यत्वत्वादिविशिष्टवाच्यत्वादिरू-
पप्रतियोगिसमानाधिकरणत्वेऽपि न क्षतिः वस्तुतस्त्वेवमपि वाच्यत्वादिसाध्यकस्थले सर्वेषामभावानां एवंरूपेणाहेतुत्वविशिष्टस्वाभावरूपप्रतियोगिसमानाधि-
करणतया प्रतियोग्यसमानाधिकरणाभावाप्रसिद्धिरिति वाच्यं स्वावच्छेदकविशिष्टस्वाश्रयाधिकरणहेत्वभावीयप्रतियोगिताभिन्नत्वेन व्यापकतावच्छेदका-
वच्छिन्नप्रतियोगिस्वविशेषणेऽपि स्वत्वं च प्रतियोगितावच्छेदकेऽस्यादेस्तत्पर्याप्त्या वाच्यत्वत्वावच्छिन्नघटादिनिष्ठप्रतियोगितायाः स्वावच्छेदकविशिष्टस्वाश्रया-
प्रसिद्ध्या निरुक्तप्रतियोगिताभिन्नत्वेन वह्निरूपकाभावमादाय वाच्यत्वादिसाध्यके लक्षणसमन्वयसंभवान्न च तथापि सतदभावभिन्नमेयत्वादिसाध्यकेऽसा-
ध्यव्यापकतावच्छेदकसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्यैतदभावमात्रे तदभावमात्राधिकरणकतयाऽधिकरणस्वरूपत्वादेतदभावभे-
दादिरूपप्रतियोगिसमानाधिकरणतया निरुक्तप्रतियोगिताभिन्नव्यापकतावच्छेदकावच्छिन्नप्रतियोगिताकोऽभावोऽप्यधिकरणधर्मावच्छिन्नाभाव
एवेति व्याप्तिरिति वाच्यं स्वावच्छेदकविशिष्टस्वाश्रयाधिकरणे स्वनिरूपकाभावत्वेन वर्तनीयो योऽभावः तदीयप्रतियोगिताभिन्नत्वेन व्यापकतावच्छेदकावच्छिन्न-
प्रतियोगितायाः विशेषणीयतया एतदभावाधिकरणे एतदभावभिन्ने एतदभावत्वेन एतदभावरूपेणैतदभावभेदाभावस्य हेत्वधिकरणावच्छेदकावच्छिन्नप्रति-
योगितायाः विशेषणीयतया तादृशाधिकरणे एतदभावभेदे नास्तीयप्रतीत्या एतदभावभेदत्वावच्छिन्नप्रतियोगिकाभावत्वेन तस्याहेतित्वादेतदभावभेदत्वाव-
च्छिन्नप्रतियोगितायां निरुक्तप्रतियोगिताभेदस्याक्षतत्वादित्याहुः तद्धिंस व्यापकताघटकसंबंधावच्छिन्नाभावनिवेशे व्यापकताशरीरे प्रतियोगिवैयधिकरण्ये
स्याभावाविशेषणत्वेऽपि संयोगादिना धूमादिसाध्यकव्यभिचारिणि अयोगोलकमात्मत्वाद्यभावमादाय व्याप्तिवारणासंभवात् तत्र तन्निवेशप्रयोजनाभावेन
व्याप्यवृत्तिसाध्याभावमादाय व्याप्तिनवकाशात् भावे व्याप्यवृत्तित्वादिविशेषणमाहात्म्यसंगतेः अन्यत्रैवासाध्यव्यापकतावच्छेदकस्यापि साध्यवन्निष्ठाधिकरणाधे-

५॥

शि॰टी॰ मावच्छिन्नप्रतियोगितावच्छेदकतया तदभाववत्त्वावच्छिन्नव्यापकताशरीरे प्रतियोगिवैयधिकरण्यप्रवेशात् तथा च तादृशप्रतियोग्यसामानाधिकरण्यविवक्षणेन स्याव्याप्तिवा
रणप्रयोजनकत्वाभिधानासंगतिः अभावे तदनिवेशे व्याप्यवृत्तिसाध्यकेऽपि यावत्साध्यवह्निप्रयुक्तज्ञानव्यक्तिविशेषस्य प्रतियोगिवैयधिकरण्यघटितसा
ध्यव्यापकताश्रयत्वात् तत्कालविशेषावच्छेदेन हेतुमति तदभाववृत्तेरसंभवस्यैव प्रसंगात् एतेन प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यनधिकरणवृत्तित्वमेव त
दर्थः नन्वव्यधिकरणधर्मावच्छिन्नाभावस्य प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यप्रसिद्धेः केवलान्वयिसाध्यके प्रतियोगितावच्छेदकविशिष्टप्रतियोग्यधि
करणसाध्याभावाप्रसिद्धेरव्याप्तिरिति वाच्यं प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यनधिकरणवृत्तित्वं हि स्वप्रतियोगितावच्छेदकावच्छिन्नस्वप्रतियोगिवृत्तिप्रति
योगितावच्छेदकताकभेदवद्वृत्तित्वं तेन पटत्वादिना घटत्वाद्यभावस्य तादृशभेदसमानाधिकरणतया प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्यं तु घटस्यैव
व्यधिकरणधर्मावच्छिन्नप्रतियोगितावच्छेदकताकज्ञेयत्वत्वादिना वाच्यत्ववद्वृत्तेरस्यैव तथात्वात् कपिसंयोगाभाववान् ज्ञेयत्वादित्यादौ कपिसंयोगादिरूपसाध्याभा
वस्यापि ज्ञेयत्वत्वादिना कपिसंयोगाभावादिप्रसिद्धेः समानाधिकरणसत्त्वात् तत्रस्य च स्वप्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यनिरूपकाधिकरणप्रसिद्ध्या
अव्याप्तिरतः प्रतियोगितावच्छेदकावच्छिन्नत्वं भेदप्रतियोगितावच्छेदकतायां विशेषणं तेनैव कपिसंयोगात्मकाभावीयप्रतियोगितावच्छेदकीभूतसमवेतसामा
न्याभाववत्त्वावच्छिन्नसमवेतसामान्याभाववद्वृत्तेरस्यापि निरुक्तप्रतियोगितावच्छेदकताकत्वात् तत्सामानाधिकरण्यमादाय कपिसंयोगी घटात्मकाभावानां प्रतियोगि
तावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्याद्वारणाय साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वेन प्रतियोगितावच्छेदकं विशेषणीयं समवेतसामान्याभावत्वा
तत्कपिसंयोगाभावादिव्यापकतानवच्छेदकतया न दोषः न चात्र साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वेन प्रतियोगितावच्छेदकविशेषणे तत्साध्यव्यक्त्याभा गन॰
वादौ तादृशप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्येन घटते साध्यतावच्छेदकावच्छिन्नव्यापकत्वावच्छेदकीभूतस्वप्रतियोगितावच्छेदकाप्रसिद्धेः तथा च सा

॥

ध्याभावत्वेत्यादिना साध्याभावपदेन साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावविवक्षणात् संगतिरिति वाच्यं साध्याभावत्वेत्यादि
ग्रन्थस्य व्याप्यवृत्तित्वनिवेशकत्वे भावसाध्यतावच्छेदकावच्छिन्नेत्यादिविशेषणदानवैयर्थ्यात् द्वितीयकल्पे च प्रतियोगितावच्छेदकावच्छिन्नत्वस्य प्रतियोगितावच्छे
दकस्य तादृशव्यापकतावच्छेदकत्वेन विशेषणात् तादृशरूपावच्छिन्नप्रतियोगिताक एवाभावो लक्षणघटक इत्यर्थकत्वात् तत्कल्पे च भावांशे तादृशप्रतियोगिताक
त्वविशेषणविरहेऽपि क्षतिविरहात् तेनैव कपिसंयोगाभाववत्त्वादित्यादावप्रसिद्धेः समानाधिकरण्यमादाय न दोषः वारणाय स्वप्रतियोगिवृत्तित्वभेदप्रतियोगितावच्छे
दकतायां विशेषणं संयोगसामान्याभावेऽपि कपिसंयोगघटात्मकाभावप्रतियोगितया कपिसंयोगघटात्मकाभावस्य प्रतियोगितावच्छेदककपिसंयोगाभावत्वादिना सं
योगसामान्याभाववद्वृत्तेः समानाधिकरण्यमादाय न दोषः तदवस्थ एव वारणाय यथा तादृशप्रतियोगितावच्छेदकीभूतधर्मस्तदवच्छिन्नतादृशप्रतियोगितानाश्रयवृत्तित्वमे
व भेदप्रतियोगितावच्छेदकतायां निवेशनीयं कपिसंयोगाभाववत्त्वे वा कपिसंयोगाभावनिष्ठप्रतियोगितायामेवावच्छेदकं संयोगसामान्याभावत्वं न तादृशप्र
तियोगितानाश्रयतादृशभेदमादाय न दोषः भेदप्रतियोगितावच्छेदकतायां स्वप्रतियोगितावच्छेदकसंबंधावच्छिन्नत्वमपि निवेशनीयं तेन कपिसंयोगाभावत्वाद्यवच्छिन्न
कपिसंयोगाभावादिनिष्ठविषयितादिसंबंधावच्छिन्नप्रतियोगितावच्छेदकताकभेदसामानाधिकरण्येऽपि न दोषः तादवस्थ्यं स्वप्रतियोगितावच्छेदकावच्छिन्नवैयधिका
रण्यनिरूपकत्वे [redacted] स्वनिरूपत्वस्वप्रतियोगि
तावच्छेदकावच्छिन्नस्वप्रतियोगिनिष्ठप्रतियोगितावच्छेदकताकभेदसामानाधिकरण्यमेव निरूपकत्वमतो व्यधिकरणधर्मावच्छिन्नाभावस्य प्रतियोगितावच्छेदकविशि
ष्टप्रतियोग्यप्रसिद्धावपि तादृशाधिकरणाप्रसिद्धिः कपिसंयोगी एतत्त्वादित्यादौ हेत्वधिकरणेऽपि द्रव्यत्वादिना कपिसंयोगादिमतः कपिसंयोगत्वादिना वद्द्रव्यत्वादि
मतो भेदसत्त्वात् तस्यापि तादृशाधिकरणत्वापत्तेः वह्निव्याननिष्ठानयो रूपादाने एवं कृते हेतुमत्त्वविशिष्टस्वाभाववत्त्वादिप्रतियोगितावच्छेदकरूपेण कपिसंयोगादिमद्वृ

शि॰ टी॰ दमादायनदोषनादवस्थ्यमतत्वत प्रतियोगिताश्रयनिष्ठप्रतियोगितावच्छेदकतायां तदवच्छेदकावच्छिन्नत्वं निवेशनीयं एवं विशिष्टसाध्यव्यापकतावच्छेदकत्वेनापि प्रतियोगि
तावच्छेदकं विशेषणीयं तेन संयोगी द्रव्यत्वादित्यादौ संयोगाभावस्य द्रव्यवृत्तित्वात् तन्निष्ठप्रतियोगितावच्छेदकद्रव्यवृत्तित्वविशिष्टत्वावच्छिन्नाभावत्वावच्छिन्नद्रव्यवृत्तित्वविशिष्ट
त्वावच्छिन्नाभावनिष्ठप्रतियोगितावच्छेदकताकभेदवत्वस्य द्रव्ये सत्त्वात् तस्य प्रतियोगित्वेनाधिकरणविरूपकत्वापत्तिः एवं संबंधविशेषनिवेशनमपि सर्वत्रैवानुसृत
थावत्वाश्रयनिष्ठभेदप्रतियोगितावच्छेदकतावच्छेदकसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नाया यावत्यः प्रतियोगितास्तदवच्छेदकावच्छिन्नतत्तदाश्रयनि
ष्ठप्रतियोगितावच्छेदकताकभेदवद्वृत्तिकरणवृत्तित्वव्यापकप्रतियोगिताकतत्तन्निष्ठप्रतियोगितानिरूपकाभावसजातीयाभाववत्वमिति निष्कर्षः इति प्राञ्चः अभावेप
यावत्तेन साध्यप्रतियोगिकत्वपर्याप्तस्य प्रतियोगितावच्छेदकसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वविशेषणस्य व्याप्यवृत्तित्वादिविशेषणस्य च व्याप्यवृत्ति
मात्रे तेनेति तत्र साध्यत्वं स्वाभाववति हेतौ इत्यत्रापि तत्र व्याप्तिः निर्योजनाय एतद्रूपवान् एतद्धूमादित्यादौ प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणसाध्याभा
ववत्त्रिः साध्यमेव तत्र हेतौ तद्धेतौ लक्षणगमनसंभवात् न संभवः अथ साध्यवन्निष्ठत्वं तद्रूपे तद्रूपोभयत्वावच्छिन्नाभावसत्त्वेन तत्रापि लक्षणगमनासत्त्वात् संभवः न च्छ
यो प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणप्रतियोगिताविच्छेदकीभूतोभयत्वेन तद्रूपेणोभयवृद्देश्यस्य उभयवतोः सिद्धत्वेन प्रसिद्धेरिति वाच्यं उभयत्वेन स्वतत्त्वे
दस्य तादृशाभावप्रतियोगितावच्छेदकावच्छिन्नत्वात् प्रतियोगिवृत्तिप्रतियोगितावच्छेदकताकस्य उभयत्वेन अन्यतराभाववन्निसत्त्वात् तस्यापि तादृशभेदमादायनत्वादिति निवेश
व्याप्तस्य वृत्तिधर्मानवच्छिन्नप्रतियोगिताकस्य स्वव्यापकसाध्यतावच्छेदकप्रतियोगिताकस्य वा भावस्य निवेशे तादृशोभयाभावादिव्याप्यसंभवतीत्यभिप्रायेण
व्याप्तिलक्षणान्तरं अव्याप्यवृत्तीति विषयेत्यन्तं साभावे व्याप्यवृत्तित्वादिनिवेशनस्य प्रयोजनं दर्शनपरत्वे साध्यपरं कपिसंयोगाभावादिपरमेव वाच्यं न रा॰
तु कपिसंयोगादिपरं कपिसंयोगादिसाध्यकस्थले कपिसंयोगाद्यभावस्य लक्षणघटकत्वेपि स्वाधिकरणपरस्य व्याप्यवृत्तितादिनिरूपकाधिकरणपातमयः भावे व्याप्यवृ

व्या॰ २ त्तित्वादिनिवेशनस्यावश्यकत्वाभावात् तदीयव्याप्यवृत्तितानिरूपकाधिकरणे गुणादौ हेतोः वृत्तेः व्याप्यव्यत्वकथन कपिसंयोगाभावादेः गुणादौ निरवच्छिन्नवृत्तिक
त्वादिरूपव्याप्यवृत्तित्वादिसत्त्वेन तादृशविशेषणेन व्यावर्त्तनासंभवात् न चावश्य कपिसंयोगाभावादिसाध्यकस्थले कपिसंयोगाद्यात्मकाभावस्य लक्षणघटकत्वेपि तदीय
व्याप्यवृत्तितानिरूपकाधिकरणाप्रसिद्धेः साध्याप्रसिद्धेरिति का नतु तादृशाभावीयव्याप्यवृत्तितानिरूपकाधिकरणे हेतोः वृत्तिरिति अत्र विशेषहेतोरिति निसंगच्छते न व्याप्य
भावे व्याप्यवृत्तित्वविशेषणानुपादाने व्यावर्त्तनीयं कपिसंयोगादीनां व्याप्यवृत्तितानिरूपकाधिकरणाप्रसिद्धिः स्यादिति तादृशाधिकरणमप्रसिद्धं तेन विवक्षणीयं तथा
च सति अव्याप्यवृत्तिसाध्यकस्थले हेतोः साध्याभाववद्वृत्तित्वनिर्वचनाव्याप्तिः सा च व्याप्यवृत्तितापदोपादानात् संभवतीत्यभिप्रायः अथवा कपिसंयोगादिसाध्यकस्थ
ले हेतोः साध्याभावीयव्याप्यवृत्तितानिरूपकाधिकरणवृत्तित्वेन तत्स्थलीयाव्याप्तिवारकव्याप्यवृत्तितानिरूपकाधिकरणवृत्तित्वनिवेशोपयिकमतत्सदर्थी नाप्या
कपिसंयोगाभावादि साध्यकस्थले कपिसंयोगाद्यात्मकाभावीयतादृशाधिकरणाप्रसिद्धिनिर्वचनाव्याप्तिः तत्पारकमपीति तत्तादृशपदार्थासंगतिः एतेन व्याप्य
वृत्तितानिरूपकाधिकरणनिवेशे व्याप्यवृत्तिसाध्यकस्थलेपि कृत्स्न विशेषवृत्तित्वविशिष्टसाध्याभावप्रतियोगिवैयधिकरण्यघटितसाध्यव्यापकतावच्छेद
कावच्छिन्नप्रतियोगिताकस्याव्याप्यवृत्तेरधिकरणे हेतोः हेतौ साध्यलक्षणगमनासंभवात् अथ संभवे एवं सतीत्यव्याप्तिरिति लिखनं न युज्यते इत्यपि निरस्तं एतद्रूपादिसाध्य
कस्थले स्वरूपसंबंधेन हेतौ साध्यतावच्छेदकसंबंधघटितव्यापकतावच्छेदकरूपावच्छिन्नाभावीयव्याप्यवृत्तितानिरूपकाधिकरणत्वस्य समवायेन प्रसिद्धे
स्तत्तादृशाधिकरणाप्रसिद्धिनिर्वचनलक्षणगमनासंभवात् संभवाभावात् तत्र साध्याभावाधिकरणवृत्तित्वस्य हेतुवृत्तितानवच्छेदकविशेषधर्मव्याप्यवृत्ति
धर्मावच्छिन्नाभावमादाय व्याप्तिवारिणे निव्याप्तिसत्त्वात् साध्याभाववद्वृत्तित्वावच्छिन्नाभावनिवेशप्रयोजनं व्यधिकरणधर्मावच्छिन्नसाध्याभावसजातीयस्य ता
दृशस्य नद्वृत्तित्वेन यदा धाभावस्य प्रसिद्धेः गुरुधर्मस्य प्रतियोगितावच्छेदकतांगीकारे एवं संभव इत्यथा तादृशाभाववद्वृत्तित्वस्य वृत्तित्वरूपलघुधर्मसमनि

शि०टी० प[र्या]प्तत्वाप्रतियोगितानवच्छेदकत्वेन न द्रव्यत्वावच्छिन्नाभावाप्रसिद्धिः अन्यूनानतिरिक्तवृत्तिरूपावच्छिन्नत्वनिवेशे द्रव्यत्ववदन्यनिर्धूमवृत्तित्वोभयाभावादेर्निर्धूमवृ
५ त्तित्वत्वादिसमनियतधर्मावच्छिन्नप्रतियोगिताकतया न द्रव्यत्वादिसाधकवह्न्यादिहेतावव्याप्तेस्तत्तत्साध्याभाववद्वृत्तित्वत्वविशिष्टव्यापकतावच्छेदकरूपावच्छि
न्नाभावादिनिवेशे च निर्धूमवृत्तित्वत्वादिना द्रव्यवृत्तित्वघटान्यतराभावमादायापत्तेरापत्तेरवस्थानान्मिलितस्यादृशाभावं तदधिकरणवृत्तित्वाभावपदेन विवक्षयति तद्वदिति व्या
पकतानवच्छिन्नत्वं च प्रतियोगिताविशेषणे प्रथमविशेषणप्रयोजनमाह तत्तत्साध्याभावव्यक्तिविशेषेति पदस्य क्वौ हेतुरपि निर्वर्तितेनादृशाद्रव्यादिरक्तोऽर्थः
व्यभिचारनिरूपकहेत्वधिकरणमात्रनियोग्यप्रयोगोल्लकादिव्यक्तिविशेषावृत्तित्वादिरूपसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नाभावः न द्रव्यविशेष कि
वृत्तित्वाभावस्य हेतावसंभवात् किं विशिष्टस्य तादृशाभाववद्वृत्तित्वस्याभावमादाय नियमसंगं दर्शयति पार्थिवत्वादिविशेषितस्येति अभिमेण साध्याभाववद्वृत्ति
त्वस्येत्यनेनान्वितेन व्याप्यारोपार्थिवत्वादिविशेषणाभावात् द्विशिष्टनिर्धूमवृत्तित्वाभावमादायेत्यर्थः द्वितीयविशेषणप्रयोजनं दर्शयति द्वित्वाद्यवच्छिन्नस्येति घटनिर्धूम
वृत्तित्वाद्यवच्छिन्नस्येत्यर्थः नातिप्रसंग इति द्रव्यादिवृत्तित्वत्वपार्थिवत्वादिविशिष्टनिर्धूमवृत्तित्वत्वाद्यवच्छिन्नाभावप्रतियोगितायाः द्रव्यादिवृत्तिनिर्धूमवृत्तित्वाव्यापकत्वा
वः। घटत्वतदभावप्रतियोगित्वादौ अभावपदं लक्षणया घटादिरूपसमभिव्याहृततत्पदार्थविशेषिताभावपरं प्रतियोगिपदं तान्प्रतिबंधकज्ञानविषयत्वावच्छिन्ना
र्थकं तदेकदेशज्ञानेनाभावविषयकत्वान्वयः इति स्वत्वाननुमेऽपि न प्रतियोगिपदस्थाने स्वप्रसंगेन वा अभावपदार्थीनत्वोपपत्तिरिति ध्येयं। संबंधविशेषावच्छिन्न
त्वस्य व्यापकताघटकप्रतियोगितायामवश्यनिवेशनीयतया भेदप्रतियोगितामादायाव्याप्तेर्वा असंभवेन संसर्गाभावत्वनिवेशवैयर्थ्यमित्यत्रत्यं तत्पदं संबंधविशेषावच्छि
न्नत्वलाभार्थकं तथैव व्याख्येयं तथा च प्रकृतोपयोगि प्रतियोगितामात्रस्य लक्षत्वेऽपि न क्षतिरित्याह वस्तुतस्त्विव्याहितादि एकसंबंधावच्छिन्नापरतितयाघसाध्यवच्छि
ज्ञाभावप्रतियोगितासामान्यावच्छेदकत्वनिवेशे प्रतियोगितावच्छेदकमात्रस्यैवसाध्यवत्त्विषाभावप्रतियोगितावच्छेदकाप्रसिद्धिः न चापि योगोलकभेदत्वादिकमे
वतथाधम [redacted] वतिसंयोगादिअधिकरणसंबंधावच्छिन्ना
स्वचित्किंचित्संबंधावच्छिन्नाभावप्रतियोगितावच्छेदकतयाताद्दशप्रतियोगितासामान्यानवच्छेदकसाधननि ॰

न

दि.टी. योगोलकभेदाभावस्यापि तत्प्रतियोगितायां तत्पर्वतीयवह्निभेदत्वादेरवच्छेदकत्वोपगमादिति वाच्यं विषयितासंबंधेन कालिकसंबंधेन वा अयोगोलकभेदाभावस्य प्र
तियोगितायामेवायोगोलकभेदत्वादेरवच्छेदकतया तस्य साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकत्वासंभवात् अयोगोलकभेदविषयकभेदो तद्विषयज्ञाने विष ६.
यितासंबंधेन भेदत्वरूपसामान्यधर्मावच्छिन्नाभावासंभवेन तत्ताधारणतादृशसंबंधावच्छिन्नायोगोलकभेदाभावस्य भेदसामान्यानधिकरणे द्रव्यत्वमिथ्याकालेका ५
लिकसंबंधावच्छिन्नभेदत्वावच्छिन्नाभावासंभवेनायोगोलकावच्छेदेन कालवृत्तेः कालिकसंबंधेनायोगोलकभेदाभावस्य प्रतियोगितायां तद्वह्निभेदत्वादेरव
च्छेदकत्वायोगात् प्रतिबध्यलिंचित्संबंधावच्छिन्नप्रतियोगितानवच्छेदकत्वनिवेशे योगोलकभेदत्वादेस्तथात्वमुपपाद्यते तदा वह्निमान् धूमादित्यादौ वह्न्यादिम
न्निष्ठसंयोगसमवायान्यतरविशेषणतासंबंधावच्छिन्नाभावप्रतियोगितावच्छेदकवह्नित्वादेः धूमादिमन्निष्ठसमवायसंयोगकालिकसंबंधावच्छिन्नाभावप्रति
योगितावच्छेदकवह्नित्वद्रव्यत्वत्वद्वाराभेदत्वत्वावच्छिन्नत्वोपाधितापत्तेरिति भावः। पर्वतसंबंधावच्छिन्नाभावेतिनत्वाच्च संयोगादिसंबंधावच्छिन्नवह्न्यादिमन्निष्ठाभा
वप्रतियोगितानवच्छेदकवह्नित्वादेः साधनवन्निष्ठतत्संबंधावच्छिन्नप्रतियोगितावच्छेदकत्वासंभवात् धूमादिमन्निष्ठविशेषणताविशेषादिसंबंधावच्छिन्नाभा
वप्रतियोगितानवच्छेदकायोगोलकभेदत्वादेर्वह्न्यादिमन्निष्ठतादृशसंबंधावच्छिन्नाभावप्रतियोगितावच्छेदकत्वान्न कश्चिद्दोषः इति भावः। संसर्गाभावत्वेन
पादेयमेवेति अयोगोलकभेदत्वादेर्धूमवन्निष्ठभेदप्रतियोगितावच्छेदकत्वेऽपि विशेषणताविशेषसंबंधादिघटितनिरुक्तोपाधितावच्छेदकत्वमत्रास्तत्वादिति २
भावः। स च साध्यसः अधिकरणसंबंधेनैतत्सा चेत तादृश अधिकरणसंबंधेन संयोगादिस्वरूपविशेषणादेः कश्चिदपि कस्यचिदभावान ज्ञातस्य तादृशसंबंधावच्छि ग
न्नप्रतियोगितानुपपत्तिः प्रतियोगितावच्छेदकसंबंधेन प्रतियोगिमत्काकताल्लस्याभावधीविरोधित्वात्तादृशाभावधीप्रतिबंधकज्ञानस्यैवाप्रसिद्धेः पर्यवस
मानधर्मिकयोरेवाभावप्रतियोगिमत्ताज्ञानयोः प्रतिबंध्यप्रतिबंधकभावः इति समानाधिकरणसंबंधावच्छिन्नाभावस्थलेऽपि विरोधिनो रभावप्रतियोगिज्ञान
योर्नियमः इति यादृशाभावस्य तत्प्रतियोगिनोवाच्यमेनकदाचिदपि प्रसिद्धत्वदभावप्रतियोगित्वाभावेः संभवस्तथापि समानविशेष्यताप्रत्यासत्या एमo

फनरस्यपत्रमक

फ क्रांतदोन

पिप्रतिबंध्यप्रतिबंधकभावोपगमेऽपि व्यधिकरणज्ञानस्यापि प्रतिबंधकत्वं तादृशप्रमामात्रापलब्धसमन्वयः संभवतीति अधिकरणसंबंधावच्छिन्नाभावानु
धावनेननुप्रतिबंधकत्वेनकारणीभूताभावप्रतियोगित्वमपि त्रैकालावच्छेदेनैकमात्रवर्तमानत्वमिति प्राचीनोक्तं एवं च यादृश अधिकरणसंबंधेन यस्य
प्रतियोगितो अमो प्रसिद्धत्वात्तादृशसंबंधावच्छिन्नतदभावज्ञानासमानकालीननतत्प्रतियोगिविषयकसंबंधावगाहि प्रमामात्रापि बलं द्रव्यसंगतिः सं
भवतीत्यतो दूषणांतरमाह स्वाभावेति संबंधत्वमित्रिपम' रितितद्याभोगोत्पादाद्रस्वाभावज्ञाने विरहलयोः स्वस्वाभावज्ञानेप्रतिबंधकज्ञानविषयत्वात्पेद्रूपे
त्वादिसर्वत्र संभवित्वादिति सर्वत्र प्रतियोगितारूपत्वसंभवादित्यर्थः तदभावज्ञानविषयोदार्थ्यातिप्रसंगस्यस्वज्ञानिवेशमेवायोगादिति भावः। ननु तथ नी
पाक्षिकत्वात्स्वाद्स्वाभावेत्यत्रैति। स्वाभावेत्यादिविनिपतेपयाकृतविरहत्वनिवेशप्रयोजनाभाविरहत्वस्याद्रिनापि ग्रहः प्रयर्प्यप्रतियोगितापारति
स्वस्याभावः स्वाभावः इति व्युत्पत्त्या प्रतियोगित्वातिरिक्तानतिप्रसक्तसंबंधत्वमदुर्वचत्वादिति भावः। तत्र स्वरूपसंबंधस्यैवेति अन्यथा अव्याप्त्यादिति भा
वः। यद्यपि स्वाभावेत्यत्र प्रतियोगितायाः संबंधविधया निवेशे संबंधज्ञानस्याविशिष्ट्वात् तथापि स्वाभावेत्यत्र स्वाभावत्वेन प्रतियोगितानिवेशोपित
संबंध ज्ञानान्तर्वनतः ज्ञानापेक्षैविनिर्देशपनानत्यापि विशिष्टसंबंधस्यापि घटकतया संबंधविधयाधासमानस्य तस्य घटीरपितस्य संबंधविधयाभानेतादृशीत्या
भाग भानेन संबंधधर्मातज्ञानमिति विषयतानवस्था दुर्वारैव तथा त्वौचित्या त्वप्रतियोगिता त्वौचित्यात न च स्वाभावेत्यस्मंबंधोः अप्रतियोगितानन्प्रतियोगिता
के त्वावस्वरूपसंबंधस्य चात्वात्प्रतियोगितानुविनिर्दिष्टेप्यापीको अनुयोगितायाः स्वरूपसंबंधात्मकत्वेपिनिरुक्तापेक्षापत्तेः स्वनिरूपकत्वस्यैवप्रति
योगितात्वौचित्यानपकारांतरेण प्रतियोगितात्वेशमाह अभावत्वेति अभावत्वं द्वारादिप्रतियोगिकभेदवत्त्वं प्रतिबंधकत्वं एकत्र वर्तमानत्वादि प्रतियो
गिकाभावइतिभावः। नन्वभावादिभवत्वगोचरत्वमेवाभावत्वं ननु प्रतियोगितापहिननिरुक्तान्यथामित्यत आह तथापीतिविना अविषयत्वरूपेणा
भपक्षापि नवचतापटितप्रतियोगित्वस्य नत्त्वजन्यप्रतियोगिविषयत्वरूपत्वात् नत्वदर्शात् तत्पदजन्यबोधविषयत्वप्रकारकभगवदिच्छारूपत्वात्

गिध५

प्रतियोगिता मिति प्रतियोगिभावं तत्संबंधेन सर्वे न तादृश... २
[redacted]

DR. BHAU DAJI MEMORIAL

शु.टी. न्यता च व्याप्तिघटितात् तत्प्रयोज्यप्रतियोगितावच्छेदकत्वादि्ति भावः। एवं च प्रतियोगितास्वरूपसंबंधविशेषः इति पूर्वमत एव मणिकारस्य निर्भरः इति स्पष्टवि
तारः इत्यवधेयं प्रघट्टेन ग्रन्थानां तादृशरूपाभावीयप्रतियोगिता एव प्रकारतया भानात् प्रमाकादेः कारणत्वे प्रतियोगितावच्छेदकत्वाच्च अभावनिरूप
प्रतियोगिनिरूपितोऽनुयोगिताख्यः स्वरूपसंबंधोऽवश्यमंगीकार्यः प्रतियोगिन्यभावविशिष्टबुद्धौ ... कोऽभावीयो घटः इत्यादिप्रत्ययप्रत्यक्षानानुभवसि
द्धः सभावीयप्रतियोगितास्वरूपसंबंधेनानाभावप्रतियोगित्वव्यवहारानुयोगितानिरूपकत्वमेवावलंब्य तेऽस्य प्रतियोगिनिरूप्यत्वात् तस्य
प्रतियोगिजन्यत्वानुरोधेन तस्य प्रतियोगिनिष्ठसंबंधोऽपि न मन्यावश्यक इति चेत् सत्यं तथा च अभावान्तरस्य तादृशसंबंधो निष्ठामाणकं एव न च तन्यस्य प
त्रकार्ण्यतावच्छेदकता न च प्रागभावनिष्ठानुयोगितानिरूपकत्वापेक्षया प्रतियोगिनिष्ठसंबंधेन प्रागभावत्वस्य तथात्वे लाघवात् प्रागभावेनाट
प्राक्संबंधः सिध्यतीति वाच्यं तत्त्वनि पकतासंबंधेनानुयोगिताविशेषरूपप्रागभावत्वस्यैवावच्छेदकत्वे प्रमाणाभावात् प्रागभावत्वेन ... त्वेन भावा
दिभेदस्याधिकरणस्वरूपतामते तत्र्यत्वस्यैव तत्त्वाभावादिसाधारण्यपत्तेर्गौरवाच्च प्रतियोगिनिष्ठ एव तत्र कर्मधारयसमासे आसेदुं तु निष्ठत्वानुपप
त्तिर् निषेधत्तु तत्र तु रूपमवलंब्य मा च षष्ठ्यन्तसमानाधिकरणेन तथा हि त्यादिनाद र्शितेऽभय विधानो पाधिकत्वस्य सोपाधावतिप्रसंगमुद्धर
पत्रा...टेल तिपत्तसमानाधिकरणात् तेन भावे त्यादिनाऽत्यन्तपदार्थनिरूपसमस्तो पात्तानि न तु विवक्षितार्थकानि संबंधविशेषावच्छिन्नत्वेन प्रतियोगिता
यामप्रविशेषणतया व्यावृत्याभावात् तत्र दोषः इति स्यादेव्युनाधुन्या पोपी लेकान्यत्वाथीनो [redacted] धूमादिरूपसाध्यवत्रिष्ठतत्र .ग्निलोभयत्वा
घवच्छिन्नप्रतियोगिताकत्वे पितत्वस्य साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकत्वान्ततादृशाधर्मस्य महानसीय वह्न्यादिरूपपर्यंकिंचित्साधनव
न्निष्ठाभावप्रतियोगितानवच्छेदकत्वेपि साधनवन्निष्ठाभावप्रतियोगितावच्छेदकत्वसामान्याभावत्वाभावादिति भावः एकसंबंधावच्छिन्नत्वमि एम०
तिसाधनसमानाधिकरणाभावीयपद घटसंबंधावच्छिन्नप्रतियोगितावच्छेदकत्वं यस्य तस्य साध्यवन्निष्ठाभावीय तत्संबंधावच्छिन्नप्रतियोगिताव

च्छेदकत्वे साध्यवन्निष्ठाभावीयपदघटसंबंधावच्छिन्नप्रतियोगितानवच्छेदकत्वं यस्य तस्य साधनवन्निष्ठाभावीयतत्संबंधावच्छिन्नप्रतियोगितानवच्छेद
कत्वमित्येव विवक्षणीयमित्यर्थः। विशेषणताविशेषसंबंधमात्रनिवेशे नैवसामंजस्ये संबंधान्तरनिवेशनमफलमित्याशयेनाह विषयतेति पृथ्यमत
त्वेनोसंबंधविवक्षायाः फलमाह प्रतियोगितावच्छेदकमात्रस्येवेति मात्रपदं कृत्स्नार्थकं तथा च स्वतएसाधनसमानाधिकरणाभावप्रतियोगि
तावच्छेदकस्य व्याप्यसाध्यसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वमिति संबंधाविवक्षणे इति व्याप्तिः स्यादिति भावः। तत्र धर्मस्य निपतत्र
धर्मस्य साध्यवन्निष्ठाभावप्रतियोगितावच्छेदकत्वासंभवाद् धर्मस्य स्वप्रतियोगितावच्छेदकधर्मीनुधावनीयघटादि कंबुग्रीवादिमत्त्वादेः पि विष
यितासंबंधावच्छिन्नतद्विशिष्ट [redacted] भावप्रतियोगितावच्छेदकत्वासंभवति घटत्वादिविशिष्टविषयकेपि कंबुग्रीवादिमत्त्वप्रकारकज्ञानादेः तद्
विशिष्टविषयितासंबंधावच्छिन्नाभावसत्त्वेन लघुघटत्वादेस्तत्प्रतियोगितावच्छेदकत्वासंभवात् तथापि विषयितापदमनिवेशकत्वेनाभाव
प्रतियोगितावच्छेदकत्वेनासंभवमिथ्यावयोऽतः स्वयोगोलकमेरत्वादेः हक् धूमादिमत्त्विशिष्टकलिकादि संबंधावच्छिन्नाभावप्रतियोगितायामवच्छेद
कत्वमिति वोऽर्थः द्वितीयपक्षे रूपासंबंधविवक्षायाः फलं दर्शयति एकसंबंधे नितथा च यदि पर्यंकिंचित्संबंधावच्छिन्नसाध्यसमानाधिकरणाभावप्र
तियोगितानवच्छेदकं यद्यत्तत्साधनसमानाधिकरणाभावप्रतियोगितासामान्यावच्छेदकत्वाभावो विवक्षितस्तदा संभवः स्यादिति भावः तस वाददेशतः
मानाधिकरणाभावीयपर्यंकिंचित्संबंधावच्छिन्नप्रतियोगिता [redacted]
वच्छेदकत्वाभावो निवेश्यते तदा परत्वसमवत्प्रतियोगिता सामान्यवान्तरप्रतियोगितावच्छेदकि
रूपे उभयपक्षेऽपि एवं संबंधविवक्षणेऽपि ... तिज्ञानावरणप्रकारं दर्शयति व्यापि ... भावप्रतियोगितावच्छेदकमि
ति तथा च साधनवन्निष्ठाभावप्रतियोगितावच्छेदके भूयस्त्वं च न निष्ठाभावप्रतियोगितानवच्छेदके भूयाः अस्मा साध्यवत्त्वप्रकारकप्रमाविषय

मेव

शि०टी० [redacted]त्वांतर्भावात्साध्यवन्निष्ठाभावप्रतियोगितावच्छेदकत्वसाधनवन्निष्ठाभावप्रतियोगितानवच्छेदकत्वयोरभावात्तल्लक्षणद्वयातिव्याप्तिरितिभा
वः। अत्यंताभावघटितपावत्साधनाव्यापकाव्यापकसामानाधिकरण्यपावत्साध्यव्याप[redacted]ककत्वयोरभावप्रतियोगितावच्छेदकसंबंधवि
शेषघटितत्वेनगुरुतनपातघटितमन्योन्याभावगर्भलक्षणद्वयमाह वस्तुतस्त्वितिपदद्वयम् अन्योन्याभावगर्भलक्षणेपिप्रतियोगितावच्छेदकतयोर
कसंबंधकवच्छिन्नत्वस्यविशेषणताविशेषावच्छिन्नत्वस्यवानिवेशनमावश्यकं अन्यथा घटो गोलकान्यत्वादेरपिधूमसाध्यकसाध्यवन्निष्ठस्यवि
षयितादिसंबंधेनत्वावच्छिन्नभेदस्यप्रतियोगितावच्छेदकतयातिप्रसंगात् अत्यंताभावघटितलक्षणेतु दृशसंबंधेनापोगोलकभेदत्वा थं
घवच्छिन्नज्ञानादेर्योऽत्यंताभावस्तत्प्रतियोगितावच्छेदकतामादायातिप्रसंगोनसंभवतिविशेषणताविशेषसंबंधावच्छिन्नप्रतियोगिताक
स्यतादृशाभावस्यप्रतियोगितापर्याप्त्यभेदत्वादेरेवावच्छेदकत्वसंभवेनगुरोरप्योगोलकभेदत्वादेरनवच्छेदकत्वादितितुच्छप्रतियोगितावच्छे
दकतावच्छेदकसंबंधनिवेशनास्तितथावान्योन्याभावगर्भत्वमोलाघवानवकाशः तथापिगुरुधर्मस्यप्रतियोगितावच्छेदकत्वमतेऽत्यंता
भावगर्भलक्षणेपिप्रतियोगितावच्छेदकतावच्छेदकसंबंधनिवेशनमावश्यकं एवंभेदत्वादेर्विषयितासंबंधेनप्रतियोगितावच्छेदकत्वेऽपो
न गोलकभेदत्वादेर्नप्रतियोगितावच्छेदकत्वमितिकाहः। विशेष्यपर्यन्तस्यापि विशिष्टानुयोगिकाभावानभ्युपगमादितितात्पर्य धर्मस्यसा
ध्यव्यापकतावच्छेदकत्वनिर्वाहायद्वितीयेऽत्यंताभावघटितलक्षणेतन्निवेशनस्यावश्यकत्वात्सर्वथैवेत्यभिप्रायेणोदीवस्तुतस्त्वित्यादिग्रं
तिकल्पितः पाठस्त्वपिवदंतिमावदव्यभिचारितदव्यभिचारीत्युभयपरत्वेववद्व्यो हि धूमनिरूपमावच्चाखेपावतोतेषामितितद्दूषितमित्यत्रकेन
दोषेणेत्याकांक्षायांपूरयतिकेवलान्वयिन्यव्याप्तेरितिननुसाध्याव्यभिचारित्वमात्रेउक्ते केवलान्वयिन्यव्याप्तिःप्रसक्तस्तत्र एव शेषसा एग०
र्थकमविषयनीत्यार्थकायाहः। साचेत्केवलान्वयिन्यव्याप्त्येत्यर्थः यथोक्तलक्षणोपावर्तसाध्यमव्यभिचारितेषामव्यभिचारित्वम्पेकेषवा
मा मि

न्वयिसाध्यकातिरेकिणोऽव्यभिचारिकेवलान्वयिनव्यभिचारएवासिद्धइतितदव्यभिचारित्वमपितथेतिसाध्यंपसव्यभिचारित्वाह यावत्तुनोऽव्यि
व्येतितिभावः कात्स्न्येनसंबंधस्त्वेत्रसाधनसाधनसाध्यसाधनसमानाधिकरणधर्मप्रकात्स्न्यस्यविशेषणतापसामूलकताद्वेषितः नसाध्यसाध्य
तत्समानाधिकरणयोपोलदृविशेषणप ल्लोऽत्रोन्यतानंगापत्वपैतोदूषयित्वेतावंतर्भावितकैपतिकात्स्न्यमित्यादिसाधनसमानाधिकरण्यस्य
वाविवक्षितमितिशेषः सर्वेलक्षणसंबंधस्यत्वेकवद्गमावभावादित्यभिधानेनसाध्यानुयोगिकतत्साधनसंबंधस्यासिताप लदूषणोमत्वस्यता
त्वप्रतीपतेतथाचकृत्स्नधनानुयोगिकसाध्यसंबंधस्यादूषणोनन्वनंतपरिच्छिन्नत्वदूषयित्वसाधनस्यकात्स्न्यमेतन्भावितकेपति। अत्रापत्ति
प्रथमपदेऽमलोकद्वयाद्वयंतरमर्थाधिकदोषद्वयमाह्वयातेऽव्यतिपृथिवीतिपृथिवीवृत्तित्वपरत्वादितिसकलधर्माधिकरणवृत्तिसाध्यसकलसमा
मानाधिकरण्याभावसिद्धिरतःपृथिवीवृत्तिवदुपेक्ष्यव्यापकत्वानुसारात्पृथिवीत्वव्यापकत्वंपृथिवीनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वमहत्ति
साधारणामिति तेनरूपेण हेतुत्वमहनैवपिपक्षतमभावेनांतर्गततथानद्धिकरणप्रसिद्धानांनिव्याप्तिप्रसक्तिरतोज्ञानिपदंसमवेतार्थकेऽव्येतेएव एकव्यक्ति
साधनकाव्याप्तिमहितदर्शितातिव्याप्तौवृत्ततोकृत्स्नसाधनेसाध्यसंबंधोव्याप्तिरितिपक्षः द्वितीयेसाध्यकात्स्न्यविशेषणपक्षेएकव्यक्तिकेतदभावादित्यत्र
कव्यक्तिकपदंतादृशसाधनपरंतत्साधनेकात्स्न्यविशेषणापहारद्वयापत्तिरात्वेचश्यत्वेवत्वस्यतादृशस्यपरत्वासंभवादेकव्यक्तिसाध्यकाव्याप्तिपर हे दु
न तपाव्याप्तिरतएवातिव्याप्तिकात्स्न्यविशेषणयाविवक्षितत्वेकव्यक्तिकत्वस्यलक्षणत्वर्थः न्यूनताभंगापपूरयतिसमव्याप्तेपिचेतिसंयोगादिमात्रगोसंयो
गिसाध्यकपक्षमात्रदोषद्वयानितिन्यूनाद्वेसाध्यत्वेनसकलतद्धिकरणावृत्तिसाध्यनानितव्याप्तिरतःशङ्कसाध्यकानुधावनं। तत्रागमस्येवसकलपक्षाभिकरण
त्वात्। तृतीयचतुर्थयोरर्थाभिधानपूर्वकंदूषणमाह। तृतीयेचेत्यादिना। एकमात्रवृत्तिसाध्यकेपावत्साध्याप्रपावसिद्धदोषत्वतीयएवनचतुर्थेवृत्तिमात्रस्य
त्वादितादावतिव्याप्तिरपितत्रैव। चतुर्थेपादसाध्यसमानाधिकरणपर्वतत्वमहानसत्वपावधिकरणेपवत्तिसाधनदनेकांतापटतोपत्तावव्यभिचारः मादा
ग

शि.टी. वह्न्यादिरिति सकले वह्निमति प्रत्येकं धूमस्याऽवृत्तेः वह्निसमानाधिकरणधूमादिकरणप्रसिद्धेरेवेति भावः सत्वादाविति तत्र वह्न्यादेः साध्यत्वेन
प्रत्येकं चमेयपक्षे तत्पावत्साधनाश्रयसंबन्धः साध्ये लक्ष्यते तस्यातेः साधननिष्ठत्वानिर्वाहेति तत्रिर्वाहाय तादृशसाध्यसामानाधिकरण्यस्याधिकस्य
प्रवेशनमर्थपरिष्कारः स्वपदमधिकं रूपमाह एकमात्रवृत्तिसाधनदृनिपावत्साधनाश्रयाप्रसिद्धेरिति भावः तथैवञ्चार्थपरिष्कारएवं कमेत्रत्रापि ॅ
यथाश्रुते कृत्स्नसाधनसामानाधिकरण्यं साध्ये लक्ष्यते स्यात्तोऽयाते हेतुनिष्ठतासंपादनायैव अधिकरणाप्रसिद्ध्या वपितेषां प्रत्येकसामानाधिकरण्यमे
वसाध्यनिवेश्यमितिनम्रलोकदोषावसरस्तन्त्राहतादृशानामितिसाधनसमानाधिकरणानामित्यर्थः नकुत्रापिवह्नाविति साध्यतावच्छेदके त
त्तद्धर्मसमानाधिकरणेऽवृत्तित्वनिवेशनदोषोद्धारेऽपिनानाधर्मावच्छिन्नसाध्यकेदृशमानदिसंयोगादित्यादौ कुत्रापि देशादिमत्त्वोसाधनसमानाधि
करणानां सर्वेषां प्रत्येकसमानाधिकरणवृत्तित्वासंभवेनाव्याप्तिवैधर्म्यः साधनसमानाधिकरणा सर्वेषादृशसाध्यसमानाधिकरणस्य सामानाधि
करण्यमित्यर्थेनकोपिदोषइत्याशंकते स्वेत्यादीति तत्र वृत्तित्वादिनासाध्ये व्यापकतावच्छेदककोटौ निवेश्यतेतदानानाम्नि साध्येव्याप्तिलोपादु
अपदर्प्रकृतसाध्यतावच्छेदके पदविशिष्टतावाऽज्ञानादित्याशयवन्तिप्रसिद्धिकारणपविशिष्टाधिकरणतामेसामानाधिकरण्यप्रवेशमित्येतन्त्वाभ
पास्वाश्रयपरंपुपेस्याद्वृत्तित्वपरं धूमादिसामानाधिकरण्यस्यापि मेयत्वादिनावह्न्यादिसामानाधिकरण्यतयाऽतिप्रसंगतितादृशसमानाधि
करणत्वस्यव्यापकतावच्छेदकत्वपर्यन्तानुधावनं साधनसामानाधिकरण्यव्यापकत्वस्य धनतावच्छेदकविशिष्टसामानाधिकरण्यत्वावच्छिन्नेव्याप्ति
व्यापकत्वेतेनधूमादिसामानाधिकरण्यत्वेनवह्न्यादिसामानाधिकरण्यत्वावच्छिन्नप्रतिव्यापकत्वेऽपियत्वादिसाधारणविशिष्टसत्वात्वाश्रयसा
मानाधिकरण्यत्वावच्छिन्नप्रति[redacted]इत्यत्वादिसामानाधिकरण्यत्वेनाव्यापकत्वेऽपिनतन्निः परिष्का हाम०
रस्यायेकृणीपत्वेऽपतथैसत्यालचोः कृत्स्नसाधनाश्रयात्रिनसाध्यसंबन्धस्यव्यापकत्वरूपकृत्स्नपदार्थमनभिमतपरिष्कारस्योचितः सच्चाऽि

१५

त्तत्वं पाश्वकदिशतेदत्वाद्दृते पीतितथा वरटानीयकगुणाः पूर्वरूपाप्यवमलङ्घ्यतिनासंगतितिति भावः सत्वेन सिद्धांतलक्षणेनस्तोत्राभावस्या
व्याप्यवृत्तित्वमतेतु अनिश्चयतानभावोपिपर्यायोग्यनधिकारणमतेहेत्वाधिकरणवृत्तितिसंयोगिद्रव्यत्वादित्यादावव्याप्त्या दूषयित्वासाधनसमानाधिकरणाभ
कम्प ॅर्मकका विशेषणापहृ एवदीधितिकोरण्यें वलेवनापरास्त्रभाववदर्थकं वितापटमत्रसमस्यंतनित्यापायेनयावत्[redacted]साध्याभाव
वतीत्यादिनासाध्याभाववदवृत्ति[redacted]त्वमित्यर्थः प्रथमलक्षणोसाध्याभाववदवृत्तिमेदोविवक्षितः अत्रनुतत्वान्तेनाभावइतिभेद इतिभावः सतावान्दृज्ञा
नेरित्यादौसाध्याभाववतिहेतुतावच्छेदकसंबंधेनवृत्तेः प्रसिद्ध्यःकालिकोऽविनाभावमन्यथाव्याप्तेऽविनाभावः स्थिताश्चनसम्भवतः कार्यइतिभा
वः विनाशप्रागभावएवनतुनत्वमनिपातार्थताप्रभृतिवल्नसंबंधेनाभावेसाध्यत्व प्रकृतेवव्यापकत्वमेवेत्यापनेनादृसाध्याभाववव्यापके
५ निसाध्यसमानाधिकरणमितियथात्वेनतत्र व्याप्तिः सामानाधिकरण्यमितिमृत्वाव्याप्तिवघ्नात्संबंधस्येति नव्याप्तिसाध्यनिष्ठतदीयसंबंधस्येत्यर्थः केनचित्तहत्वापि
त्वादित्वव्याप्तरीपव्याप्तिलेपतीयेनतस्वननुभवतीतिनावच्छेदकविरूपेतिरूपाधन्यकनावच्छेदनव्याप्तित्वादित्वर्थः नदेवदत्तपतिधूमादेरपीतिव्यापकत्वा
४ तव्याप्तिनिरूपकतावतेनापावव्याप्तोदूमादिव्याप्तिविशिष्टवैतिभावः यत्तेनदोषादितिकेवलसाध्यसामानाधिकरण्यप्रकारकहेतुमत्तानाधिकरणत्वकांश्चनुमित्य
नुदयादितिसाध्यनुमित्युपपत्यमासमकोटित्वर्थेनपासनिरूपव्यवस्थहेतुनादृशदावयश्रीनानावच्छानुमानापत्तेः उदाहरणेविपित्रपत्तस्वपोनवैयर्थ्यापत्तेः
व्याप्तिवाप्त्येहेत्वाभासतानुपपत्तेः सर्वत्रमेयत्वादिनासत्प्रतिपक्षापत्तेश्चेतिभावः नन्वव्याप्तिवाज्ञानाभावः साकात्तेवानुमितिहेतुर्वाच्यः तथाचसाध्याभावव्य
भिचारिमेयत्वादेनसत्प्रतिपक्षोभापकत्वसंगतःनचाव्याप्तिवारस्वहेत्वाभासतानुपपत्तिः व्याप्तिवारकनिवर्तनेनैवउदाहरणेवपीपयोगः स्वार्थकनेदीधितौ ॅ
नचेतितन्तोऽधः साध्यसामानाधिकरण्यप्रकारकहेतुमत्तावोधः सर्वानुभवसिद्धत्वादितिनथाचतत्राप्युमित्यापत्तिरितिभावः एवमेतन्मतेकोटिद्वयसंदेहानंते ६
धर्मद्वयदर्शनादुभयत्रव्याप्तिवारायदेशनहपानुमितिप्रसंगापिदुर्वारः विपरीतकोटिसमानाधिकरणधर्मवत्ताज्ञानस्यविशिष्टबुद्ध्यविरोधित्वात्अन्यथासाध्य

शि·टी· णाधर्मिकधीनाधीनत्वस्य स्वरूपसत्त्वेऽपि व्यभिचारज्ञानाभावहेतुत्वसंभवत्वेऽपि क्रममपि नेत्याह हेत्वन्तरेति व्यभिचारादेव ग्राहादिव्यभिचारग्रहदशायां धूमा
दिलिंगकवह्न्याद्यनुमितेः स्यादिति अर्थः। तथा च तत्साध्यकानुमितेस्तत्साध्यनिरूपितव्यभिचारग्रहव्यभिचारित्वात्तत्र तद्धेतुतासंभवतीति भावः। न तु तल्लिंगकत
त्साध्यकानुमितित्वस्य तल्लिंगधर्मिकतत्साध्यकव्यभिचारज्ञानाभावजन्यतावच्छेदकत्वोपगमेनापि व्यभिचारः तत्र आह तत्रैवेति हेत्वाविशेषः। नन्वेवं तद्रेणेति
धूमत्वादिप्रकारेण व्यभिचारग्रहेऽपि धूमत्वावच्छिन्नतल्लिंगकानुमित्युत्पन्नेरित्यर्थः। ननु तद्धर्मावच्छिन्नतल्लिंगकानुमितित्वमेव तद्धर्मावच्छिन्नधर्मिकव्यभि
चारज्ञानप्रतिबध्यतावच्छेदकं वाच्यं तथा च नोक्तदोषावसर इत्यत आह तुल्यावच्छेदकाग्रहे इति धूमत्वादिप्रकारेणापि तद्धर्मताज्ञानं विनापि स्वरूपसतालोको
धूपादेर्व्याप्तिसंदेहदशायां वह्निव्याप्यवान् इति व्याप्तिमात्रप्रकारेण पक्षधर्मताज्ञानात् अनुमित्युत्पत्तेरित्यर्थः। तथा च तादृशानुमितौ व्यभिचारग्रहप्रतिब
५ ध्यतावच्छेदकच्छेदकनिरुक्तधर्मानाक्रान्तायामव्यभिचारग्रहस्य कारणतया आवश्यकत्वेन व्यभिचारग्रहहेतुत्वेन कुत्रापि कल्प्यमित्युचितं न च व्यभिचारस्य केवला
न्वयिस्थलेऽप्रसिद्ध्या व्यतिरेकिस्थलेऽपि केवलान्वयित्वग्रहदशायां दुर्ग्रहतया तत्र व्यभिचारज्ञानसहकृतसामानाधिकरण्यज्ञानादेवानुमितिः पगतव्यतिका रु
व्याप्यत्वसमानाधिकरण्याप्रवृत्तिनियामितानवच्छेदकसाध्यतावच्छेदकत्वरूपस्य सिद्धान्तस्यापि निर्वाच्यत्वादव्यभिचारस्य सर्वत्रैव सुग्रहत्वात् साध्यस्य केव
लान्वयित्वग्रहदशायामनुमितिमनंगीकुर्वतोः साध्याभाववद्वृत्तित्वरूपाव्यभिचारज्ञानस्यानुमितिसामान्यहेतुत्वस्वीकारेऽपि बाधकाभावादिति भावः। ननु हेतु
तावच्छेदकाग्रहस्थले व्यभिचारग्रहाभावसहितसाध्यसामानाधिकरण्यप्रकारकपक्षधर्मताज्ञानादेवानुमितिः संभवतीति तत्रापि व्यभिचारज्ञानहेतुत्व
स मसिद्धं एवं समानाधिकरणादित्रिविधानुमितौ व्यभिचारज्ञानस्य हेतुतायाः संभावनाकृतं तत्र हेतुतावच्छेदकस्य सामानाधिकरण्यधर्मिता राम·
वच्छेदकविधया विषयतायाश्च वृत्तपनिवेशनीयतया हेतुतावच्छेदकधर्मप्रकारकज्ञानं विनाप्यनुमितिर्भवत्येवेत्यत आह विवरते चेति केवलान्वय
नुमानानभ्युपगन्तारो व्यतिरेकः। तथा च सामानाधिकरण्यज्ञानस्यापि हेतुतायां व्यभिचारज्ञानहेतुतावादिभिरुपगम्यतेऽनुमानापेक्षया व्यभि रु

ग्र १

चारज्ञानस्थले व्यभिचारग्रहहेतुतां कल्पयतः सामानाधिकरण्यमात्रस्य व्याप्तित्वं मन्यमानस्य मते गौरवाभावेऽपि साध्याभाववद्वृत्तित्वरूपाव्य
भिचारज्ञानहेतुतावादिनां मतापेक्षया कारणतापक्षकल्पने गौरवं दुर्वारमेवेति भावः। हेतुव्यापकसाध्यसामानाधिकरण्यरूपव्याप्तिज्ञानहेतुतावादि
नां सिद्धान्तिनां मतेऽपि तन्मतापेक्षया लाघवमाह व्यभिचारज्ञानेति सिद्धान्तिमते व्यभिचारसामानाधिकरण्यज्ञानयोर्नैकारणताद्वयस्यापि तुल्यसमानाधिक
रणाभावप्रतियोगितानवच्छेदकत्वरूपाव्यभिचारविषयतानिरूपितत्वे साध्यसामानाधिकरण्यज्ञानहेतुतावच्छेदककोटिप्रविष्टसाध्यतावच्छेदकविष
यतायां निवेशनीयतया च कारणतायां लाघवमहत्त्वमेवेति भावः। एतन्मतावच्छेदं पक्षभेदेन साध्यसमानाधिकरणहेतुमत्त्वाज्ञानहेतुताना
मानेत्यान्तराव्यभिचारविषयतानिवेशोऽनन्तस्थलेऽवच्छेदकगौरवं निरुक्तसाध्यतावच्छेदकविषयितायां निरुक्ताव्यभिचारविषयतायां निरूपितत्वस्य
१० अव्यभिचारविषयितायां वा साध्यतावच्छेदकविषयितानिरूपितत्वे निवेशनं तत्रत्र विनिगमनाविरहेणानेनपक्षभेदेनानेककारणताविकल्पे चेति पक्षविशे
षेऽनन्तभावः साध्यसामान्यतल्लिंगकतत्साध्यकानुमितौ तल्लिंगधर्मिकतत्साध्यकव्यभिचारज्ञानाभावत्वेनैककारणताकल्पनमेव सम्यक् तत्रतत्रैकेवि
शेषव्यभिचारग्रहस्य प्रतिबन्धकताकल्पनात् प्रतिबन्धकत्वेन संभवति पूर्वपक्षे शब्दे तत्पूर्वे व्यभिचारस्य व्यभिचारज्ञानसत्त्वेऽपि व्यभि
२५ भावकल्पनायामनुपपत्तिः कारणस्थले एकतरावच्छिन्ने व्याप्यमिव्यभिचारग्रहसत्त्वेऽपि शरीरान्तरावच्छिन्ने तदनुमित्युत्पत्तिरिति शरीरविशेषावच्छिन्न
त्वं निवेशनीयमित्यनिष्टप्रसङ्गात् व्यभिचारग्रहस्य प्रतिबन्धकतायां आत्मत्वा च वैजात्य शरीरभेदेनैकभावस्यानेनहेतुतापेक्षया सामानाधिकरण्यसमानाधि
नावच्छेदकत्वोपपत्तेः सत्या अवश्यकल्प्यसामानाधिकरण्यज्ञानहेतुतायामव्यभिचारविषयत्वनिवेशनेऽपि लघीयान् न च समवायसंबन्धावच्छिन्नप्रति न·
योगिताकव्यभिचारग्रहविरहस्य सामानाधिकरण्यसमानावच्छेदकत्वेन व्यापकसंबन्धेन कारणताकल्पनेनैव सामञ्जस्यात्ततोऽपि हेतुतामते पि शरीरभेदनिवेश
नेनाप्ततीतिवाच्यं तत्र व्यासमितत्तच्छरीरावच्छेदेन तदात्मनि व्यभिचारधीसत्त्वेऽपि तत्त्वावच्छिन्नतदभावस्याभावविच्छेदेनात्मनि तदभावस्य शरीरावच्छेदेन

४८

शि॰टी॰ वत्तेस्तत्वाराव्वच्छेदेनतदात्मत्वानुमित्यापत्तेर्दुर्वारत्वात् उभयपक्षत्वासत्वच्छिन्नैकहेतुतास्यलेऽपकारणतानेकत्वे भयाधिकरणप्रत्यासत्त्याकार्यतावच्छि
योजकतयास्त्रव्यभिचारविषयकसामानाधिकरण्यज्ञानेपक्षकापक्षद्वयत्वेतदात्मनिष्ठतातावच्छेदेननद्वयावच्छेदेनचपर्याप्तप्रवेशकत्वेपक्षतां न
रेतन्नैतद्ग्रावच्छेदेनतदात्मत्वानुमित्यापत्त्यनवकाशः।व्याप्तभेदेनज्ञानत्वकिंभेदादितिज्ञानहेतुतापक्षशरीरेभेदनिवेशमंतरेणैवोपपत्तिरधिकरण
भेदेप्यभावव्यक्तिभेदाभावेनव्यभिचारज्ञानाभावहेतुतामतेषु।भेदनिवेशनेविनाऽतिप्रसंगवारणोपपत्तेरपोगतनचपदेशावच्छेदेनपक्षपरत्वधिक
रणोकार्यतावच्छेदेननतद्व्यवहितपूर्वक्षणोनतदधिकरणोकारणमित्येतादृशावच्छेदकोभूतदेशघटितव्यापकतापटितंकारणत्वेव्यभिचारग्रहेस्वा
त्रिमतेनादृशकारणताश्रयमतेदृशावच्छेदेनतदधिकरणासत्वेनदेशावच्छिन्नतदधिकरणोनिरुक्तकार्यत्वात्तत्रमितितच्छरीरावच्छेदेनतदात्मनिव्यभि
चारग्रहदर्शोपांतदवच्छेदेनतदात्मनितद्ग्रहस्यदुर्लभतयानोक्तातिप्रसंगइतिवा।एवमपिपक्षमहाशरीर[redacted] नाशस्याद्धेरशरीरस्यैवोत्पाददृष्टापांव
भिचार ग्रहस्तत्रस्तंडशरीरोत्पादद्वितीयक्षणोत्तरावच्छेदेनानुमित्यापत्तेर्व्यभिचारग्रहहेतुतावादिनोदुर्वारत्वात्तच्छरीरस्यव्यभिचारग्रहपूर्वकाले
स नत्वेनव्यभिचारग्रहानवच्छेदकतयात्तदवच्छेदेननतद्ग्रहस्यात्मनि[redacted]त्वात्तन्नतदाव्यभिचारग्रहएवनसंभवतिशरीरस्वरूपकारणविरहादित्याशंकाशरी
वयंसाधारणावेशावत्वस्यैवज्ञानजननेनोपाधिकतयापरिगणितत्वेपितदपवावच्छेदेनेवज्ञानोत्पत्तिःसंभवतीत्याहुः।व्यभिचारग्रहस्यानुमितिहेतुतामतेऽत्र
नुमितिसामग्र्याश्चाधिककारणचरितत्वपाभिन्नविषयकप्रत्यक्षादौतत्प्रतिबंधकतायांगौरवमित्यन्येत्रव्यभिचारग्रहहेतुतामते[redacted]तन्त्रसंप्रदायान्यप्र त
वेशप्रयुक्तगौरवमाशंकतेऽन्व्यभिचारनिरूपकत्वेनेतिव्यभिचारप्रकारकाव्यभिमिचारप्रकारकज्ञानत्वेनेत्यर्थः।गौरवमितिव्यभिचारग्रहहेतुता
मतेव्यभिचारसंशयस्यापिप्र तिबंधकत्वेनतत्साधारणव्यभिचारग्रहत्वावच्छिन्नाभावस्यैवहेतुतयाव्यभिचारग्रहेसंशयभेदानिवेशेनलाघवादि ११०
तिभावः।व्यभिचारज्ञानप्रतिबंधकतामतेव्यभिचारज्ञानेचनिरूप्यत्वानिवेशेपिज्ञानेऽसंकीर्णज्ञानेनिरूप्यत्वस्यनिवेशाभावपतयागौरवमि
वं

श्री

निरूमाधन्नेव्यभिचारज्ञानस्येतिध्वमत्वनिरूपकचापामेवेत्येवकारेणानन्तत्रापरज्ञानमनुमित्यविरोधित्वमवच्छेदः।अत्रयामाण्यशंकयानिश्चितस्या
पिविषयस्यसंशयोत्पत्तेस्तच्छेकाकलंकितस्यनिरूपकार्यकार्यकारित्वम त्रनास्तीतितत्याविधस्यव्यभिचारग्रहस्यन तत्संशयोत्तरवदनुमितिप्रतिबंध
कताप्रौढ्यादितिभावः।भ्रमत्वेनानिश्चीयमानस्यभ्रमत्वनिरूपत्वावच्छिन्नाभावविशिष्टस्यविरोधित्वेभवतावाच्यंभ्रमत्वशंकापामपीतितच्छेकाकलंकित
नज्ञानस्यविरोधप्रकारकस्यापिनिरूपकार्यासमर्थत्वादितिभावः।अपिकाराः नचनिरूपदर्शसमुच्चयःध्वमत्वेनागतत्वमात्रस्येतिध्वमत्वज्ञानत्वाव
ष्य च्छिन्नाभावविशिष्टस्येत्यर्थःएवकारेणात[redacted]पत्वावच्छिन्नाभावविशिष्टस्यकारणतावच्छेदकत्वमवच्छेदेतेवैवेतिव्यभिचारग्रहहेतुतावादिनएवेत्यर्थः
गौरवादितिव्यभिचारवद्विशेष्यकत्वावच्छिन्नाव्यभिचारप्रकारकत्वप्रकार[redacted]कज्ञानाभावविशि ष्टव्यभिचारप्रकारका[redacted]व्यभिचारज्ञानत्वाप ष
त्यापत्रव्यभिचारवद्विशेष्यकत्वावच्छिन्नव्यभिचारप्रकारकत्वाभावप्रकारकाव्यभिचारवद्विशेष्यक[redacted]वच्छिन्नव्यभिचारप्रकारकत्वप्रकारकज्ञा ला
न[redacted]त्वावच्छिन्नाभावविशिष्टव्यभिचारज्ञानत्वावच्छिन्नाभावत्वस्वरूपकारणतावच्छेदकस्यगुरुशरीरत्वादितिभावःनचभ्रमत्वज्ञानाकंदितस्वविष
फ यभ्रमत्वज्ञानस्यापामाण्यव्यभिचारज्ञानस्यानुमितिजनकत्व पातद्वच्छेदकभावप्रतियोगिनिभ्रमत्वज्ञानेध्वमत्वोनायग्रहाभावविशिष्टत्वनिवेशपतार
ग्रहस्यचनिरूपत्वेनैवाभावेनिवेश्यःध्वमत्वशंकाकलंकितस्यापिप्रामाण्यध्वमत्वग्रहस्यध्वमत्वसंशयोत्तरवदनुमितिप्रतिबंधकत्वादिति व्य
ह भिचारग्रहेहेतुतामतेगौरवंव्यभिचारग्रहेनैककध्वमत्वनिरूपध्वमत्वोनायग्रहस्यसंशयसाधारणतत्वेनत्वेनैवाभावनिवेशादितिवाच्यंअप्रामाण्य
हेअप्रामाण्यांतरग्रहाभावनिवेशनतत्राप्यप्रामाण्यांतरग्रहाभावस्यनिवेशनीयतयानवस्थाप्रसंगनिरूपत्वनिवेशेनलाघवविरहात्तत्वावच्छेदकको
टिप्रविष्टाप्रामाण्यग्रहाभावमेवैकंपरिष्कृत्यनिरूपत्वनिवेशेनउभयमतेसमानंश्वव्यभिचारग्रहहेतुतामतेपुनर्व्यभिचारग्रहेनि[illegible]पत्वनिवे ष्य
शानमधिकमितिविशेष्याव्यभिचारविशिष्टवैशिष्ट्यज्ञानत्वेनैवहेतुतापावकत्वतपानत्वंशापेचनाधिक्यवैशिष्ट्यावगाहित्वानुपेगमेपीयावव्यभिच

BHAU DAJI MEMORIAL

हि १२

६ नि

शि॰टी॰ रसंशयादनुमितिकारणसंभवेन दर्शने निष्कम्पत्वस्यानिवेशात् व्यभिचारज्ञानविषयकाप्रामाण्यग्रहे प्रामाण्यग्रहसत्वेप्यनुमित्युत्पादानुपपत्तेर्ना
प्रामाण्यग्रहे व्यप्रामाण्यतरपहाभावस्य न विशेषणत्वमन्यथा विशेषणानवस्थाप्रसंगादित्यपि वदंतो गौरवांतरेण व्यभिचारग्रहप्रतिबंधकतामते ह
षयतामत्ये वा मतं आह। नानाविधेति हेतुनिष्ठसाध्याभाववद्वृत्तित्व साध्यनावच्छेदक निष्ठहेतुसमानाधिकरण्याभाववद्वृत्तियोगिताव्च्छेदकत्वतादृशप्र
कृ॰ तियोगितानिष्ठसाध्यतावच्छेदकावच्छिन्नत्वादि रूपबहुविधेत्यर्थः। यत्किंचिदेकविधव्यभिचारग्रहदशायामेवानुमित्यनुत्पादस्यानुभविकतया सर्व
विधव्यभिचारज्ञानस्यैव पृथक्पृथक्कार्तिबंधकतापार्श्वावश्यकत्वादिति भावः। निपतत्ववंबतिलेन मानाभावादिति व्यभिचारज्ञानहेतुतामतेपि कृ॰
तद्धेतुभूतत्तथा तत्तद्व्यभिचारज्ञानाभावानामनुमितौ नियतपूर्ववर्तित्वादि मि भावः। एतेन बहुव्वनन्यथासिद्धकल्पनमपेक्ष्य एकधर्मावच्छिन्नेनिय
तपूर्ववर्तिनामस्तु तत्त्कल्पनएव लाघवमिति ध्वनितं व स्यमाणोक विधेति केवलान्वयिवंदेनावसरेणाप्याभाववदर्वृत्तित्वरूपलवुशौ [redacted]
नेकृनुनेष्वेसकलव्यभिचारज्ञानदशायामनुमितिकारणसंभवात् व्यभिचारं
नरापेक्षपानपुरीरलाघवस्यैव विनिगमकतया विनिगमनाविरहेणनानाविधाव्यभिचारभियामेव कारणत्वमित्यस्यापि वक्तुमशक्यत्वादिति भावः
क आहुरित्यस्वारसियुद्धवंनतदोजतुत्समानप्रकारेतया व्यभिचाराग्रहस्य साक्तादुक्ताव्यभिचारज्ञानाप्रतिबंधकतया व्यभिचारान्तरघटितायाउक्ताव्यभि
चारज्ञाने सत्वे अनुमितिप्रकारेणारा व्यभिचारान्तरग्रहस्यानुमितिविरोधितायाभवतेवोपेहितत्वादस्माकमपितत्कृशाराशाव्याभाववद्वृत्तित्वरूप पु
ग॰ व्यभिचाराग्रहाभाववद्वहेतुरितिवक्तुंशक्यतयाउक्तलाघवानवकाशः व्यभिचारान्तरग्रहदशायामुक्ताव्यभिचारग्रहासत्वेअनुमित्यनुत्पादोनुभवसिद्ध
इनिचेन्नहि व्यभिचारग्रहासत्वएवतदनुत्पादोऽनुभवसिद्धस्तु समरीपमुक्तिरेवज्ञानन्नितिकिमेतावतापपासेनेति नतु केवलसामानाधिकरण्ये एम॰
स्याव्यभिलेदव्यत्वादिनादूरदोषे व्याप्यनुमानापत्तिरेवनाधिकातहारणपसाध्यसामानाधिकरण्यविशिष्टहेतुमज्ज्ञानस्यैवानुमितिहेतुत्वमुपेय

राव्यभिचारस रागतः श्रृंखा तारज्ञानस्यापिसर्वद ... पिनद्रयग्रह प्राग
नयो ७

तोकिमव्यभिचारज्ञानहेतुतयादूरदोषेवद्विश्वस्येवद्विसामानाधिकरण्यविशिष्टवैशिष्ट्यामत्वात् व्यभि[illegible]चारिण्यपिसाध्यसामानाधिकरण्यविशिष्टहे
तुमज्ज्ञानस्यसाध्यवत्वेनसत्वात्पहेविशिष्टवैशिष्ट्यग्रहेहेतौव्यभिचारग्रहेप्यनुमितिरिष्टैवसामानाधिकरण्यविशिष्टहेतुवैशिष्ट्यस्याव्यभिचारोविशिष्टवैशि
ष्ट्यनुमत्वादित्याशंकायामाहारतिसामानाधिकरण्यविशिष्टपक्षधर्मत्वमितिपदे साध्यसामानाधिकरण्यविशिष्टवैशिष्ट्यमित्यर्थः॥ ॥पक्षेसाध्यग्रहे वि
नासाध्यनिष्कंपविशादुग्रहादर्शनिष्कंपसाध्यसंदेहशायांसाध्यसामानाधिकरण्यस्यापिसंदेहश्चोत्सर्गिकःसत्साध्यमिष्कंपेनैवभाववन्तकधर्मदर्शिदर्श
ध नविषयामिवर्तनात्। इतिभावः। निष्कावाधोन्याश्रयान्नतसामानाधिकरण्यविशिष्टवैशिष्ट्यसनिष्कंपस्यनिष्कंपहेतुतानसंभवतीत्याशयः। अयमपपूर्ववंतेवहि
[illegible]संदेहदशायांनिष्कंपसाध्यकसमहानसादिहृत्तितयागृहमाणपक्षवृत्तीपक्षममध्येवहिसामानाधिकरण्यसंदेहश्चोत्सर्गिकइतितन्नांनत
सामानाधिकरण्येपत्वक्षितनधमवसानिष्कंपोदृढंदेहतिकपमव्यभिचारितसाध्यसामानाधिकरण्यप्रकारकहेतुमज्ज्ञानहेतुतापक्षएवपरीकारः इति
चेन्महानसीयधमस्ताद्यशने हतौवह्निसामानाधिकरण्यनिश्चयमानेलाघवज्ञानाधीनाकूमत्वावह्निवत्यत्वनिष्कंपत्वविशेषदर्शनतस्त्वदेव हैनैव हेतु
तनिश्चयोनैधूमत्वदर्शनविषयपरीपधूमेपिसाध्यसामानाधिकरण्यसंशयायोगात् धूमत्वावपकसाध्यसमानाधिकरणहेतिलोपजाहितधूमत्वस्या
मित्वपक्षेतत्प्रकारकेहेतुमत्[illegible]पक्षे साध्यसंदेहदशायामपिनिष्कंपस्यनिष्कंपत्वतयाऽनुपपत्त्यनवकाशात् साध्यस्यकेवलान्वयित्वज्ञानकालीनापम
नुमितौकेवलान्वयिसाध्यसामानाधिकरण्यज्ञानेमतारत्स्येवसाध्यवदन्याहमित्वज्ञानंहेतुःनुतिमतेसाध्यवगतकिंचिद्घतिमित्यहेतौनानाधिकरणकसा
ध्यकेहेतावव्याप्त्यभावोकासाध्यवदन्यत्वस्यसाध्यतावच्छेदकविशिष्टावच्छिन्नेरुपत्वेनस्यानवकाशतत्वंपनिहृतिमतापेहृयामविगतनिर्णक
तेनिकेवलान्वयित्वेतिसाध्यस्यादि॥ ॥अनुमित्यनुत्पत्तेरितिसाध्यसामानाधिकरण्यमात्रग्रहस्यव्यभिचारग्रहाविरोधित्वादितिभावः। नन्वहोपिसाध्यके
वलान्वयित्वग्रहोपिवाच्यःहेतुर्वाच्यःपक्षपिसमनेत्यहतिगनादेःस्वाभावाभावत्वविरहात्वंतताभावेहहेत्विमत्वमनिवेशस्यैवतद[illegible]र्णाकेवलान्वयित्वं

भावसाधा

शि॰टी॰ सवचनं तथापि सांप्रदायिकानुमननहेतिन केवलान्वयित्वशरीरे साध्यसाधनवत्ताबुद्धेर्विशाललोपगमेनैव व्यापकतापर्य्यवसानं भवति स्वमते पुनस्तेन
भावांशे साधनवद्वृत्तित्वविशेषणप्रवेशे पे तौ वे नित्यांप्रदायिकानुमननमेव केवलान्वयित्वे दर्शयति॥ ॥हेतुमित्यादि तेनेति स्वादिपदात्रिविष्ठहेस्वमताद्दृशाभाव
प्रतियोगितानवच्छेदकधर्मवत्त्वस्य परिग्रहः। अन्योन्याभावघटितव्यापकतापर्य्यवसानापत्तेर्घटितमपि केवलान्वयित्वमहान्योन्याभावेतिगगना
देः स्वात्यन्ताभावप्रतियोगित्वानुरोधेन तदभावत्वस्वीकारेपि तद्वदन्योन्याभावत्वस्य सामानिकमित्यन्योन्याभावे तन्निमत्वमव्यावर्त्तकं यान्तोपात्तं
सर्वसाधारणपक्षसाध्यव्यतिरेकित्वग्रहकालीनानुमितिकारणीभूतज्ञानविषयत्वनिर्वाहाय पत्ताघवात्साध्यवदन्याहृत्तित्वज्ञाने हेतुत्वंन
कल्पनालाघवात्साधनेति साधनवदेः त्यन्ताभावविशेषणीभूतापादृत्तेः साधनवद्वृत्तितापान्नैन्योन्याभावस्यवा विशेषणत्वमुचितमत तथाचतु
अतएवत्यादिनाव्यस्मामारणामितिदानितिमतरः वपर्य्यवसानं अन्यथा कार्य्यकारणभावकल्पनागौरवप्रसंगादित्यर्थः॥ ॥शेषमिति साध्यकेवलान्वयित्व
क्ष ग्रहदशायां तस्य पक्षे अननुमितावपि न[illegible]तिलदानो केवलान्वयित्वेन हेतुतासाध्यपक्षकपक्षहृत्तित्वानुमित्यैव पक्षे साध्यवत्तानिश्चयकार्य्यसंभवात्।
तथाच साध्यवदन्याहृत्तित्वमेवानुमित्यौपयिकं लघुशरीरत्वादित्यादिकमित्यर्थः॥ व्याप्तिपूर्वपक्षग्रंथः संपूर्णः॥ ॥ ॥
थ॥ ॥व्याप्तिपूर्वपक्षस्यपंसमपूर्णः॥ ॥प्रतियोगितावच्छेदकावच्छिन्नेपन्नभवतीति पक्षपूरण[illegible] साध्ये प्रतियोगितावच्छेदकावच्छिन्नान्यत्वप्र
तीपते तत्वं वन्हिमान्धूमादित्यादौ हेतुसमानाधिकरणमहानसीयवन्हित्वावच्छिन्नाभावमादाय दोषो दुर्वारः सर्वेषामेव प्रागादीनां तादृशाभा
वप्रतियोगितावच्छेदकविशिष्टत्वपात्तस्यत्वासंभवात्। पत्र[illegible]वच्छिन्नपरं तेन[illegible]रूपावच्छिन्नस्य प्रतियोगितावच्छेदकाः पेये धर्म्मा प्रत्येकं तत्वावच्छि
न्नान्यत्वमित्यर्थः साध्यतावच्छेदकस्य तत्तत्प्रतियोगितावच्छेदकावच्छिन्नभेदकूटेन प्रत्येकं सामानाधिकरण्यपर्य्यवसितेन [illegible]ल्वादिसाध्यके हेतौ वन्हित्वा
द्ववि[illegible] दिमत्तत्तद्भावेन महानसीयवन्हित्वावच्छिन्नभेदः प्रत्येकं सामानाधिकरण्यस्य [illegible]कसत्वादित्व साध्यके सत्तादौ हेतुमन्नि

ष्ठाभावप्रतियोगितावच्छेदकविशिष्टसत्ताघवच्छिन्नभेदसामानाधिकरण्यसत्वात् व्याप्तिः परूपावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नावि
षयकप्रतीतिविषयत्वमर्थः उक्तदोषोद्धारे पि परूपप्रतियोगितावच्छेदकविशिष्टप्रतियोगितावच्छेदकाविषयकप्रतीतिविषयो वाऽत्वतएवमामंज
क स्यप्रतियोगितावच्छेदकविशिष्टविषयतीतिविषयत्वस्य साध्यतावच्छेदकविशिष्टे निवेशनमनुचितं एवं स्वरूपसंबंधरूपावच्छिन्नत्वविवक्षया
परूपावच्छिन्नप्रतियोगित्वं उक्ताभावप्रतियोगितावच्छेदकानवच्छिन्नमित्यर्थः शुद्धवन्हित्वादिरूप साध्यतावच्छेदकावच्छिन्नप्रतियोगित्वमहान
हे सीयत्वादिविशिष्टवन्हित्वावघनपच्छेदत्वसत्वमेव परूपावच्छिन्नप्रतियोगित्वं तादृशप्रतियोगितामितिमिश्र[illegible] समवायादिना[illegible] साध्यसंयो
गादिना घटादितावतिव्याप्तिः संयोगादिसंबंधावच्छिन्नघटत्वावच्छिन्नप्रतियोगितायां हेतुमन्निष्ठाभावप्रतियोगितामेदसत्वात[illegible]वाच्येऽप्प
वादित्यादावव्याप्तिवारणाय हेतुमन्निष्ठाभावप्रतियोगितायां साध्यतावच्छेदकसंबंधावच्छिन्नत्वस्य निवेशनीयतया अभिवारिमाद्य एव संबंधोतत्र
वच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगितायां साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगितामेदसत्वेनातिव्याप्तिः [illegible] त्यादिनिष्प्रतियोगिता
भेद मु[illegible]सा ध्यतावच्छेदकावच्छिन्नप्रतियोगितायां निवेश्यातिव्याप्तिवारणे केवलान्वयिसाध्यके तादृशप्रतियोगितानुप्रसिध्याऽव्याप्तिरिति शि
त्यामिश्रव्याख्यापरिष्कारोपि गौरवमिति सुधाध्याचोपदिष्टनये नत्वासमवत्वेत्यत्राह ऐ प्रतियोग्यसमानाधिकरणेतिनच नैव्यत्वासेन साध्यतावच्छे
दके प्रतियोगितावच्छेदकभेदनिवेशोपि शुद्धवन्हित्वादौ महानसीयत्वादिविशिष्टवन्हित्वादिभेदस्यासत्वात साध्यतावच्छेदके प्रतियोगितावच्छेदका
विषयकप्रविषयत्वमेव विवक्षणीयं तदपेक्षया साध्यतावच्छेदकावच्छिन्नप्रतियोगितायां प्रतियोगितावच्छेदकानवच्छेदत्वनिवेशपक्षे न गौरवमि
टा तिचायं प्रत्येके घटादौ घटपदमपत्ताघवच्छिन्नभेदवत्त्वशुद्धवन्हित्वादौ महानसीयत्वाद्येतन्मौ[illegible]ऽतादृशावच्छेदकतादृशावच्छेदकत्वयोरुच्यम
तैर्विनिशः सिद्धभागे अवच्छिन्नत्वं अभावः प्रतियोगिताख्यवच्छिन्नत्वेऽतावच्छेदकं तं तद्धर्मावच्छिन्नकारमतेपि विषयकत्वं तदत्र अवच्छेदकत्वं प्रतीतिविषय
प्रतियोगितावच्छेदकावच्छिन्नभेदोपादानं ६ साध्यतावच्छेदक[illegible] संबंधावच्छिन्नत्वं ९ ग्र २

या
न्या य

गा.दी. कं वह्नित्वमनुपधायमितिपुंसतैवनन्तदंपेस्याम्यमिश्रमते गौरवमप्रत्यक्षमितिविशिष्टवह्न्याद्यभावीयप्रतियोगितावच्छेदकत्वावच्छिन्नभेदस्य सत्त्वात [redacted]त्व
वच्छेदकाविषयकप्रतीतिविषयत्वविवक्षणे मते रौरवपूतीकारानाम्नवच्छेदकत्वस्य वह्नित्वमहानसीयत्वादिविशिष्टस्य संबंधादिभेदेन भिन्नत्वे पितत्वप्र
तियोगितावच्छेदकत्वलाघवानुगमतद्रूपेणाभासस्यपद्धतितोऽस्य कवह्नित्वत्वेन वह्नित्वादेरवच्छेदकत्वपर्याप्त्यनधिकरणत्वमुपपादितवतोऽदाधितिका
रस्याभिमतत्वात्तस्याप्युभौ मैत्त्व विशेषधर्मविशिष्टप्रतियोगिताकदाननिति सामान्यधर्मावच्छिन्नप्रतियोगितासंबंधस्य विशेषरूपेणाभासस्यपदृतेऽपि सा
मान्यधर्मावच्छिन्नप्रतियोगितासंबंधेनानुगतेनाभासस्यपदृतित्वमितिकंठरवेणैवोक्तेः एवं सति महानसीयवह्निभिन्नवह्निमान् धूमादित्यादौ साध्यताव
च्छेदकमहानसीयवह्निभिन्नत्वविशिष्टवह्नित्वादौ वा कमादिसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वपर्याप्त्यनधिकरणत्वेऽपि तद्रूपतानुमितिवि
धेयतावच्छेदकतापर्याप्त्यधिकरणरूपावच्छिन्नपर्याप्तानारूपावच्छिन्नानुयोगिताकतादृशावच्छेदकत्वावच्छिन्नभेदस्यैव व्याप्तिघटकत्वोपगमे नातिव्याप्तिः
उक्तस्थलीयानुमितिविधेयतावच्छेदकतापर्याप्त्यवच्छेदकधर्मितधर्मरूपनिरूढिलावच्छिन्नहेतुसम्बन्धिग्राभावप्रतियोगितावच्छेदकत्वपर्याप्त्यधिकरणतावि
दह्नि.वदं तोऽधेनतदवच्छिन्नभेदासत्वात्साध्यतावच्छेदकवह्नित्वमहानसीयवह्निभिन्नवह्नि त्वोभयपर्याप्तिः पर्याप्तिकालेतदवच्छिन्नेनावच्छेदकत्वपर्याप्त्यनुपपत्तिः त
व नुमित्यनुसारेण व्यापकतासानकारणतावादिनामिष्टत्वेन तद्रूपावच्छेदकत्वा[redacted]करणानुरूपावच्छिन्नविधेयतावच्छेदक ता
ताकानुमित्यनुपपत्तिकेवलान्वयिग्रंथग्रंथकतैवव्यवहृतेपत्वतत्त्वेनहतोनिरूढहेतुव्यक्तिभेदेन व्याप्तिभिन्नविषयतासाचनानुमितिप्रयोगिनापत्तिपक्ष [redacted] दें
[redacted]मादिव्यक्तिव्यापकतायाःपृथवे घटादावादिरूपत्वादितियदपविशिष्टत्वस्यक्तंतथाचधूमत्वादिरूपहेतुतावच्छेदकधर्मनिविशिष्टा
निवेशनस्यावच्छिन्नहेतुकानुमित्यापादकव्याप्तिनिर्वाच्यामहानसादौ धूमवन्त्वादिसहचारग्रहाद् हेतौ तद्धूमलाघवावच्छिन्नहेतिव्याप्तेःपक्षधर्म
धूमेयहेतुमितिनिर्वाहः निमावः न च सामानाधिकरण्यस्य व्याप्तिघटकहेतुव्यक्तिभेदेन व्याप्तिभेदवावश्यकत्वेति अनुगतरूपेणाहेतुनिवेशोऽव्य

ग्रहाद्

धर्मइति वा अर्हेतुव्यक्तिभेदेन व्याप्तिभेदेऽपि अननुगतत्वेनाहेतुनिवेशकम व्यापकवह्निप्रतियोगिकत्वमनिष्टसामानाधिकरण्यत्वात्तथा धूमादिनिष्ट
सकलवह्निसामानाधिकरण्यव्यक्तानामननुगमात् सामान्यघटासत्वापत्तीपदेहेतुनिष्टव्याप्तिपिण्डमर्थे अनुगतसामानाधिकरण्यत्वरूपसामानाधिकरण्येनसकलसम
वेनानुमित्युपपत्तेः न च व्यक्तिभेदेन हेतुनिवेशे अननुगमात् सामान्यघटसत्वापत्तिपदेहेतुनिष्ठव्याप्ते व्याप्तित्वे न दुर्ग्रहत्वात् अनुमित्यनुपपत्तेः हेतुतावच्छेदकाव्य
पायकरूपानुगमस्य नादेहि शिष्टनिरूपितानाधिकरणत्वघटकप्रयोजनमग्रेवक्ष्यते प्रतियोगितानवच्छेदकत्वमात्रेणसाध्यतावच्छेदकनिवेशे गौरवात् आ
दिनावह्निमादिरूपदण्डिकमनवगाहमानानात्प्रतियोगितानवच्छेदकवत्सामानाधिकरण्यवानित्यादिज्ञानाद् हि यानि त्याअनुमितिः स्यात् न चेष्टापत्ति
सभवः कदाचिदपि तेन कदापि दण्डेत्यादिनाव अनुमितिरितिनियमानुपपत्तेः न च अनवच्छेदकत्वे न तद् भाविता हितुमेव व्याप्तिग्रहस्यानुमितौ वि
धेयतावच्छेदकतया तदभेदेनविधायकमितिवाचं अवच्छेदकत्वेन वह्नित्वादि भानेऽप्यत्वादिभानस्यापि प्रकारः सम्भवात् तदनन्तसाध्यतावच्छेदकावच्छिन्न
भ मिवाचितया हेतुत्वानस्य हेतुसामानाधिकरण्याभावप्रतियोगितानवच्छेदकत्वमात्रानन्तसाध्यतावच्छेदकावगाहिव्याप्तित्वाद्विरोधिमपाविशि
ष्टसाध्यतावच्छेदकानवगाहिव्याप्तिज्ञानस्य हेतुत्वेव्याप्तिमितात्संहेतावनुपपत्तेर्व्याप्तिविशिष्टसाध्यतावच्छेदकस्य व्याप्तिघटकतालाभाय प
प्रतियोगितानवच्छेदकाधच्छिन्नेतुत्वाद्यतियोगितावच्छेदकसंबंधलत्वाच्छिन्नेनत्वुक्तं यत्र वह्नित्वत्वादिविशेषणावच्छिन्नस्य साध्यतावच्छेद
कत्वं तत्रैतेन तद्रूपतोऽवतत्वनमतीत्याप्तिघटकतापत्त्वरूपनपवह्नित्वादिनातत्तद्विधेयत्वानुत्वरूपत्वात् न वच्छेदकत्वरूपविशेषणपुर
स्कारेणाभानेनिर्विशेषणाकमानात्मकस्यतद्रूपतोभानस्यासंभवात् व स्यादेतत्वात्रित्वस्य वह्नित्वादिमात्रेति धर्मैतासाधारणपितन्यात्रेपुरस्का
रेणाव्यापकत्वावच्छेदकत्वग्रहस्यापि वह्नित्वादिवच्छिन्नविधेयताकानुमितिहेतुत्वमुपपन्नेमकलिवत्त्वादितित्वविषयतानिवेशे गौरवात् मक
वत्त्वादिवह्नित्वस्यवन्त्वादौ नातिसाधारणतयातन्मात्रपुरस्कारेणाव्यापकतावच्छेदकत्वग्रहस्याहेतुत्वसंभवः न याम तिरं धनादिहेतुनापि

ग.टी. वह्निव्याप्यवद्धूमत्वानुमितिप्रसंगात् ।सकलवृत्त्यादिवृत्तित्वघटितदीर्घव्यादि व्यापकतावच्छेदकत्वसत्त्वात् वह्नित्वादिनिष्ठत्वव्याप्तिलक्षण मतानुका
वच्छेदकज्ञानि त्वादेर्वह्नित्वादिमात्रवृत्तित्वेपि तेन रूपेण व्यापकतावच्छेदकत्वाग्रहाद् वह्निमान् इत्याद्यनुमितिरनुभवविरुद्धा येन रूपेणापि स्थितेव
न्स्वादीनां साध्यत्वे प्रयोजनाभावे तत्प्रकारेण व्यापकतावच्छेदकत्वग्रहादेवानुमित्युत्पादानुभवात् । अत एव ज्ञानत्वत्वानु ... व्यापकगुण
त्वव्याप्यजातित्वयोरविशेषेण ज्ञानत्वत्वरूपेण व्यापकतावच्छेदकत्वग्रहात् ज्ञानवानयमित्यनुमितिर्न भवितुमर्हतीति दीधितिकारस्याभिप्राय
प्रसंगे भूयिकमप्यवस्थानः । ननु शुद्धिसामानाधिकरण्यं न तत्र घटकं गमकत्वप्रयोजकं पर्वतीयपक्षमेघ... सामानाधिकरण्यग्रहे पितत:
[illegible] पर्वतीयपक्षमे पर्वतीयवह्निसामानाधिकरण्यग्रहे पितेत्यादि तिनरूपावच्छिन्नविषयताकमविच्छिन्नविषयताकवह्निवत्त्वं करणग्रहादित्यर्थला सामा
स्ती घवज्ञानादिवशान्महानसे पर्वतीयानुमितिरिति दर्शयति पर्वतेनेत्यादिना पर्वतीयत्वप्रकारविशिष्टतद्धूमावच्छिन्नप्रतियोगितानिरूपकतावपरि
काव्याप्तिरित्यर्थः प्रयोज्यत्वे एकसाध्यक्षिसामानाधिकरण्यस्यापरस्याप्यक्षिप्रतियोगिकत्वासंभवेनासंगतिः । पत्रेके कसाध्यतावच्छेदककाक्षिस
मानाधिकरण्यस्यापरसाध्याक्षिप्रतियोगिकत्वासंभवेनासंगतिः पत्रैकैकसाध्यतावच्छेदकव्यक्तिनां सकलहेतुमद्वृत्तिभावकोटिकावृत्ताजातरूपा मु
वच्छिन्नेनापि तेन संबन्धेन तादृशहेतुव्यापकतासंभवः सकलसाध्यतावच्छेदकव्यक्तीनामेव चालनी न्यायेन हेतुसमानाधिकरणतानवच्छेदकाव
च्छिन्नाभावप्रतियोगितावच्छेदकत्वादित्याशंकानिराकरणाय परिहरति दृष्टादाविति पादद्वयात् सद्धूमनिरासे [redacted] दरूपम् सम्बन्धविशेषेण संबन्धनया व्यस समस
वर्त्ताद्विमित्यर्थः । एतत्पक्षसाध्यत्वेतितपादैः साध्येनैव व्यापकतावच्छेदकं तत्संभवरूपाशंकानिराकरणपरमध्यतावच्छेदकेऽमितिदशिस योगादिसमना
नाधिकरणवृत्तितावच्छेदकावच्छिन्नहेतुव्यापकतावच्छेदकमित्यर्थः एवकारेणादृष्टादिरूपसाधनस्य व्यवच्छेदः तथा च तत्र प्रतियोगितानवच्छेद गगम०
कत्वमप्युत्पद्यते न वृत्तिः दृष्टादिनैव प्रकारेणानहेतुकदेशानुमितेरुत्पत्तेन व्यत्वात व्यापकतावच्छेदकत्वमपि सादेवरूपादिप्रकारकरण

नुमितेरुत्पत्तेरभावत्वात्प्रवच्छिन्नविषयतासंबन्धेन पक्षधर्मे व्यापकतावच्छेदकत्वग्रहत्वादि विशेषधर्मप्रकारेण सामानाधिकरण्यप्रतियोगितया साध्या
व्याप्तिव्याप्तिग्रहस्य वाद्दमविशिष्टदृष्टादिरूपधर्मिणाम् अनुमितिविधेयतावच्छेदकताप्रयोजकत्वोपगमेन दृष्टानिष्ठाकारानुमितेर्भ्रम
रूपतापत्तेः तेन वह्नित्वादि तिमात्रावगाहनमात्रप्रयत्नादिसहितवह्नित्वादेर्महानसीयत्वविशिष्टाभावप्रतियोगितावच्छेदकत्वेपि शुद्धवह्नित्वा
दिरूपसाध्यतावच्छेदकस्य तादृशप्रतियोगितावच्छेदकत्वे तत्कालादिविशिष्टदृष्टत्वादृश प्रतियोगितावच्छेदकत्वेपि दृष्टाधिपत्यवच्छिन्नमात्र
शप्रतियोगितानवच्छेदकत्वमपि रूपत्वव्यापकताच्छेदकत्वानुगमेन संगच्छते तन्नद् ऊनात्वाविशुद्धेन तोपनोदितरूपवदन्यप्रतियोगिता
वच्छेदकत्वपर्याप्तिर्भविते न तु तत्सामानाधिकरण्यमात्रेणोपलक्षितसाध्यतावच्छेदकत्वमतिप्रसक्तमिति साध्यतावच्छेदकतानवच्छेदकत्वात्तद्विशिष्टावच्छेदकत्वपर्या रा
स "ध्येकरणतापादनात्वादिविशिष्टसाधनस्यानवच्छेदकत्वं दृष्टेः सामानाधिकरण्यव्याप्याभावप्रतियोगितापावह्नित्वादेः । प्रसक्तानत्यावच्छे
दकतापर्याप्तिसंबन्धेन मत्सामानाधिकरणत्वादेरवच्छेदकाभावश्चात्वप्रकव्यवच्छिन्नत्वादेस्तादृशप्रतियोगितानवच्छेदकत्वं तत्र घटमितिवाक्यार्थः
पलोभावसमानस्यैवस्वरूपतोऽवच्छेदकतापाः सिद्धान्तसिद्धतया सर्वरूपधर्मस्य रूपत्वेः स्वरूपतोऽवच्छेदकत्वं संभवेन तृप्ता घटवृत्तिविप्रत्यासिति
वृत्तिवेन तत्साधिरूपविशेषणाप्रमते तत्स्यात्तावच्छेदकसंबन्धितावच्छेदकवत्प्रवसन्नस्त्राशिकत्वधर्मो नरभावो पर्यायसम्पलक्षणात्मपादनत्वपारेणानुद्
मावविरोधप्रतियोगितावच्छिन्नप्रतियोगितावच्छेदकप्रभासमानेनैतावच्छेदकत्वभासमानदर्शितविषयीकरणे विनिदर्शनात्वानित्यत्वापत्तेर्दुर्गी
रत्वात् । अत एव केचित् तत्रानुमानेवरूपनावित्यादावादिपदप्रयोजनेऽप्याहितप्रवृत्तिर्व्याप्तिव्यादिव्याप्यज्ञानित्वादित्यनुगमोक्तत्वपटत्वम
त्रिकालव्यापकत्वादिमतः समवायादिनाप्यव्याप्तिः हेतुकसाध्यत्वतादृशादेव्यप्तानित्वपरिग्रहः समवायादिनहितमतेनपृथिव्यादिमत्तिन्ननुक
पालादौ विशेषणतानवच्छिन्नघटत्वपटत्वाघवच्छिन्नाभावस्य तावत्संबन्धेन साध्यतावच्छेदकतादृशजातिमत्त्वाविद्याभावप्रतियोगितान

ग॰टी॰ च्छेदकत्वपर्य्याप्तिसत्वा व्यापकतावच्छेदकत्वासंभवेन तद्व्यक्तिगमकोऽन्यधर्मस्यैव पर्य्याप्तिसंबंधेन तथात्वोपगमस्यावश्यकत्वादित्याहुः अन्ये तु नन्वेवं
न्नात्वस्य प्रतियोगिविशेषणतया समानाधिकरण्येन हि प्रतियोगितावच्छेदकत्वपर्य्याप्तिस्वीकारे तन्न हि शेषणतया तत्र तदवच्छेदकतावच्छेदकत्व
मेव प्रतियोगिता अधिकरणस्य तदवच्छेदकत्वासंभवेन तद्भावेन तदवच्छेदकतापर्य्याप्त्यसंभवात् अन्यवच्छिन्नावच्छेदकत्वमेव च स्वरूपतोऽव
च्छेदकत्वेन तत्र तद्वृत्तिनास्त्यतो द्रव्यत्वेनावच्छेदकत्वे हेतुर्घटमहानसीयवह्निर्नास्तीत्यादौ च महानसीयत्वादेः प्रतियोगितावच्छेदकविशेषणतया मानाभावेन तद्भाव
नैव प्रतियोगितावच्छेदकत्वपर्य्याप्तिमात्रसत्त्वेऽपि विशेषः अथ वह्नित्वाद्यवच्छिन्नसामानाधिकरण्यसंबंधेन विशेषणतया महानसीयत्वादिकमवगाह
मानमहानसीयत्वविशिष्टवह्नित्ववान्नास्तीत्यादिप्रकारकप्रतीतिसत्त्वाच्च महानसीयत्वावच्छिन्नवह्नित्वादावेव प्रतियोगितावच्छेदक
त्वपर्य्याप्तिविषयकतया वह्नित्वादेरप्यनवच्छेदकत्वमेव दुर्वारमत एव वह्नित्वादेः समवायेन प्रतियोगितायां सामानाधिकरण्यसंबंधेन च महान
सीयत्वादेरवच्छेदकतायामवच्छेदके गौरवान्न महानसीयत्वादिसहितस्य वह्नित्वादेः प्रतियोगितायामेकावच्छेदकत्वमव्याप्तीति स्वकेवुद्धौ वाच्ये
मानाभावात् प्रतीतिवैरवच्छेदकत्वाद्यन्यमतप्रवेशेऽपि प्रत्ययस्य सामानाधिकरण्यसंबंधेन महानसीयत्वादिविशिष्टस्य वह्नित्वादेः साध्यतावच्छे
दकतानन्त्याल्लक्षणविचारावसरे अवच्छेदकतावादिनामप्येवं इति स्वविशिष्टसंबंधित्वादिना निरुक्तोपाधिकावच्छेदकत्वनिवेशनापत्र
त्वेन तद्विशेषणस्वरूपधर्मस्य निवेशस्तादृशलेशावच्छेद महानसीयत्वादिविशिष्टस्य वह्नित्वादेः तत्र स्वरूपेणोपादानसंभवाद्विशिष्टवह्नि
त्वादेरिकमेव पारिभाषिकमवच्छेदकत्वं तन्निवेशमेदः शुद्धवह्नित्वादावपि दुर्घटः विच्छेदकपादशत्वं तादृशत्वविषयकप्रतीतिविषयत्व
मेवच्छेदकपदेनोपादानसंभवेऽस्मदुक्तादेः स्वरूपतो मानाभावादिविशेषणाद्विशिष्टस्यैवावच्छेदकत्वलक्षणस्य स्वरूपेणोपादेयतया राम॰
दिविशिष्टविषयकप्रतीतिविषयत्वस्य दुर्ज्ञानत्वादिविशिष्टस्य घटत्वाद्यापादकतावच्छेदकत्वमव्याहतमेवेति चेत् न पारिभाषिकस्यावच्छेदकत्व

स्य स्वरूपघटितत्वेनानुगतस्याभावकूटस्यानासंभवेन प्रतियोगितायाः स्वरूपसंबंधरूपावच्छेदकत्वस्यागत्या गुरुधर्मसाधारण्यमाश्रित्य आ
प्तिलक्षणे तद्विनिवेशनीयत्वे चे सामानाधिकरण्यसंबंधेनैव महानसीयत्वादिविशेषणावच्छिन्नस्य वह्नित्वादेर्हेतुमच्चिन्तामावप्रतियोगितावच्छेदक
त्वेऽपि महानसत्वादिविशिष्टनिरूपितसमवायादेरवच्छिन्नप्रतियोगितावच्छेदकताघटकसंबंधत्वान्तरोपेक्षसमवायादिनावच्छेदकत्वादिः निष्प्रकारकत्वानभ्युपगम
वायादेस्तत्रावच्छेदकतावच्छेदकेऽपि महानसीयत्वादिसामानाधिकरण्योपलब्धेर्न वह्नित्वाद्यवच्छिन्नाभावाद्विशिष्टवह्नित्वावच्छिन्नाभावे लक्षणा
नुपपत्तेः अन्यथा चेत् अन्तावच्छेदकतावच्छेदकं युक्तं समासस्वापादिना अखंडवह्नित्वादेरनवच्छेदकत्वं न दुर्लभं न च महानसीयत्वादिसामानाधिकर
ण्यपर्य्याप्तिलक्षणतानवृत्तेस्यावच्छेदके कोऽपि न पूर्वपक्षः पक्षविशेषणत्वेन तत्र तदीयत्वेन एव वैलक्षण्यमिति वाच्यं उपलक्षणीभवन्तत्वाप्रवेशात्प्रति
योगितावच्छेदकीकृतावयवस्थाने प्रस्यप्रतियोगितावच्छेदकारोपकारतापाभानानुमानावच्छेदकतावच्छेदकत्वानन्त्यस्य व्यापकतापाश्रवच्छेदक
ताया प्रवेशस्य शेरूपोपलक्षणतानानुपपत्तेर्विषयतासाच्छेदकेनत्रासंभवात्मपरूपलाहतनिरूपितसमवायादिरवच्छेदकतावच्छेदकसंबंधत्वेनस्याप
लक्षणतापत्त्यवच्छेदकत्वं प्रदिशितनिरूपितसमवायादेरवच्छेदकघटकसंबंधत्वं प्रविशेषणाविधया अवच्छेदकत्वमित्यस्यैव विशेषत्वात् एकत्वप्रा
भावविशिष्टवह्न्यादेः संयोगादिसंबंधेनाभावस्य प्रतियोगितापाश्रितत्वतया विशिष्टनिरूपितसंयोगादेरवच्छेदकत्वासंभवेनागत्या विशेषणाविधया प्र
तियोगितावच्छेदकत्वसम्भवे वैलक्षण्यस्यापादनीयतया समवायादेर्वह्नित्वविशिष्टस्य भावप्रतियोगितावच्छेदकसंबंधनपातादृशाभावस्य
नात्र संबंधेन प्रतियोगिसमानाधिकरणतया अविनिर्मुक्तो प्रतियोगितावच्छेदकविशिष्टसामानाधिकरण्यपर्यन्तनिवेश आवश्यकतानिःसामान्य
विशिष्टनिरूपितसमवायादिना प्रतियोगितावच्छेदकसंबंधनातथापि महानसीयत्वादिसामानाधिकरण्योपलब्धिर्न वह्नित्वादेः तद्विशिष्टवह्नित्वा
दृशपर्य्याप्तियोगितावच्छेदकतापर्यवसानरूपस्यापादानं कर्त्तव्यमिति व्यविरोधापत्त्या तस्य च विशेषणविधिविशेषणाभावापत्तेः कथं धर्मितावच्छेदकः पर्याप्तत्वे

DR BHAU DAJI MEMORIAL

शि.टी.

।तैव उपपादनीयं तावतापि अवच्छेदकस्य वह्नित्वादेर्हेतुमन्निष्ठाभावप्रतियोगितानवच्छेदकत्वमुपपद्यते धर्मान्तरोपलक्षितवह्नित्वावच्छिन्ना
भावस्य धूमादिमत्यसत्त्वे विशिष्टवह्नित्वावच्छिन्नाभावप्रतियोगितावच्छेदकतायाश्च विशेषणतानर्थक्येनावर्जनीयत्वात्। न चोपलक्षितं तदवच्छिन्नप्रतियोगिता
कहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकतावच्छिन्नाशङ्क्य विशेष्यस्य वर्णाभासाव्यवच्छेदकताघटकघटकस्य पागसंबन्धावच्छिन्नाऽवृत्तित्वादृशासं
बन्धेन दण्डत्वादृशाभावप्रतियोगितानवच्छेदकत्वेऽरूपपादमितिसामान्यस्यमितिविशेषेणतु गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वेपारिभाषिकावच्छेदक
त्वनिवेशमीयतः धारेणाहवनि विशेषणादृशधर्मभेदनिवेशेपिवह्नित्वादौ विशिष्टवह्नित्वादिभेदासत्त्वेनतादृशतादृशधर्माविषयकप्रतिविषयत्वेनि
वेशनीयमितिमोऽवमतः प्रतियोगितावच्छेदकेपादशपादशपादशरूपेस्वविशिष्टसंबन्धविनिष्ठाभावप्रतियोगितावच्छेदकत्वकेलरूपेनन्वेदति।त्वमे
वानवच्छेदकानेनविवाणांपात्रपाचसर्वासामेवदूरादिमालोनां हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकतयाकस्याश्चदपिदेशादिष्वल्के
नेपावत्प्रतियोगितावच्छेदकानि।कविलक्षणस्याति।कवित्वेविरहादित्यत्रं धर्मस्यव्यापकतावच्छेदकतानुसरणमतदैकोलाभिप्राये
णापत्त्याश्चत्वमलमुपपादयितुमार्वभौमप्रथमनमनुसृत्यएकोत्पनादौश्चानुगतनरूपेणनानाव्यक्तिविधेयतावच्छेदकानुमित्योपयिकव्याप्तिरूपा
वच्छिन्नमनवच्छेदकेपदरूपंवावच्छेदकतानवच्छेदकेतद्रूपविशिष्टावच्छिन्नसामानाधिकरण्यंतद्रूपविशिष्टावच्छिन्ननिरूपितव्याप्तिरित्येवेत्यर्थं व
नीयातथ्याम्रतिदेशसंयोगादिहेतुकापिदेशमानप्रमित्याकारकारकानुमितिविशेषदर्शिनामपिनिर्वाहमित्येवमेकोव्याप्तिप्रतियोगिप्रतियोगिताधर्मिका
भयाभावघटितायामप्रकारोस्त्वपमुपदर्शनीयायाव्याप्तेरपिदण्डत्वादिविशिष्टं यद्यदवच्छिन्ननिरूपितत्वनिर्वाहनसमानाधिकरणविशेषाभाव
प्रतियोगितापादेकपृथिवीत्वव्याप्यजातित्वादिविशिष्टावच्छेदकताभावस्याप्याहनत्वातदंशादिसामान्याभावप्रतियोगितायामेवतद्धर्मविशिष्ट ११०
निरूपितविलक्षणावच्छेदकतासत्त्वादितिध्येयम्।स्यचेतिहेतुतावच्छेदकोपलक्षितहेतुसामानाधिकरण्यस्याधारतानुरूपमुपेत्यविशिष्टसामानाधि

करण्यत्वेनसामानाधिकरण्यनिवेशनेनेत्यर्थः।नाश्रमितिरितिनविशिष्टसमान्वयत्वरूपहेतुतावच्छेदकविशिष्टवैशिष्ट्यावगाहिज्ञानजन्यानुमित्यौप
यिकत्वानेरनिर्वाहइत्यर्थः।तेनविशिष्टसत्तावत्त्वोपलक्षितहेतुमत्ताज्ञानजन्यानुमित्यौपयिकव्यासेरुपलक्षितहेतुसामानाधिकरण्यघटितत्वेनिर्वाहइत्यर्थ
ः तेनविशिष्टसत्तात्वोपलक्षितहेतुमत्ताज्ञानजन्यानुमित्यौपयिकव्यासेरुपलक्षितहेतुसामानाधिकरण्यमेककोव्यमेवनिर्विशिष्टमितिलभ्यतेत
तोद्व्यत्वाद्यभावेनदशाहेतुसामानाधिकरण्यसत्त्वान्नादशाहेतौ नद्रव्यत्वादेर्व्याप्तिरित्यर्थः।नानागुणादौ विशिष्टसत्तात्वोपलक्षितहेतुमत्ताज्ञान
संभवेपिनतत्रद्रव्यत्वाद्यनुमित्यापत्तिःपरत्रघटपटदृष्टान्तसंयोगत्वादिनागुणादौ विशिष्टसत्तात्वोपलक्षितहेतुमत्ताज्ञानसंभवेपिनतत्रद्रव्यत्वा
द्यनुमित्यापत्तिःपरत्रघटपटदृष्टान्तसंयोगत्वादिनाहेतुताघटपटघटितत्वेसाध्यनतत्रउभयहेतुविशिष्टाधिकरणप्रसिद्ध्याहेतुतावच्छेदकोपल
क्षितहेतुसामानाधिकरण्यगर्भव्याप्त्यनतिप्रसंगवत्त्वेकारणीयमव्यवधानेहेतुकतत्वाभ्यकानुमितेरवच्छेदकसंगतवद्व्याप्यतरानभ्युपगमेसाध्य
हेतुकानुमितिप्रयुक्तिपेनतद्वटसामानाधिकरण्यसहितद्वयधर्मत्वरूपसाहचर्यत्वविशिष्टाधिकरणाप्रसिद्ध्याविशिष्टाधिकरणतागर्भव्याप्त्य
प्रसवादन्यथैवविशिष्टवैशिष्ट्यावगाहिज्ञानेविशिष्टनिरूपितसमवायसंबन्धावच्छिन्नसंबन्धस्वामिहेतुतावच्छेदकसंबन्धेनहेतुमत्त्वस्याप
विवक्षणीयतयैवनिर्वाहतानिकथमत्रविशिष्टपदोपादानेनचविशिष्टवैशिष्ट्यवाधेविशिष्टनिरूपितसमवायत्वादिनाविशेषणसंबन्धता
अपिनुअर्थादेवसमवायादिविशेषणसंबन्धःस्वविशिष्टत्वबाधेविशिष्टनिरूपितसमवायादिकविशेषणतावच्छेदकसंबन्धइत्यभिमतापि
प्रायेणाहतथाचारकस्यत्वेपिहेतुतावच्छेदकसंबन्धःसमवायएवेतिहेतुतावच्छेदकसंबन्धमात्रविवक्षयानपर्याप्तिकारइतिवाच्येहेतुतावच्छेद
कविशिष्टवैशिष्ट्यावगाहिज्ञानेहेतुतावच्छेदकस्यपक्षेऽपिपरासंबन्धमानेनियमेव्यापकताराघटकाभावाधिकरणोपितदीपनारूपसंबं
धस्यनिवेशनित्वात्तनएवहेतुतःपक्षेसाध्यानुमितिनिर्वाहेविशिष्टत्वेनसत्ताद्रव्यत्वादिअनुमितिकारणनिरूपितकतापत्तानन्तचेदा

शि॰टी॰ तौ त्याविशिष्टव्यापकतानाग्रहस्य विशेषणव्यापकतावगाहित्वेऽपि विशिष्टपक्षधर्मताग्रहस्य विशेषणेन दृष्टवगाहित्वेऽपि च विशिष्टहेतुकपरामर्शस्य विशेष
णे साध्यसामानाधिकरण्यावगाहित्वात् विशेषणहेतुकानुमितिसामग्र्या विशिष्टहेतुकानुमितिप्रतिबन्धकत्वात् तादृशसाध्यविशिष्टहेतोर्व्यापकता
ग्रहेऽपि विशिष्टहेतौ साध्यविरोधग्रहसत्त्वे नानुमितिः विशिष्टहेतुकस्थले विशिष्टाधिकरणत्वघटितहेतुसाध्यसामानाधिकरण्यविषयकस्यैव परामर्
शस्यानुमितिहेतुतया परामर्शात्मकत्वात् अन्यथा विरोधस्य जनकज्ञानाविरोधितया हेत्वाभासत्वस्य दुर्घटतापत्तेः तथा च साध्यवति विशिष्टहेत्वधिकरणत्वस्य
भाने विशेषणांशे परम्परासम्बन्धस्यापि तत्र भाननियमेन विशिष्टहेतुकपरामर्शस्य नियमतो विशेषणेऽपि साध्यसामानाधिकरण्यावगाहित्वात् अमे विशिष्टनि
रूपितव्यापकताशरीरे विशेषणांशधर्मिताते अतो न किञ्चिदधिकरणे विशेषणतया प्रवेशः ननु स्वातन्त्र्येण तथात्वेऽपि विशेषणव्यापकतावगाहित्व
नियमो निर्वहति विशेषणानिरूपितव्यापकताया दुर्ज्ञेयत्वाभाववृत्तिप्रतियोगितावच्छेदकत्वरूपत्वात् प्रतियोगितावच्छेदकताया अभावघटितत्वात् विशिष्टवृत्तित्वा
भाववृत्तिप्रतियोगितावच्छेदकत्वरूपवृत्तिप्रयोगेण भावभानेऽपि विशिष्टवृत्तित्वान्तर्गतविशेष्यवत्त्वपरित्यागेन विशेषणवन्निष्ठाभाववृत्तिप्रतियोगितावच्छेद
कत्वलाभवृत्तिप्रतियोगितावच्छेदकत्वपर्याप्तिभानासम्भवात् अभाववृत्तिप्रतियोगिप्रकारघटकस्य उपलक्षणतया भानानभ्युपगमात् न च परम्परासम्बन्धेन वि
शेषणनिष्ठव्याप्यवगाहिपरामर्शनिष्ठकारणतापत्तेः भयवादिसिद्धत्वात् विशिष्टहेतुकपरामर्शनिष्ठकारणत्वाकल्पनप्रयुक्तलाघवानुरोधेन विशि
ष्टस्य व्याप्तिग्रहस्थलेऽधिकरणे स्वातन्त्र्येण विशेषणवत्त्वभानोपगमविशेषणेऽपि व्याप्तिभानेऽकल्पनापत्तिरिति वाच्यम् स्वाधीनविशिष्टवत्त्वगर्भव्याप्तिग्रहे स्वा
तन्त्र्येण विशेषणवत्त्वावगाहिव्याप्तिभाननियमानतादृशव्याप्तिबोधकशब्दस्थले स्वातन्त्र्येण विशेषणवत्त्वाभानकत्वात् अथ नन्वेवं विशेषणेऽपि समव्याप्तिग्र
हस्थले परम्परासम्बन्धेनोपस्थितदण्डादौ व्याप्तिग्रहस्यकल्पनसम्भवात् स्वातन्त्र्येण तत्र कल्पपरम्परासम्बन्धघटितसकलविशेषणवत्त्वग्रहस्याप्रामाणिक
तया विशेषणे हेतुकपरामर्शस्य कारणतापत्तेः कृतत्वान्नियमाच्च ननु वह्निसंयोगिसंयोगाद्यात्मकसाध्यसामानाधिकरण्यस्य व्याप्तित्वे धूमे वह्निसाध्य १५०

मितिनिमित्तत्वं प्रविरोधः महानसवृत्तितादिनिष्ठधूमादिगतवह्निसंयोगिसंयोगादेरप्रसिद्धत्वात् इत्यत आह सामानाधिकरण्यमत्र तौ नानुमितिभेदेऽपीति
अधिकरणभेदेन धूमादिभेदेन चेत्यादिः निरूपकतावच्छेदकं वह्नित्वादिरूपसाध्यतावच्छेदकं अधिकरणतावच्छेदकं धूमत्वादिरूपहेतुतावच्छेदकं तदै
क्यं साध्यहेतुत्वेऽप्यभेद इत्यत्र तात्पर्यं तात्पर्यकं भासकमैक्यव्यवहारः ननु न हेतुतायास्तथाव्यवहारसमर्थनमसङ्गतं सामान्यतः सम्भवति हि विशिष्टप
क्षधर्मतानिर्वाहार्थमप्येकाकथनात् न त्रिवृत्तस्य च सामानाधिकरण्यस्य व्याप्तित्वे धूमत्वादौ केऽपि प्रसिद्धे धूमादिनिष्ठसामानाधिकरण्यसामान्यप्रत्या
त्तिविनाशे वैयर्थ्यात् भवेत् तत्र कारणासम्भवात् प्रत्युत यथा धूमे तदुपनयासम्भवेनायोगात् अयं नियमसंयोगेन धूमादिव्यापकवह्न्यादिसामानाधिकरण्यमात्रस्या
